CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बृहद्

स्तोत्ररत्नाकरः

स्तोत्र संख्या २ ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीगणेशाय नमः ॥

बृहत् स्तोत्ररत्नाकरः

स्तोत्रसंख्या २१४

व्याकरणाचार्य 'विद्यारत्न'
पं० माधवप्रसाद व्यासेन
संशोधितः।

प्रकाशक-
भार्गवपुस्तकालय,
गायघाट, वाराणसी १.

सन् १९५७ ई०] [मूल्य ३)

ाङ्काः
१
२
४
६
८
९
१३
१५
१७
१८
२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुद्रक–
पं० बैकुण्ठनाथ भार्गव,
आनन्दसागर प्रेस, गायघाट, वाराणसी १.

१५१५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बृहत्स्तोत्ररत्नाकरस्य

स्तोत्रानुक्रमणिका।

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः
	मङ्गलम्	१
	गणेशन्यासः	२
	अथ गणपतिस्तोत्राणि ।	
१	सङ्कष्टहरणं श्रीगणेशाष्टकम् (१)	४
२	गणेशाष्टकम् (२)	६
३	गणेशाष्टकम् (३)	८
४	गणेशकवचम्	९
५	गणपतिस्तवः	१३
६	गणेशाष्टोत्तरशतनामस्तोत्रम्	१५
७	सङ्कष्टनाशनं गणेशस्तोत्रम्	१७
८	मयूरेश्वरस्तोत्रम्	१८
९	एकदन्तस्तोत्रम्	२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः
	अथ शिवस्तोत्राणि ।	
१०	शिवकवचस्तोत्रम्	२५
११	शिवमहिम्नः स्तोत्रम्	३४
१२	शिवमानसपूजा (१)	४१
१३	शिवमानसपूजा (२)	४३
१४	शिवभुजङ्गप्रयातस्तोत्रम्	४५
१५	शिवपञ्चाक्षरस्तोत्रम्	४७
१६	शिवषडक्षरस्तोत्रम्	४८
१७	(उपमन्युकृतं) शिवस्तोत्रम्	४९
१८	शिवापराधक्षमापनस्तोत्रम्	५२
१९	शिवताण्डवस्तोत्रम्	५५
२०	शिवरक्षास्तोत्रम्	५७
२१	अभिलाषाष्टकस्तोत्रम्	५९
२२	वेदसारशिवस्तवः	६२
२३	पशुपत्यष्टकम्	६४
२४	लिङ्गाष्टकम्	६५
२५	महदेवाष्टकम्	६६
२६	बिल्वाष्टकम्	६८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः
२७	वैद्यनाथाष्टकम्	६६
२८	शिवाष्टकम्	७१
२९	विश्वनाथाष्टकम्	७२
३०	शिवनामावल्यष्टकम्	७३
३१	प्रदोषस्तोत्राष्टकम्	७५
३२	प्रदोषस्तोत्रम्	७६
३३	चन्द्रशेखराष्टकम्	७८
३४	दारिद्र्यदहनशिवस्तोत्रम्	७९
३५	शिवाष्टोत्तरशतनामस्तोत्रम्	८१
३६	द्वादशज्योतिर्लिङ्गस्तोत्रम्	८३
३७	विश्वमूर्त्यष्टकम्	८४
३८	कर्पूरस्तोत्रम्	८६

अथ विष्णुस्तोत्राणि ।

३९	नारायणहृदयम्	९१
४०	नारायणवर्म	९५
४१	श्रीविष्णुशतनामस्तोत्रम्	१००
४२	हरिनाममालास्तोत्रम्	१०२
४३	श्रीहरिस्तोत्रम्	१०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः
	अथ शिवस्तोत्राणि ।	
१०	शिवकवचस्तोत्रम्	२५
११	शिवमहिम्नः स्तोत्रम्	३४
१२	शिवमानसपूजा (१)	४१
१३	शिवमानसपूजा (२)	४३
१४	शिवभुजङ्गप्रयातस्तोत्रम्	४५
१५	शिवपञ्चाक्षरस्तोत्रम्	४७
१६	शिवषडक्षरस्तोत्रम्	४८
१७	(उपमन्युकृतं) शिवस्तोत्रम्	४९
१८	शिवापराधक्षमापनस्तोत्रम्	५२
१९	शिवताण्डवस्तोत्रम्	५५
२०	शिवरक्षास्तोत्रम्	५७
२१	अभिलाषाष्टकस्तोत्रम्	५९
२२	वेदसारशिवस्तवः	६२
२३	पशुपत्यष्टकम्	६४
२४	लिङ्गाष्टकम्	६५
२५	महदेवाष्टकम्	६६
२६	बिल्वाष्टकम्	६८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः
२७	वैद्यनाथाष्टकम्	६६
२८	शिवाष्टकम्	७१
२९	विश्वनाथाष्टकम्	७२
३०	शिवनामावल्यष्टकम्	७३
३१	प्रदोषस्तोत्राष्टकम्	७५
३२	प्रदोषस्तोत्रम्	७६
३३	चन्द्रशेखराष्टकम्	७८
३४	दारिद्र्यदहनशिवस्तोत्रम्	७९
३५	शिवाष्टोत्तरशतनामस्तोत्रम्	८१
३६	द्वादशज्योतिर्लिङ्गस्तोत्रम्	८३
३७	विश्वमूर्त्यष्टकम्	८४
३८	कर्पूरस्तोत्रम्	८६

अथ विष्णुस्तोत्राणि ।

३९	नारायणहृदयम्	९१
४०	नारायणवर्म	९५
४१	श्रीविष्णुशतनामस्तोत्रम्	१००
४२	हरिनाममालास्तोत्रम्	१०२
४३	श्रीहरिस्तोत्रम्	१०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः
४४	श्रीहरिनामाष्टकम्	१०६
४५	श्रीकमलापत्यष्टकम्	१०७
४६	दीनबन्ध्वष्टकम्	१०८
४७	अच्युताष्टकम्	११०
४८	षट्पदीस्तोत्रम्	१११
४९	श्रीमधुसूदनस्तोत्रम्	११३
५०	मुकुन्दमालास्तोत्रम्	११४
५१	मुरारिपञ्चरत्नम्	११८
५२	शालिग्रामस्तोत्रम्	११९
५३	नारायणस्तोत्रम्	१२३
५४	विष्णुस्तवराजः	१२५

अथ सूर्यस्तोत्राणि ।

५५	आदित्यहृदयस्तोत्रम्	१२९
५६	सूर्याष्टकम्	१३२
५७	त्रैलोक्यमङ्गलं सूर्यकवचम्	१३४
५८	सूर्यार्यास्तोत्रम्	१३६
५९	गद्यात्मकं सूर्यस्तोत्रम्	१३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः
	अथ देवीस्तोत्राणि ।	
६०	श्रीसूक्तम्	१३६
६१	लक्ष्मीहृदयम्	१४२
६२	भारतभूमातृ–स्तोत्रम्	१५६
६३	अम्बाष्टकम्	१५९
६४	श्रीस्तोत्रम्	१६१
६५	महालक्ष्म्यष्टकम्	१६३
६६	देवकृतं लक्ष्मीस्तोत्रम्	१६४
६७	देव्यपराधक्षमापनस्तोत्रम्	१६६
६८	त्रिपुरसुन्दरीस्तोत्रम्	१६८
६९	आनन्दलहरी	१७०
७०	वाराहीनिग्रहाष्टकम्	१७४
७१	वाराह्यनुग्रहाष्टकम्	१७६
७२	ताराष्टकम्	१७७
७३	शीतलाष्टकम्	१७९
७४	अन्नपूर्णास्तोत्रम्	१८१
७५	सङ्कटानामाष्टकम्	१८३
७६	इन्द्राक्षीस्तोत्रम्	१८५
७७	भवानीभुजङ्गस्तोत्रम्	१८८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः
७८	दुर्गापदुद्धारस्तोत्रम्	१९१
७९	गायत्रीस्तोत्रम्	१९३
८०	सरस्वतीस्तोत्रम्	१९६
८१	नीलसरस्वतीस्तोत्रम्	१९९
८२	दशमहाविद्यास्तोत्रम्	२००

अथ गङ्गादितीर्थस्तोत्राणि ।

८३	गङ्गाष्टकम् (१)	२०३
८४	गङ्गाष्टकम् (२)	२०५
८५	गङ्गास्तवः	२०७
८६	गङ्गास्तुतिः	२०९
८७	नर्मदाष्टकम्	२१२
८८	यमुनाष्टकम्	२१४
८९	पुष्कराष्टकम्	२१६
९०	श्रीमणिकर्णिकाष्टकम्	२१८
९१	प्रयागाष्टकम्	२२०
९२	काशीपञ्चकम्	२२१
९३	त्रिवेणीदशकस्तोत्रम्	२२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः
	अथ श्रीरामावतारस्तोत्राणि ।	
९४	रामगीता	२२५
९५	रामरक्षास्तोत्रम्	२३४
९६	ब्रह्मदेवकृता रामस्तुतिः	२३९
९७	श्रीरामहृदयम्	२४१
९८	जटायुकृतं रामस्तोत्रम्	२४२
९९	श्रीमहादेवकृतं रामस्तोत्रम्	२४४
१००	अहल्याकृतं रामस्तोत्रम्	२४६
१०१	इन्द्रकृतं रामस्तोत्रम्	२४९
१०२	श्रीरामचन्द्राष्टकम्	२५०
१०३	श्रीसीतारामाष्टकम्	२५२
१०४	श्रीरामाष्टकम् (१)	२५४
१०५	श्रीरामाष्टकम् (२)	२५५
१०६	श्रीरामाष्टकम् (३)	२५६
१०७	श्रीरघुनाथाष्टकम्	२५८
१०८	रामषट्पदी	२५९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः
	अथ कृष्णावतारस्तोत्राणि ।	
१०९	ब्रह्मदेवकृतं कृष्णस्तोत्रम्	२६१
११०	इन्द्रकृतं कृष्णस्तोत्रम्	२६२
१११	विप्रपत्नीकृतं कृष्णस्तोत्रम्	२६५
११२	ज्वरकृतं श्रीकृष्णस्तोत्रम्	२६६
११३	मोहिनीकृतं कृष्णस्तोत्रम्	२६७
११४	श्रीकृष्णस्तोत्रम्	२६९
११५	दामोदरस्तोत्रम्	२७०
११६	गोपालस्तोत्रम्	२७२
११७	गोपालविंशतिस्तोत्रम्	२७४
११८	गोपालहृदयस्तोत्रम्	२७७
११९	गोपाल स्तुतिः	२८०
१२०	गोपालस्तुतिः	२८१
१२१	श्रीगोपालाक्षयकवचम्	२८३
१२२	श्रीगोपालकवचम्	२८५
१२३	गोपालशतनामस्तोत्रम्	२८७
१२४	कृष्णाष्टोत्तरशतनामस्तोत्रम्	२९०
१२५	श्रीकृष्णद्वादशनामस्तोत्रम्	२९३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः
१२६	श्रीकृष्णाष्टकम् (१)	२९४
१२७	श्रीकृष्णाष्टकम् (२)	२९६
१२८	श्रीकृष्णाष्टकम् (३)	२९७
१२९	श्रीकृष्णाष्टकम् (४)	२९९
१३०	विन्दुमाधवाष्टकम्	३००
१३१	जगन्नाथाष्टकम्	३०२
१३२	गोविन्दाष्टकम्	३०३
१३३	श्रीगोविन्दाष्टकम्	३०५
१३४	श्रीगोपालाष्टकम्	३०७
१३५	भगवन्मानसपूजा	३०८
१३६	श्रीकृष्णस्तवराजः	३११

अथ अवतारस्तोत्राणि ।

१३७	पाण्डुरङ्गाष्टकम्	३१४
१३८	कल्किस्तोत्रम्	३१५
१३९	कल्किस्तवः	३१७
१४०	मत्स्यस्तोत्रम्	३१९
१४१	कूर्मस्तोत्रम्	३२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः
१४२	वराहस्तोत्रम्	३२२
१४३	नृसिंहस्तोत्रम्	३२४
१४४	लक्ष्मीनृसिंहस्तोत्रम्	३२७
१४५	वामनस्तोत्रम् (१)	३२६
१४६	वामनस्तोत्रम् (२)	३२६
१४७	परशुरामाष्टाविंशतिनामस्तोत्रम्	३३२
	अथ श्रीहनुमत्स्तोत्राणि ।	
१४८	श्रीहनुमत्कवचम्	३३४
१४९	पञ्चमुखीहनुमत्कवचम्	३३७
१५०	एकादशमुखीहनुमत्कवचम्	३४३
१५१	श्रीहनुमल्लाङ्गूलास्त्रस्तोत्रम्:	३४५
१५२	श्रीहनुमदष्टकम्	३४७
१५३	हनुमद्बडवानलस्तोत्रम्	३४९
१५४	विभीषणकृतं हनुमत्स्तोत्रम्	३५१
१५५	मारुतिस्तोत्रम्	३५४
	अथ श्रीदत्तात्रेयस्तोत्राणि ।	
१५६	दत्तात्रेयस्तोत्रम्	३५६
१५७	श्रीगुरुराजस्तवः	३५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः
१५८	गुर्वष्टकम्	३६१
१५९	दक्षिणामूर्तिगुरुस्तोत्रम्	३६२
१६०	गुरुवरप्रार्थनापञ्चरत्नस्तोत्रम्	३६५

अथ नवग्रहस्तोत्राणि ।

१६१	आदित्यस्तोत्रम्	३६७
१६२	चन्द्राष्टाविंशतिनामस्तोत्रम्	३६९
१६३	अङ्गारकस्तोत्रम्	३७०
१६४	ऋणमोचकमङ्गलस्तोत्रम्	३७१
१६५	बुधपञ्चविंशतिनामस्तोत्रम्	३७२
१६६	बृहस्पतिस्तोत्रम्	३७३
१६७	शुक्रस्तोत्रम्	३७३
१६८	शनैश्चरस्तवराजः	३७४
१६९	शनैश्चरस्तोत्रम्	३७७
१७०	राहुस्तोत्रम्	३७८
१७१	केतुपञ्चविंशतिनामस्तोत्रम्	३७९
१७२	नवग्रहपीडाहरस्तोत्रम्	३८०
१७३	नवग्रहस्तोत्रम्	३८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्राङ्काः	स्तोत्रनामानि	पृष्ठाङ्काः

अथ वेदान्तस्तोत्राणि ।

१७४	निर्वाणदशकम्	३८३
१७५	निर्वाणषट्कम्	३८४
१७६	आत्मपञ्चकम्	३८६
१७७	साधनपञ्चकम्	३८७
१७८	कौपीनपञ्चकम्	३८८
१७९	मनीषापञ्चकम्	३८९
१८०	वैराग्यपञ्चकम्	३९१
१८१	धन्याष्टकम्	३९२
१८२	विज्ञाननौका	३९४
१८३	द्वादशपञ्जरिकास्तोत्रम्	३९५
१८४	चर्पटपञ्जरिकास्तोत्रम्	३९७
१८५	हस्तामलकस्तोत्रम्	४००
१८६	वाक्यवृत्तिः	४०२
१८७	परापूजा	४०८
१८८	शयनस्तोत्रम्	४०८
१८९	भ्रष्टाष्टकम्	४१०
१९०	शिष्टस्तोत्रम्	४१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वसूनवे । ददौ शङ्खं महारावं खडगं चारिनिषूदनम् ॥ ३६ ॥ पुनश्च भस्म संमन्त्र्य तदङ्गं परितोऽस्पृशत् । गजानां षट्सहस्रस्य द्विगुणस्य बलं ददौ ॥ ३७ ॥ भस्मप्रभावात्सम्प्राप्तबलैश्वर्यधृतिस्मृतिः । स राजपुत्रः शुशुभे शरदर्क इव श्रिया ॥ ३८ ॥ तमाह प्राञ्जलिं भूयः स योगी नृपनन्दनम् । एष खड्गो मया दत्तस्तपोमन्त्रानुभावितः ॥ ३९ ॥ शितधारमिमं खडगं यस्मै दर्शयसे स्फुटम् । स सद्यो म्रियते शत्रुः साक्षान्मृत्युरपि स्वयम् ॥ ४० ॥ अस्य शङ्खस्य निर्ह्रादं ये शृण्वन्ति तवाहिताः । ते मूर्च्छिताः पतिष्यन्ति न्यस्तशस्त्रा विचेतनाः ॥४१॥ खडगशंखाविमौ दिव्यौ परसैन्यविनाशिनौ आत्मसैन्यस्य पक्षाणां शौर्यतेजोविवर्धनौ ॥ ४२ ॥ एतयोश्च प्रभावेण शैवेन कवचेन च । द्विषट्सहस्रनागानां बलेन महतापि च ॥ ४३ ॥ भस्मधारणसामर्थ्याच्छत्रुसैन्यं विजेष्यसि । प्राप्य सिंहासनं पित्र्यं गोप्तासि पृथिविमिमाम् ॥ ४४ ॥ इति भद्रायुषं सम्यगनुशास्य समातृकम् । ताभ्यां सम्पूजितः सोऽथ योगी स्वैरगतिर्ययौ ॥ ४५ ॥

इति श्रीस्कन्दपुराणे ब्रह्मोत्तरखण्डे शिवकवचं सम्पूर्णम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

११ शिवमहिम्नः स्तोत्रम् ।

श्रीगणेशाय नमः ॥ पुष्पदन्त उवाच ॥ महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः। अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन् ममाप्येष स्तोत्रे हर निरपवादः परिकरः॥ १ ॥ अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि । स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्ववार्चीने पतति न मनः कस्य न वचः ॥ २ ॥ मधुस्फीता वाचः परममृतं निर्मितवतस्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदम् । मम त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेऽस्मिन् पुरमथनबुद्धिर्व्यवसिता ॥ ३ ॥ तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु । अभव्यानामस्मिन्वरद रमणीयामरमणीं विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ४ ॥ किमीहः किं कायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपादान इति च । अतर्क्यैश्वर्ये त्वय्यनवसर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुःस्थो हतधियः कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥ ५ ॥ अजन्मानो लोकाः किमवयववन्तोऽपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति । अनीशो वा कुर्याद्भुवनजनने कः परिकरो यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥६॥ त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च । रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ७ ॥ महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः कपालं चेतीयत्तव वरद तन्त्रोपकरणम् । सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ ८ ॥ ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये । समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥ ९ ॥ तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरिरधः परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः । ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत् स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥ १० ॥ अयत्नादापाद्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिभुवनमवरव्यतिकरं दशास्यो यद्बाहूनभृतरणकण्डूपरवशान् । शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥ ११ ॥ अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः । अलभ्यापातालेऽप्यलसचलिताङ्गुष्ठशिरसि प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यसि खलः ॥ १२ ॥ यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः । न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयोर्न कस्याऽप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥ १३ ॥ अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्याऽऽसीद्यस्त्रिनयन विषं संहृतवतः । सकल्माषः कण्ठे तव न कुरुते न श्रियमहो विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥ १४ ॥ असिद्धार्था नैव क्वचिदपि सदेवासुरनरे निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः । स पश्यन्नीश त्वामितरसुरसाधारणमभूत्स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥ १५ ॥ महीपादाघाताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गणम् । मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥ १६ ॥ वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते । जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतमहिम-दिव्यं तव वपुः ॥ १७ ॥ रथः क्षोणी यन्ता शत-धृतिरगेन्द्रो धनुरथो रथाङ्गे चन्द्रार्कौ रथचरण-पाणिः शर इति । दिधक्षोस्ते कोऽयं त्रिपुरतृणमा-डम्बरविधिर्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥ १८ ॥ हरिस्ते साहस्रं कमलबलि-माधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्र-कमलम् । गतो भक्त्युद्रेकः परिणतिमसौ चक्रव-पुषा त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥ १९ ॥ क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते । अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं श्रुतौ श्रद्धां बद्ध्वा कृतपरिकरः कर्मसु जनः ॥ २० ॥ क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः । क्रतुभ्रेषस्त्वत्तः क्रतुफलविधा-नव्यसनिनो ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मखाः ॥ २१ ॥ प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा । धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥ २२ ॥ स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि । यदि स्त्रैणं देवी यमनिरतदेहार्धघटनादवैति त्वामद्धा तव वरद मुग्धा युवतयः ॥ २३ ॥ श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः । अमङ्गल्यं शीलं तव भवतु नामैवमखिलं तथाऽपि स्मर्तॄणां वरद परमं मङ्गलमसि ॥ २४ ॥ मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदृशः । यदालोक्याह्लादं ह्रद इव निमज्यामृतमये दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥ २५ ॥ त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च । परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥ २६ ॥ त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिदधत्तीर्णविकृति । तुरीयं ते धाम ध्वनिभिरव-
रुन्धानमणुभिः समस्तव्यस्तं त्वां शरणद गृणात्यो-
मिति पदम् ॥ २७ ॥ भवः शर्वो रुद्रः पशुपति-
रथोग्रः सह महांस्तथा भीमेशानाविति यदभि-
धानाष्टकमिदम् । अमुष्मिन्प्रत्येकं प्रविचरति देव
श्रुतिरपि प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि
भवते ॥ २८ ॥ नमो नेदिष्ठाय प्रियदव दविष्ठाय
च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च
नमः । नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः ॥२६॥
बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः प्रबल-
तमसे तत्संहारे हराय नमो नमः । जनसुखकृते
सत्त्वोद्रिक्तौ मृडाय नमो नमः प्रमहसि पदे निस्त्रै-
गुण्ये शिवाय नमो नमः ॥ ३० ॥ कृशपरिणति
चेतः क्लेशवश्यं क्व चेदं क्व च तव गुणसीमोल्ल-
ङ्घिनी शश्वदृद्धिः । इति चकितममन्दीकृत्यमां
भक्तिराधाद्वरद चरणयोस्ते वाक्यपुष्पोपहारम्
॥ ३१ ॥ असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी । लिखति यदि
गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पारं न याति ॥ ३२ ॥ असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौलेर्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य । सकलगुणवरिष्ठः पुष्पदन्ताभिधानो रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥ ३३ ॥ अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्पठति परमभक्त्या शुद्धचित्तः पुमान्यः । स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र प्रचुरतरधनायुःपुत्रवान्कीर्तिमांश्च ॥ ३४ ॥ महेशान्नापरो देवो महिम्नो नापरा स्तुतिः । अघोरान्नापरो मन्त्रोनास्ति तत्त्वं गुरोः परम् ॥ ३५ ॥ दीक्षा दान तपस्तीर्थ ज्ञानं यागादिकाः क्रियाः । महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥ ३६ ॥ कुसुमदशननामा सर्वगन्धर्वराजः शशिधरवरमौलेर्देवदेवस्य दासः । स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥३७॥ सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः व्रजति शिवसमीपं किन्नरैः स्तूयमानः स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥ ३८ ॥ श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन स्तोत्रेण किल्बिषहरेण हरप्रियेण । कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो भवति भूतपतिर्महेशः ॥३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः। अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ॥ ४० ॥

इति श्रीपुष्पदन्तविरचितं शिवमहिम्नः
स्तोत्रं सम्पूर्णम् ॥ २ ॥

---

१२ शिवमानसपूजा (१)

श्रीगणेशाय नमः ॥ ओं प्रत्यक्प्रणवधीवृत्त्या हृद्गृहान्तः प्रवेशनम्। मण्डपान्तःप्रवेशोऽयं पूजार्थं तव शङ्कर ॥ १ ॥ गुरुवाक्येषु विश्वासः स्थितिरासनसंस्थितिः। सर्वसङ्कल्पसंत्यागः सङ्कल्पस्तव पूजने ॥ २ ॥ सर्वाधारस्त्वमेवेति निश्चयः पीठपूजनम्। ध्यानध्यातध्येयबाधो ध्यानमानन्दकारणम् ॥ ३ ॥ दृश्यप्रमार्जनं चित्तान्निर्माल्यस्य विसर्जनम् ॥ अहं ब्रह्मेत्यखण्डा या वृत्तिर्धाराभिषेचनम् ॥ ४ ॥ पृथिव्यात्मकतां दृष्टिस्तव गन्धसमर्पणम्। बोधोपशमवैराग्यं त्रिदलं बिल्वमर्पये ॥ ५ ॥ आकाशात्मकताबोधः कुसुमार्पणमीश्वर। जगदाकाशपुष्पाभमिति पद्मं समर्पये ॥ ६ ॥ वायु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेजोमयत्वं ते धूपदीपावनुत्तमौ । दृश्यासम्भव-
बोधेन निजानन्देन तृप्तता ॥ ७ ॥ सर्वतः प्रीति-
जनकं नैवेद्यं विनिवेदये । जलात्मकत्वबुद्धिस्तु
पीयूषं तेऽर्पये पिब ॥ ८ ॥ कर्तव्येष्वप्रसक्तिस्तु
हस्तप्रक्षालनं तव । सर्वकर्मफलत्यागो मुखप्रक्षालनं
तव ॥ ९ ॥ दुर्वासनापरित्यागस्ताम्बूलस्य समर्प-
णम् । वाचां विसर्जनं देव दक्षिणा श्रुतिसम्मता
॥ १० ॥ फलाभिसन्धिराहित्यं फलार्पणमनुत्तमम् ।
अहमेव परं ब्रह्म सच्चिदानन्दलक्षणम् ॥ ११ ॥ एवं
निदिध्यासवाक्यं स्तुतिः प्रियकरी तव । नामरूपाणि
न त्वत्तो भिन्नानीति मतिस्तु या ॥ १२ ॥ तव
पुष्पाञ्जलिः शम्भो सर्वत्रोत्कीर्णपुष्पकः । स्वप्रका-
शात्प्रबुद्धिस्तु महानीराजनं तव ॥ १३ ॥ प्राद-
क्षिण्यं सर्वतस्ते व्याप्तिबुद्धिः स्मृतं शिव । त्वमेवाह-
मिति स्थित्या लीनता प्रणतिस्तव ॥ १४ ॥
शुद्धसत्त्वस्याभिवृद्धिश्छत्रं तापापनोदनम् । रजस्त-
मस्तिरस्कारश्चामरान्दोलने तव ॥ १५ ॥ निजा-
नन्दपराघूर्णदोलनन्दोलने वस । धन्योहं कृतकृत्योऽ
हमिति गानं तव प्रियम् ॥ १६ ॥ निरंकुशमहा-
तृप्त्या नर्तनं ते मुदे शिव । नानाविधैः शब्द-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जालैर्जृम्भणं वाद्यमुत्तमम् ॥ १७ ॥ शब्दादि... बुद्धिस्तु कल्याणमिति डिण्डिमः । वेगवत्तरमह... सौ मनोऽश्वस्ते समर्पितः ॥ १८ ॥ अह... मत्तगजेन्द्रो भरिलक्षणः । तत्र देहाद्यना... दृढतरोऽङ्कुशः ॥ १९ ॥ अद्वैतबोधदुर्गोऽयं यत्र शत्रुर्न कश्चन । जनतारामविस्तारो रमस्वात्र यथासुखम् ॥ २० ॥ कल्पनासम्परित्यागो महाराज्यं समर्पये । भोक्तृत्वाध्यासराहित्यं वरं देहि सहस्रशः ॥ २१ ॥ अखण्डा तव पूजेयं सदा भवतु सर्वदा आत्मत्वात्तव मे सर्वपूजैवास्ति न चान्यथा ॥ २२ ॥ इमां पूजां प्रतिदिनं यः पठेद्यत्र कुत्रचित् । सद्यः शिवमयो भूत्वा मुक्तश्चरति भूतले ॥ २३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्कृष्णानन्दसरस्वतीविरचिता शिव—मानसपूजा समाप्ता ॥ ३ ॥

---

१३ शिवमानसपूजा (२)

श्रीगणेशाय नमः ॥ रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं नानारत्नविभूषितं मृग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मदामोदाङ्कितं चन्दनम् । जातीचम्पकबिल्वपत्र-
तजामयं बोधेन नि[illegible]पुष्पं च धूपं तथा दीपं देव दयानिधे पशु-
जनकं नवे[illegible]ल्पितं गृह्यताम् ॥ १ ॥ सौवर्णे मणिखण्ड-
[illegible]ते पात्रे घृतं पायसं भक्ष्यं पञ्चविधं पयो-
दधियुतं रम्भाफलं फाणितम् । शाकानामयुतं जलं
रुचिकरं कर्पूरखण्डोज्ज्वलं ताम्बूलं मनसा मया
विरचितं भक्त्या प्रभो स्वीकुरु ॥ २ ॥ छत्रं चामर-
योर्युगं व्यजनकं चादर्शकं निर्मलं वीणाभेरिमृदङ्ग-
काहलकलागीतं च नृत्यं तथा । साष्टाङ्गं प्रणतिः
स्तुतिर्बहुविधा ह्येतत्समस्तं मया सङ्कल्पेन समर्पितं
तव विभो पूजां गृहाण प्रभो ॥ ३ ॥ आत्मा त्वं
गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं पूजा ते
विषयोपभोगरचना निद्रा समाधिस्थितिः । सञ्चारः
पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो यद्य-
त्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥ ४ ॥
इत्येवं हरपूजने प्रतिदिनं यो वा त्रिसन्ध्यं पठेत्से-
वारलोकचतुष्टयं प्रतिदिनं पूजा हरेर्मानसी ।
सोऽयं सौख्यमवाप्नुयाद्द्युतिधरं साक्षाद्धरेर्दर्शनं
व्यासस्तेन महावसानसमये कैलासलोकं गतः
॥ ५ ॥ करचरणकृतं वाक्कायजं कर्मजं वा श्रवण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नयनजं वा मानसं वाऽपराधम् । विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शम्भो ॥ ६ ॥

इति शिवमानसपूजा समाप्ता ॥४॥

---

१४ शिवभुजङ्गप्रयातस्तोत्रम् ।

श्रीगणेशाय नमः ॥ गलद्दानगण्डं मिलद्भृङ्गखण्डं चलच्चारुशुण्डं जगत्त्राणशौण्डम् । लसद्दन्तकाण्डं विपद्भङ्गचण्डं शिवप्रेमपिण्डं भजे वक्रतुण्डम् ॥ १ ॥ अनाद्यन्तमाद्यं परं तत्त्वमर्थं चिदाकारमेकं तुरीयं त्वमेयं । हरिब्रह्ममृग्यं परब्रह्मरूपं मनोवागतीतं महः शैवमीडे ॥ २ ॥ स्वशक्त्यादिशक्त्यन्तसिंहासनस्थं मनोहारि सर्वाङ्गरत्नादिभूषम् । जटाहीन्दुगङ्गास्थिशरयकमौलिं परं शक्तिमित्रं नमः पञ्चवक्त्रम् ॥ ३ ॥ शिवेशानतत्पुरुषाघोरवामादिभिर्ब्रह्मभिर्हन्मुखैः षड्भिरङ्गैः । अनौपम्यषट्त्रिंशतं तत्त्वविद्यामतीतं परं त्वां कथं वेत्ति को वा ॥ ४ ॥ प्रवालप्रवाहप्रभाशोणमर्धं मरुत्वन्मणिश्रीमहःश्याममर्धम् । गुणस्यूतमेकं वपुश्चैक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्तः स्मरामि स्मरापत्तिसम्पत्तिहेतुम् ॥ ५ ॥ स्वसेवासमायातदेवासुरेन्द्रानमन्मौलिमन्दारमालाभिषिक्तम् ॥ नमस्यामि शम्भो पदाम्भोरुहं ते भवाम्भोधिपोतं भवानीविभाव्यम् ॥ ६ ॥ जगन्नाथ मन्नाथ गौरीश नाथ प्रपन्नानुकम्पिन्विपन्नार्तिहारिन् । महःस्तोममूर्ते समस्तैकबन्धो नमस्ते नमस्ते पुनस्ते नमोऽस्तु ॥ ७ ॥ महादेव देवेश देवाऽधिदेव स्मरारे पुरारे यमारे हरेति ब्रुवाणः । स्मरिष्यामि भक्त्या भवन्तं ततो मे दयाशील देव प्रसीद प्रसीद ॥ ८ ॥ विरूपाक्ष विश्वेश विद्यादिकेश त्रयीमूल शम्भो शिव त्र्यम्बक त्वम् । प्रसीद स्मर त्राहि पश्याव पुष्य क्षमस्वाप्नुहि त्र्यक्ष पाहि क्षिपामः ॥ ९ ॥ त्वदन्यः शरण्यः प्रपन्नस्य नेति प्रसीद स्मरन्नेव हन्यास्तु दैन्यम् । न चेत्ते भवेद्भक्तवात्सल्यहानिस्ततो मे दयालो दयां सन्निधेहि ॥ १० ॥ अयं दानकालस्त्वहं दानपात्रं भवान्नाथ दाता त्वदन्यं न याचे । भवद्भक्तिमेव स्थिरां देहि मह्यं कृपाशील शम्भो कृतार्थोऽस्मि तस्मात् ॥ ११ ॥ पशुं वेत्सि चेन्मां त्वमेवाधिरूढः कलङ्कीति वा मूर्ध्नि धत्से त्वमेव । द्विजिह्वः पुनः सोऽपि ते कण्ठभूषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वदङ्गीकृताः शर्व सर्वेऽपि धन्याः ॥ १२ ॥ न शक्नोमि कर्तुं परद्रोहलेशं कथं प्रीयसे त्वं न जाने गिरीश । तदा हि प्रसन्नोऽसि कस्यापि कान्तासुतद्रोहिणो वा पितृद्रोहिणो वा ॥ १३ ॥ स्तुतिं ध्यानमर्चां यथावद्विधातुं भजन्नप्यजानन् महेशावलम्बे । त्रसन्तं सुतं त्रातुमग्रे मृकण्डोर्यमप्राणनिर्वापणं त्वत्पदाब्जम् ॥ १४ ॥ अकण्ठे कलङ्कादनङ्गे भुजङ्गादपाणौ कपालादभालेऽनलाक्षात् ॥ अमौलौ शशाङ्कादवामे कलत्रादहं देवमन्यं न मन्ये न मन्ये ॥ १५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कराचार्यविरचितं श्रीशिवभुजङ्गप्रयातस्तोत्रं सम्पूर्णम् ॥५॥

---

१५ शिवपञ्चाक्षरस्तोत्रम् ।

श्रीगणेशाय नमः ॥ नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय । नित्याय शुद्धाय दिगम्बराय तस्मै नकाराय नमः शि० ॥ १ ॥ मन्दाकिनीसलिलचन्दनचर्चिताय नन्दीश्वरप्रथमनाथ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महेश्वराय । मन्दारपुष्पबहुपुष्पसुपूजिताय तस्मै मकाराय नमः शि० ॥ २ ॥ शिवाय गौरीवदनाब्जवृन्दसूर्याय दक्षाध्वरनाशकाय । श्रीनीलकण्ठाय वृषध्वजाय तस्मै शिकाराय नमः शिवाय ॥ ३ ॥ वसिष्ठकुम्भोद्भवगौतमार्यमुनीन्द्रदेवार्चितशेखराय । चन्द्रार्कवैश्वानरलोचनाय तस्मै वकाराय नमः शिवाय ॥ ४ ॥ यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय । दिव्याय देवाय दिगम्बराय तस्मै यकाराय नमः शिवाय ॥ ५ ॥ पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ । शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ६ ॥

इति श्रीमच्छङ्कराचार्यविरचितं शिव-
पञ्चाक्षरस्तोत्रं सम्पूर्णम् ॥ ६ ॥

---

१६ शिवषडक्षरस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ॐ कारं बिन्दु संयुक्तं नित्यं ध्यायन्ति योगिनः । कामदं मोक्षदं चैव ॐ काराय नमो नमः ॥ १ ॥ नमन्ति ऋषयो देवा नमन्त्यप्सरसां गणाः । नरा नमन्ति देवेशं नकाराय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमो नमः ॥ २ ॥ महादेवं महात्मानं महाध्यानं परायणम् । महापापहरं देवं मकाराय नमो नमः ॥ ३ ॥ शिवं शान्तं जगन्नाथं लोकानुग्रहकारकम् । शिवमेकपदं नित्यं शिकाराय नमो नमः ॥ ४ ॥ वाहनं वृषभो यस्य वासुकिः कण्ठभूषणम् । वामे शक्तिधरं देवं वकाराय नमो नमः ॥ ५ ॥ यत्र यत्र स्थितो देवः सर्वव्यापी महेश्वरः । यो गुरुः सर्व-देवानां यकाराय नमो नमः ॥ ६ ॥ षडक्षरमिदं स्तोत्रं यः पठेच्छिवसन्निधौ । शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ७ ॥

इति श्रीरुद्रयामले उमामहेश्वरसंवादे
शिवषडक्षरस्तोत्रं सम्पूर्णम् ॥ ७ ॥

---

१७ (उपमन्युकृतं) शिवस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जय शङ्कर पार्वतीपते मृड शम्भो शशिखण्डमण्डन । मदनान्तक भक्त-वत्सल प्रियकैलास दयासुधाम्बुधे ॥१॥ सदुपाय-कथास्वपण्डितो हृदये दुःखशरेण खण्डितः । शशि-खण्डशिखण्डमण्डनं शरणं यामि शरण्यमीश्वरम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥२॥ महतः परितः प्रसर्पतस्तमसो दर्शनभेदिनो भिदे। दिननाथ इव स्वतेजसा हृदयव्योम्नि मनागुदेहि नः ॥ ३ ॥ न वयं तव चर्मचक्षुषा पदवीमप्युपवीक्षितुं क्षमाः। कृपयाऽभयदेन चक्षुषा सकलेनेश विलोकयाशु नः ॥ ४ ॥ त्वदनुस्मृतिरेव पावनी स्तुतियुक्ता न हि वक्तुमीश सा। मधुरं हि पयः स्वभावतो ननु कीदृक्सितशर्करान्वितम् ॥५॥ सविषोऽप्यमृतायते भवाञ्छवमुण्डाभरणोऽपि पावनः। भव एव भवान्तकः सतां समदृष्टिर्विषमेक्षणोऽपि सन् ॥ ६ ॥ अपि शूलधरो निरामयो दृढवैराग्यरतोऽपि रागवान्। अपि भैक्ष्यचरो महेश्वरश्चरितं चित्रमिदं हि ते प्रभो ॥ ७ ॥ वितरत्यभिवाञ्छितं दृशा परिदृष्टः किल कल्पपादपः। हृदये स्मृत एव धीमते नमतेऽभीष्टफलप्रदो भवान् ॥ ८ ॥ सहसैव भुजङ्गपाशवान्विनिगृह्णाति न यावदन्तकः। अभयं कुरु तावदाशु मे गतजीवस्य पुनः किमौषधैः ॥ ९ ॥ सविषैरिव भीमपन्नगैर्विषयैरभिरलं परिक्षतम्। अमृतैरिव संभ्रमेण मामभिषिञ्चाशु दयावलोकनैः ॥ १० ॥ मुनयो बहवोऽद्य धन्यतां गमिताः स्वाभिमतार्थदर्शिनः। करुणाकर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येन तेन मामवसन्नं ननु पश्य चक्षुषा ॥ ११ ॥ प्रणमाम्यथ यामि चापरं शरणं कं कृपणाभयप्रदम्। विरहीव विभो प्रियामयं परिपश्यामि भवन्मयं जगत् ॥ १२ ॥ बहवो भवताऽनुकम्पिताः किमितीशान न माऽनुकम्पसे। दधता किमु मन्दराचलं परमाणुः कमठेन दुर्धरः ॥ १३ ॥ अशुचिं यदि माऽनुमन्यसे किमिदं मूर्ध्नि कपालदाम ते। उत शाठ्यमसाधुसङ्गिनं विषलक्ष्मासि न किं द्विजिह्वधृक् ॥ १४ ॥ क्व दृशं विदधामि किं करोम्यनुतिष्ठामि कथं भयाकुलः। क्व नु तिष्ठसि रक्ष रक्ष मामयि शम्भो शरणागतोऽस्मि ते ॥ १५ ॥ विलुठाम्यवनौ किमाकुलः किमुरो हन्मि शिरश्छिनद्मि वा। किमु रोदिमि रारटीमि किं कृपणं मां न न यदीक्षसे प्रभो ॥ १६ ॥ शिव सर्वग शर्व शर्मदं प्रणतो देव दयां कुरुष्व मे। नम ईश्वर नाथ दिक्पते पुनरेवेश नमो नमोऽस्तु ते ॥ १७ ॥ शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका। शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥ १८ ॥ उपमन्युकृतं स्तवोत्तमं जपतः शम्भुसमीपवर्तिनः। अभिवाञ्छितभाग्यसम्पदः परमायुः प्रददाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शङ्करः ॥ १६ ॥ उपमन्युकृतं स्तवोत्तमं प्रजपेद्यस्तु शिवस्य सन्निधौ । शिवलोकमवाप्य सोऽचिरात् सह तेनैव शिवेन मोदते ॥ २० ॥

इत्युपमन्युकृतं शिवस्तोत्रं सम्पूर्णम् ॥ ८ ॥

—:—:—

१८ शिवापराधक्षमापनस्तोत्रम् ।

श्रीगणेशाय नमः ॥ आदौ कर्मप्रसङ्गात्कलयति कलुषं मातृकुक्षौ स्थितं मां विण्मूत्रामेध्यमध्ये क्वथयति नितरां जाठरो जातवेदाः । यद्यद्वै तत्र दुःखं व्यथयति नितरां शक्यते केन वक्तुं क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥१॥ बाल्ये दुःखातिरेकान्मललुलितवपुः स्तन्यपाने पिपासा नो शक्तश्चेन्द्रियेभ्यो भवगुणजनिता जन्तवो मां तुदन्ति । नानारोगादिदुःखाद्रुदनपरवशः शङ्करं न स्मरामि क्षन्तव्यो० ॥ २ ॥ प्रौढोऽहं यौवनस्थो विषयविषधरैः पञ्चभिर्मर्मसन्धौ दष्टो नष्टो विवेकः सुतधनयुवतिस्वादुसौख्ये निषण्णः । शैवीचिन्ताविहीनं मम हृदयमहो मानगर्वाधिरूढं क्षन्तव्यो० ॥ ३ ॥ वार्धक्ये चेन्द्रियाणां विगतग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिमतिश्चाधिदैवाधितापैः पापै रोगैर्वियोगैस्त्वनवसितवपुः प्रौढिहीनं च दीनम् । मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं क्षन्तव्यो० ॥४॥ नो शक्यं स्मार्तकर्म प्रतिपदगहनप्रत्यवायाकुलाख्यं श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गेऽसुरारे । ज्ञातो धर्मो विचारैः श्रवणमननयोः किं निदिध्यासितव्यं क्षन्तव्यो० ॥ ५ ॥ स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गाङ्गतोयं पूजार्थं वा कदाचिद्बहुतरगहनात् खण्डबिल्वीदलानि । नानीता पद्ममाला सरसि विकसितागन्धपुष्पैस्त्वदर्थं क्षन्तव्यो० ॥ ६ ॥ दुग्धैर्मध्वाज्ययुक्तैर्दधिसितसहितैः स्नापितं नैव लिङ्गं नो लिप्तं चन्दनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः । धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव भक्ष्योपहारैः क्षन्तव्यो० ॥ ७ ॥ ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो हव्यं ते लक्षसंख्यैर्हुतवहवदने नार्पितं बीजमन्त्रैः । नो तप्तं गाङ्गतीरे व्रतजपनियमै रुद्रजाप्यैर्न वेदैः क्षन्तव्यो० ॥ ८ ॥ स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुण्डले सूक्ष्ममार्गे शान्ते स्वान्ते प्रलीने प्रकटितविभवे ज्योतिरूपे पराख्ये । लिङ्गज्ञे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मवाक्ये सकलतनुगतं शङ्करं न स्मरामि क्षन्तव्यो० ॥ ९ ॥ नग्नो निःसङ्गशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो नासाग्रे न्यस्तदृष्टिर्विदितभवगुणो नैव दृष्टः कदाचित्। उन्मन्याऽवस्थया त्वां विगतकलिमलं शङ्करं न स्मरामि क्षन्तव्यो० ॥१०॥ चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे मोक्षार्थं कुरु चित्तवृत्तिमखिलामन्यैस्तु किं कर्मभिः ॥ ११ ॥ किं वाऽनेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं किं वा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम्। ज्ञात्वैतत्क्षणभङ्गुरं सपदि रे त्याज्यं मनो दूरतः स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम् ॥ १२ ॥ आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं प्रत्यायान्ति गता पुनर्न दिवसाः कालो जगद्भक्षकः। लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवितं तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाऽधुना ॥ १३ ॥ करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽपराधम्। विहितमविहितं वा सर्वमेतत् क्षमस्व जय जय करुणाब्धे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमहादेव शम्भो ॥ १४ ॥

इति श्रीमच्छङ्कराचार्यवि० शिवापराधक्षमापनस्तोत्रम् ॥ ६ ॥

१६ शिवताण्डवस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरीविलोलवीचिवल्लरीविराजमानमूर्धनि । धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥ १ ॥ धराधरेन्द्रनन्दिनीविलासबन्धुबन्धुरस्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे । कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि क्वचिच्चिदम्बरे मनो विनोदमेतु वस्तुनि ॥ २ ॥ जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभाकदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे । मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥ ३ ॥ सहस्रलोचनप्रभृत्यशेषलेखशेखरप्रसूनधूलिधोरणीविधूसराङ्घ्रिपीठभूः । भुजङ्गराजमालया निबद्धजाटजूटकः श्रियै चिराय जायतां चकोरबन्धुशेखरः ॥४॥ ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभानिपीतपञ्चसा—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यकं नमन्निलिम्पनायकम् । सुधामयूखलेखया विराजमानशेखरं महाकपालिसम्पदे शिरो जटाल-मस्तु नः ॥ ५ ॥ करालभालपट्टिकाधगद्धगद्धगज्ज्वलद्धनञ्जयाधरीकृतप्रचण्डपञ्चसायके । धराधरेन्द्र-नन्दिनीकुचाग्रचित्रपत्रकप्रकल्पनैकशिल्पिनि त्रिलोचने मतिर्मम ॥ ६ ॥ नवीनमेघमण्डलीनिरुद्धदुर्धरस्फुरत्कुहूनिशीथिनीतमः प्रबन्धबन्धुकन्धरः । निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः कलानिधानबन्धुरः श्रियं जगद्धुरन्धरः ॥ ७ ॥ प्रफुल्लनील-पङ्कजप्रपञ्चकालिमच्छटाविडम्बिकण्ठकन्धरारुचि-प्रबन्धकन्धरम् । स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ॥ ८ ॥ अगर्वसर्वमङ्गलाकलाकदम्बमञ्जरी रसप्रवाहमाधुरीविजृम्भणामधुव्रतम् । स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥९॥ जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमस्फुरद्धगद्धगद्विनिर्गमत्करालभालहव्यवाट् । धिमिद्धिमिद्धिमिध्वनन्मृदङ्गतुङ्गमङ्गलध्वनिक्रमप्रवर्तितप्रचण्डताण्डवः शिवः ॥ १० ॥ दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजोर्गरिष्ठरत्नलोष्टयोः सुहृद्विपक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षयोः । तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः समं प्रवर्तयन्मनः कदा सदाशिवं भजे ॥ ११ ॥ कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्विमुक्तदुर्मतिः सदा शिरःस्थमञ्जलिं वहन् । विमुक्तलोललोचनो ललामभाललग्नकः शिवेति मन्त्रमुच्चरन् कदा सुखी भवाम्यहम् । १२ ॥ इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेति सन्ततम् । हरे गुरौ स भक्तिमाशु याति नान्यथा गतिं विमोहनं हि देहिनां तु शङ्करस्य चिन्तनम् ॥ ॥ १३ ॥ पूजावसानसमये दशवक्त्रगीतं यः शम्भुपूजनमिदं पठति प्रदोषे । तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां लक्ष्मीं सदैव सुमुखीं प्रददाति शम्भुः ॥ १४ ॥

इति श्रीरावणविरचितं शिवताण्डवस्तोत्रं सम्पूर्णम् ॥ १० ॥

---

२० शिवरक्षास्तोत्रम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीशिवरक्षास्तोत्रमन्त्रस्य याज्ञवल्क्य ऋषिः । श्रीसदाशिवो देवता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुष्टुप्छन्दः। श्रीसदाशिवप्रीत्यर्थं शिवरक्षास्तोत्र-
जपे विनियोगः। चरितं देवदेवस्य महादेवस्य
पावनम्। अपारं परमोदारं चतुर्वर्गस्य साधनम्
॥ १ ॥ गौरीविनायकोपेतं पञ्चवक्त्रं त्रिनेत्रकम्।
शिवं ध्यात्वा दशभुजं शिवरक्षां पठेन्नरः॥ २ ॥
गङ्गाधरः शिरः पातु भालमर्धेन्दुशेखरः। नयने
मदनध्वंसी कर्णौ सर्पविभूषणः॥ ३ ॥ घ्राणं पातु
पुरारातिर्मुखं पातु जगत्पतिः। जिह्वां वागीश्वरः
पातु कन्धरां शितिकन्धरः॥ ४ ॥ श्रीकण्ठः पातु मे
कण्ठं स्कन्धौ विश्वधुरन्धरः भुजौ भूभारसंहर्ता करौ
पातु पिनाकधृक्॥ ५ ॥ हृदयं शङ्करः पातु जठरं
गिरजापतिः। नाभिं मृत्युञ्जयः पातु कटी व्याघ्रा-
जिनाम्बरः॥ ६ ॥ सक्थिनी पातु दीनार्तशरणा-
गतवत्सलः। ऊरू महेश्वरः पातु जानुनी जगदीश्वरः
॥ ७ ॥ जङ्घे पातु जगत्कर्त्ता गुल्फौ पातु गणा-
धिपः। चरणौ करुणासिन्धुः सर्वाङ्गानि सदाशिवः
॥ ८ ॥ एतां शिवबलोपेतां रक्षां यः सुकृती पठेत्॥
स भुक्त्वा सकलान्कामान् शिवसायुज्यमाप्नुयात्
॥ ९ ॥ ग्रहभूतपिशाचाद्यास्त्रैलोक्ये विचरन्ति ये॥
दूरादाशु पलायन्ते शिवनामाभिरक्षणात्॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभयङ्करनामेदं कवचं पार्वतीपतेः ॥ भक्त्या बिभर्ति यः कण्ठे तस्य वश्यं जगत्त्रयम् ॥ ११ ॥ इमां नारायणः स्वप्ने शिवरक्षां यथाऽऽदिशत् ॥ प्रातरुत्थाय योगीन्द्रो याज्ञवल्क्यस्तथाऽलिखत् ॥ १२ ॥

इति श्रीयाज्ञवल्क्यप्रोक्तं शिवरक्षास्तोत्रं सम्पूर्णम् ॥ ११ ॥

---

२१ अभिलाषाष्टकस्तोत्रम्

श्रीगणेशाय नमः ॥ विश्वानर उवाच ॥ एकं ब्रह्मैवाद्वितीयं समस्तं सत्यं सत्यं नेह नानास्ति किञ्चित ॥ एको देवो न द्वितीयोऽवतस्थे तस्मादेकं त्वां प्रपद्ये महेशम् ॥ १ ॥ एकः कर्त्ता त्वं हि सर्वस्य शम्भो नानारूपोऽप्येकरूपोऽप्यरूपः ॥ यद्वत्प्रत्यग्स्वर्क एकोऽप्यनेकस्तस्मान्नान्यं त्वां विनेशं प्रपद्ये ॥ २ ॥ रज्जौ सर्पः शुक्तिकायां च रूप्यं नैरः पूरस्तन्मृगाख्ये मरीचौ ॥ यद्वत्तद्वद्विष्वगेष प्रपञ्चो यस्मिञ्ज्ञाते तं प्रपद्ये महेशम् ॥ ३ ॥ तोये शैत्यं दाहकत्वञ्च वह्नौ तापो भानौ शीतभानौ प्रसादः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुष्पे गन्धो दुग्धमध्ये च सर्पिर्यत्तच्छम्भो त्वं तत-
स्त्वां प्रपद्ये ॥ ४ ॥ शब्दं गृह्णास्यश्रवास्त्वं हि जिघ्र-
स्यघ्राणस्त्वं व्यङ्घ्रिरायासि दूरात् ॥ व्यक्षः पश्येस्त्वं
रसज्ञोऽप्यजिह्वः कस्त्वां सम्यग्वेत्त्यतस्त्वां प्रपद्ये
॥ ५ ॥ नो वेदस्त्वामीश साक्षाद्धि वेद नो वा वि-
ष्णुर्नो विधाताऽखिलस्य ॥ नो योगीन्द्रा नेन्द्र-
मुख्याश्च देवा भक्तो वेद त्वामतस्त्वां प्रपद्ये ॥ ६ ॥
नो ते गोत्रं नापि जन्मापि नाऽऽख्या नो वा रूपं
नैव शीलं न देशः ॥ इत्थम्भूतोऽपीश्वरस्त्वं
त्रिलोक्याः सर्वान्कामान्पूरयेस्तद्भजे त्वाम् ॥ ७ ॥
त्वत्तः सर्वं त्वं हि सर्वं स्मरारे त्वं गौरीशस्त्वं च
नग्नोऽतिशान्तः ॥ त्वं वै वृद्धस्त्वं युवा त्वं च बाल-
स्तत्किं यत्त्वं नास्यतस्त्वां नतोऽस्ति ॥ ८ ॥ स्तुत्वेति
भूमौ निपपात विप्रः स दण्डवद्यावदतीव हृष्टः ॥
तावत्स बालोऽखिलवृद्धवृद्धः प्रोवाच भूदेव वरं
वृणीहि ॥ ९ ॥ तत उत्थाय हृष्टात्मा मुनिर्विश्वानरः
कृती ॥ प्रत्यब्रवीत्किमज्ञातं सर्वज्ञस्य तव प्रभो ॥१०॥
सर्वान्तरात्मा भगवान्सर्वः सर्वप्रदो भवान् ॥
याञ्चां प्रति नियुङ्क्ते मां किमीशो दैन्यकारि-
णीम ॥ ११ ॥ इति श्रुत्वा वचस्तस्य देवो विश्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नरस्य ह ॥ शुचेः शुचिव्रतस्याथ शुचि स्मित्वाऽब्रवीच्छुचिः ॥ १२ ॥ बाल उवाच ॥ त्वया शुचेः (च) शुचिष्मत्यां योऽभिलाषः कृतो हृदि ॥ अचिरेणैव कालेन स भविष्यत्यसंशयम् ॥ १३ ॥ तव पुत्रत्वमेष्यामि शुचिष्मत्यां महामते ॥ ख्यातो गृहपतिर्नाम्ना शुचिः सर्वामरप्रिय ॥ १४ ॥ अभिलाषाष्टकं पुण्यं स्तोत्रमेतत्त्वयेरितम् ॥ अब्दं त्रिकालपठनात्कामदं शिवसन्निधौ ॥ १५ ॥ एतत्स्तोत्रस्य पठनं पुत्रपौत्रधनप्रदम् ॥ सर्वशान्तिकरं वाऽपि सर्वापत्परिनाशनम् ॥ १६ ॥ स्वर्गापवर्गसम्पत्तिकारकं नात्र संशयः ॥ प्रातरुत्थाय सुस्नातो लिङ्गमभ्यर्च्य शाम्भवम् ॥ १७ ॥ वर्षं जपन्निदं स्तोत्रमपुत्रः पुत्रवान् भवेत् ॥ वैशाखे कार्तिके माघे विशेषनियमैर्युतः ॥ १८ ॥ यः पठेत्स्नानसमये लभते सकलं फलम् ॥ कार्तिकस्य तु मासस्य प्रसादादहमव्ययः ॥ १९ ॥ तव पुत्रत्वमेष्यामि यस्त्वन्यस्तत्पठिष्यति ॥ अभिलाषाष्टकमिदं न देयं यस्य कस्यचित् ॥ २० ॥ गोपनीयं प्रयत्नेन महावन्ध्याप्रसूतिकृत् ॥ स्त्रिया वा पुरुषेणापि नियमाल्लिङ्गसन्निधौ ॥ २१ ॥ अब्दं जप्तमिदं स्तोत्रं पुत्रदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नात्र संशयः ॥ इत्युक्त्वाऽन्तदधे बालः सोऽपि विप्रो गृहं गतः ॥ २२ ॥

इति श्रीस्कन्दपुराणे काशीखण्डे अभिलाषाष्टकस्तोत्रं समाप्तम् ॥ १२ ॥

---

२२ वेदसारशिवस्तवः ।

श्रीगणेशाय नमः ॥ पशूनां पतिं पापनाशं परेशं गजेन्द्रस्य कृत्तिं वसानं वरेण्यम् । जटाजूटमध्ये स्फुरद्गाङ्गवारिं महादेवमेकं स्मरामि स्मरारिम् ॥ १ ॥ महेशं सुरेशं सुरारातिनाशं विभुं विश्वनाथं विभूत्यङ्गभूषम् । विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं सदानन्दमीडे प्रभुं पञ्चवक्त्रम् ॥ २ ॥ गिरीशं गणेशं गले नीलवर्णं गवेन्द्राधिरूढं गणातीतरूपम् । भवं भास्वरं भस्मना भूषिताङ्गं भवानीकलत्रं भजे पञ्चवक्त्रम् ॥ ३ ॥ शिवाकान्त शम्भो शशाङ्कार्धमौले महेशान शूलिन् जटाजूटधारिन् । त्वमेको जगद्व्यापको विश्वरूप प्रसीद प्रसीद प्रभो पूर्णरूप ॥ ४ ॥ परमात्मानमेकं जगद्बीजमाद्यं निरीहं निराकारमोङ्कारवेद्यम् । यतो जायते पाल्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येन विश्वं तमीशं भजे लीयते यत्र विश्वम् ॥ ५ ॥ न भूमिर्न चापो न वह्निर्न वायुर्न चाकाशमास्ते न तन्द्रा न निद्रा । न ग्रीष्मो न शीतं न देशो न वेषो न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे ॥ ६ ॥ अजं शाश्वतं कारणं कारणानां शिवं केवलं भासकं भासकानाम् । तुरीयं तमःपारमाद्यन्तहीनं प्रपद्ये परं पावनं द्वैतहीनम् ॥ ७ ॥ नमस्ते नमस्ते विभो विश्वमूर्ते नमस्ते नमस्ते चिदानन्दमूर्ते । नमस्ते नमस्ते तपोयोगगम्य नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥ ८ ॥ प्रभो शूलपाणे विभो विश्वनाथ महादेव शम्भो महेश त्रिनेत्र । शिवाकान्त शान्त स्मरारे पुरारे त्वदन्यो वरेण्यो न मान्यो न गण्यः ॥ ९ ॥ शम्भो महेश करुणामय शूलपाणे गौरीपते पशुपते पशुपाशनाशिन् । काशीपते करुणया जगदेतदेकस्त्वं हंसि पासि विदधासि महेश्वरोऽसि ॥१०॥ त्वत्तो जगद्भवति देव भव स्मरारे त्वय्येव तिष्ठति जगन्मृड विश्वनाथ । त्वय्येव गच्छति लयं जगदेतदीश लिङ्गात्मकं हर चराचरविश्वरूपिन ॥११॥

इति श्रीमच्छङ्कराचार्यविरचितं वेदसारशिवस्तोत्रं सम्पूर्णम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२३ पशुपत्यष्टकम् ।

श्रीगणेशाय नमः ॥ पशुपतीन्दुपतिं धरणीपतिं भुजगलोकपतिं च सतीपतिम् ॥ प्रणतभक्तजनार्तिहरं परं भजत रे मनुजा गिरिजापतिम् ॥ १ ॥ न जनको जननी न च सोदरो न तनयो न च भूरिबलं कुलम् ॥ अवति कोऽपि न कालवशं गतं भजत रे मनुजा गिरिजापतिम् ॥ २ ॥ मुरजडिण्डिमवाद्यविलक्षणं मधुरपञ्चमनादविशारदम् ॥ प्रमथभूतगणैरपि सेवितं भजत रे० ॥ ३ ॥ शरणदं सुखदं शरणान्वितं शिव शिवेति शिवेति नतं नृणाम् ॥ अभयदं करुणावरुणालयं भजत रे० ॥ ४ ॥ नरशिरोरचितं मणिकुण्डलं भुजगहारमुदं वृषभध्वजम् ॥ चितिरजोधवलीकृतविग्रहं भजत रे० ॥ ५ ॥ मखविनाशकरं शशिशेखरं सततमध्वरभाजिफलप्रदम् ॥ प्रलयदग्धसुरासुरमानवं भजत रे० ॥ ६ ॥ मदमपास्य चिरं हृदि संस्थितं मरणजन्मजराभयपीडितम् ॥ जगदुदीक्ष्य समीपभयाकुलं भजत रे० ॥ ७ ॥ हरिविरिञ्चिसुराधिपपूजितं यमजनेशधनेशनमस्कृतम् ॥ त्रिनयनं भुवनत्रितयाधिपं भजत रे० ॥ ८ ॥ पशुपतेरिदमष्टकमद्भुतं विरचितं पृथिवी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पतिसूरिणा ॥ पठति संशृणुते मनुजः सदा शिवपुरीं वसते लभते मुदम् ॥ ९ ॥

इति श्रीपशुपत्यष्टकं सम्पूर्णम् ॥ १४ ॥

---

२४ लिङ्गाष्टकम्।

श्रीगणेशाय नमः। ब्रह्ममुरारिसुरार्चितलिङ्गं निर्मलभाषितशोभितलिङ्गम्। जन्मजदुःखविनाशकलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ॥ १ ॥ देहमुनिप्रवरार्चितलिङ्गं कामदहं करुणाकरलिङ्गम्। रावणदर्पविनाशनलिङ्गं तत्प्रण० ॥ २ ॥ सर्वसुगन्धिसुलेपितलिङ्गं बुद्धिविवर्धनकारणलिङ्गम्। सिद्धसुरासुरवन्दितलिङ्गं तत्प्र० ॥ ३ ॥ कनकमहामणिभूषितलिङ्गं फणिपतिवेष्टितशोभितलिङ्गम्। दक्षसुयज्ञविनाशन लिङ्गं तत्प्र० ॥ ४ ॥ कुङ्कुमचन्दनलेपितलिङ्गं पङ्कजहारसुशोभितलिङ्गम्। सञ्चितपापविनाशनलिङ्गं तत्प्र० ॥ ५ ॥ देवगणार्चितसेवितलिङ्गं भावैर्भक्तिभिरेव च लिङ्गम्। दिनकरकोटिप्रभाकरलिङ्गं तत्प्र० ॥ ६ ॥ अष्टदलोपरिवेष्टितलिङ्गं सर्वसमु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्भवकारणलिङ्गम्। अष्टदरिद्रविनाशितलिङ्गं तत्प्र० ॥ ७॥ सुरगुरुसुरवरपूजितलिङ्गं सुरवनपुष्पसदार्चितलिङ्गम्। परात्परं परमात्मकलिङ्गं तत्प्रणमामि० ॥ ८ ॥ लिङ्गाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ। शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ९ ॥

इति श्रीलिङ्गाष्टकस्तोत्रं सम्पूर्णम् ॥ १५ ॥

---

२५ महादेवाष्टकम्।

श्रीगणेशाय नमः। शिवं शान्तं शुद्धं प्रकटमकलङ्कं श्रुतिनुतं महेशानं शम्भुं सकलसुरसंसेव्यचरणम्। गिरीशं गौरीशं भवभयहरं निष्कलमजं महादेवं वन्दे प्रणतजनतापोपशमनम्॥ १ ॥ सदा सेव्यं भक्तैर्हृदि हृदि वसन्तं गिरिशयमुमाकान्तं क्षान्तं करधृतपिनाकं भ्रमहरम्। त्रिनेत्रं पञ्चास्यं दशभुजमनन्तं शशिधरं महादेवं० ॥ २ ॥ चिताभस्मालिप्तं भुजगमुकुटं विश्वसुखदं धनाध्यक्षस्याङ्गं त्रिपुरवधकर्त्तारमनघम्। करोटीखट्वाङ्गे ह्युरसि च दधानं मृतिहरं महादेवं० ॥ ३ ॥ सदोत्साहं गङ्गाधरमचलमानन्दकरणं पुरारातिं भान्तं रतिपतिहरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीप्तवदनम । जटाजूटैर्जुष्टं रसमुखगणेशानपितरं महादेवं ॥ ४ ॥ वसन्तं कैलासे सुरमुनिसभायां हि नितरां ब्रुवाणं सद्धर्मं निखिलमनुजानन्दजनकम् । महेशानं साक्षात्सनकमुनिदेवर्षिसहितं महा-देवं० ॥ ५ ॥ शिवां स्वे वामाङ्के गुहगणपती दक्षिणभुजे गले कालं व्यालं जलधिगरलं कण्ठ-विवरे । ललाटे श्वेतेन्दुं जगदपि दधानं च जठरे महादेवं० ॥ ६ ॥ सुराणां दैत्यानां बहुलमनुजानां बहुविधं तपः कुर्वाणानां झटिति फलदातारमखिलम् । सुरेशं विद्येशं जलनिधिसुताकान्तहृदयं महादेवं० ॥ ७ ॥ वसानं वैयाघ्रीं मृदुललितां कृत्तिमजरां वृ-षारूढं सृष्ट्यादिषु कमलजाद्यात्मवपुषम् । अतर्क्य निर्मायं तदपि फलदं भक्तसुखदं महादेवं० ॥ ८ ॥ इदं स्तोत्रं शम्भोर्दुरितदलनं धान्यधनदं हृदि ध्या-त्वा शम्भुं तदनु रघुनाथेन रचितम् । नरः सायं प्रातः पठति नियतं तस्य विपदः क्षयं यान्ति स्वर्गं व्रजति सहसा सोऽपि मुदितः ॥ ९ ॥

इति श्रीपण्डितरघुनाथशर्मणा विरचितं महा-देवाष्टकं समाप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२६ बिल्वाष्टकम्[१] ।

श्रीगणेशाय नमः ॥ त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुधम् । त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम् ॥ १ ॥ त्रिशाखैर्बिल्वपत्रैश्च ह्यच्छिद्रैः कोमलैः शुभैः ॥ शिवपूजां करिष्यामि ह्येकबिल्वं० ॥ २ ॥ अखण्डबिल्वपत्रेण पूजिते नन्दिकेश्वरे ॥ शुद्ध्यन्ति सर्वपापेभ्यो ह्येकबिल्वं शिवार्पणम् ॥ ३ ॥ शालग्रामशिलामेकां विप्राणां जातु अर्पयेत् ॥ सोमयज्ञमहापुण्य-(दान)-मेकबिल्वं० ॥ ४ ॥ दन्तिकोटिसहस्राणि वाजपेयशतानि च ॥ कोटिकन्यामहादानमेकबिल्वं शिवार्पणम् ॥ ५ ॥ लक्ष्म्याः स्तनत उत्पन्नं महादेवस्य च प्रियम् ॥ बिल्ववृक्षं प्रयच्छामि ह्येकबिल्वं० ॥ ६ ॥ दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम् ॥ अघोरपापसंहारमेकबिल्वं० ॥ ७ ॥ मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ॥ अग्रतः शिवरूपाय ह्येकबिल्वं शिवार्पणम् ॥ ८ ॥ बिल्वाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ ॥ सर्व-

---

१ इदं खल्वशुद्धबहुलमप्यष्टकं प्राकृतजनमनोहारित्वादत्र निवेशितं तज्ज्ञैरप्यस्माभिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पापविनिर्मुक्तः शिवलोकमवाप्नुयात् ॥ ६ ॥

इति श्रीबिल्वाष्टकं सम्पूर्णम् ॥ १७ ॥

---

२७ वैद्यनाथाष्टकम् ।

श्रीगणेशाय नमः । श्रीवैद्यनाथ तव दर्शन-तश्चिरस्य कालीनपीनभवसन्ततिदुःखजालम् । नालं फलाय किमुतहिकदुःखदावो दग्धुं प्रभुर्भवति भूतप भौतिकानि ॥ १ ॥ वामे श्रीबटुकेश्वरेण परके काल्याः समक्षे तथा श्रीगौर्या प्रियया विपक्षहरणे स्वत्राणविख्यातया । गायत्र्या च दिवाकरेण सद-सत्संसूचिभिः खेचरैर्विघ्नेशेन समावृतं हरिनुतं श्रीवैद्यनाथं भजे ॥ २ ॥ सर्वलोकभयभारहारिणे स्वीयमङ्गलकलापकारिणे । रावणेश्वरसमाह्वयाय ते वैद्यनाथविभवे नमो नमः ॥ ३ ॥ नाथ त्वत्पद-पद्मदर्शनविधौ प्रोल्लासि सच्चेतसः किं नामास्ति नरस्य दुर्लभमिह श्रीह्रीमनीषाभुवः ॥ किन्तु प्रोद्य-तमन्दचन्द्रधवलत्विड्वृन्दमन्दीकृतौ दक्षां पादन-खद्युतिं कथमुते साक्षात्कृतिं वीक्षताम् ॥ ४ ॥

कल्लोलान्यरुद्धलल्लदद्धललगोल्लोलालिमालाद्‍यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नौस्थस्यास्य न चापि कण्टककटाटोपाटवीपद्धतेः । ना शार्दूलकरीन्द्रकेसरिघटापाटच्चरव्राततः सर्वाप-द्विनिवारकस्य तव पद्द्वन्द्वं दिदृक्षोः प्रभो ॥ ५ ॥ दशाननसमुल्लसत्स्वभुजमण्डलीमण्डनप्रचण्डकृति-ताण्डवाप्रसरदुत्तमाण्डम्बरे ॥ हरे प्रभुवरे हरि-प्रियविलाससंलासिते स्वचेतसि धृतेन कं कमिह काममासादयेत् ॥ ६ ॥ अगम्यो देवानामवहित-धियां चापि सुधियां स्वभक्तत्राणाय प्रकटितनुः सर्वसुलभः ॥ समन्तादुत्तालोत्कटविकटवृक्षालिरु-चिरे हरिद्रे पीठेऽस्मिन् विलसति रहो रावणपतिः ॥७॥ प्रपञ्चय ब्रह्माण्डं निजमहिमनिःस्वैककलया लयान्तं सम्पुष्णन्प्रथयति मतिं स्वस्वगतिकाम् ॥ गणेशेन्द्रोपेन्द्रस्तुतसुयससे पूर्णमहसे नमस्तस्मै कस्मैचिदमितमहिम्ने पुरविधे ॥ ८ ॥

इति श्रीगणेशप्रसादविरचितं वैद्यनाथाष्टकं

सम्पूर्णम् ॥ १८ ॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२८ शिवाष्टकम् ।

श्रीगणेशाय नमः ॥ प्रभुं प्राणनाथं विभुं विश्वनाथं जगन्नाथनाथं सदानन्दभाजाम् ॥ भवद्भव्यभूतेश्वरं भूतनाथं शिवं शङ्करं शम्भुमीशानमीडे ॥ १ ॥ गले रुण्डमालं तनौ सर्पजालं महाकालकालं गणेशाधिपालम् ॥ जटाजूटभङ्गोत्तरङ्गैर्विशालं शिवं० ॥२॥ मुदामाकरं मण्डनं मण्डयन्तं महामण्डलं भस्मभूषाधरं तम् ॥ अनादिं ह्यपारं महामोहमारं शिवं० ॥ ३ ॥ तटाधो निवासं महाट्टाट्टहासं महापापनाशं सदा सुप्रकाशम् ॥ गिरीशं गणेशं महेशं सुरेशं शिवं० ॥४॥ गिरीन्द्रात्मजासंग्रहीतार्धदेहं गिरौ संस्थितं सर्वदासन्नगेहम् ॥ परब्रह्मब्रह्मादिभिर्वन्द्यमानं शिवं० ॥ ५ ॥ कपालं त्रिशूलं कराभ्यां दधानं पदाम्भोजनम्राय कामं ददानम् ॥ बलीवर्दयानं सुराणां प्रधानं शिवं० ॥ ६ ॥ शरच्चन्द्रगात्रं गुणानन्दपात्रं त्रिनेत्रं पवित्रं धनेशस्य मित्रम् ॥ अपर्णाकलत्रं चरित्रं विचित्रं शिवं० ॥ ७ ॥ हरं सर्पहारं चिताभूविहारं भवं वेदसारं सदा निर्विकारम् ॥ श्मशाने वदन्तं मनोजं दहन्तं शिवं० ॥८॥ स्तवं यः प्रभाते नरः शूलपाणेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पठेत्सर्वदा भर्गभावानुरक्तः ॥ स पुत्रं धनं धान्यमित्रं कलत्रं विचित्रं समासाद्य मोक्षं प्रयाति ॥९॥

इति श्रीशिवाष्टकं सम्पूर्णम् ॥ १९ ॥

२९ विश्वनाथाष्टकम् ।

श्रीगणेशाय नमः ॥ गङ्गातरङ्गरमणीयजटाकलापं गौरीनिरन्तरविभूषितवामभागम् ॥ नारायण प्रियमनङ्गमदापहारं वाराणसीपुरपतिं भज विश्वनाथम् ॥ १ ॥ वाचामगोचरमनेकगुणस्वरूपं वागीशविष्णुसुरसेवितपादपीठम् ॥ वामेन विग्रहवरेण कलत्रवन्तं वारा० ॥ २ ॥ भूताधिपं भुजगभूषणभूषिताङ्गं व्याघ्राजिनाम्बरधरं जटिलं त्रिनेत्रम् । पाशाङ्कुशाभयवरप्रदशूलपाणिं वाराणसीपुरपतिं भज० ॥ ३ ॥ शीतांशुशोभितकिरीटविराजमानं भालेक्षणानलविशोषितपञ्चबाणम् ॥ नागाधिपारचितभासुरकर्णपूरं वाराणसी० ॥ ४ ॥ पञ्चाननं दुरितमत्तमतङ्गजानां नागान्तकं दनुजपुङ्गवपन्नगानाम् ॥ दावानलं मरणशोकजराटवीनां वाराणसीपुर० ॥ ५ ॥ तेजोमयं सगुण निर्गुणमद्वितीयमानन्दकन्दमपराजितमप्रमेयम् ॥ नागात्मकं सकल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निष्फलमात्मरूपं वाराणसी० ॥ ६ ॥ आशां विहाय परिहृत्य परस्य निन्दां पापे रतिं च सुनिवार्य मनः समाधौ ॥ आदाय हृत्कमलमध्यगतं परेशं वाराणसीपुर० ॥ ७ ॥ रोगादिदोषरहितं स्वजनानुरागवैराग्यशान्तिनिलयं गिरिजासहायम् ॥ माधुर्यधैर्यसुभगं गरलाभिरामं वारा० ॥८॥ वाराणसीपुरपतेः स्तवनं शिवस्य व्याख्यातमष्टकमिदं पठते मनुष्यः ॥ विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं सम्प्राप्य देहविलये लभते च मोक्षम ॥ ९ ॥ विश्वनाथाष्टकमिदं यः पठेच्छिवसन्निधौ ॥ शिवलोकमवाप्नोति शिवेन सह मोदते ॥ १० ॥

इति श्रीव्यासकृतं विश्वनाथाष्टकं सम्पूर्णम् ॥ २० ॥

---

३० शिवनामावल्यष्टकम् ।

श्रीगणेशाय नमः ॥ हे चन्द्रचूड मदनान्तक शूलपाणे स्थाणो गिरीश गिरिजेश महेश शम्भो ॥ भूतेश भीतभयसूदन मामनाथं संसारदुःखगहनाज्जगदीश रक्ष ॥ १ ॥ हे पार्वतीहृदयवल्लभ चन्द्रमौले भूताधिप प्रमथनाथ गिरीशजाप ॥ हे वामदेव भव रुद्र पिनाकपाणे संसारदुःख० ॥ २ ॥ हे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीलकण्ठ वृषभध्वज पञ्चवक्त्र लोकेश शेषवलय प्रमथेश शर्व ॥ हे धूर्जटे पशुपते गिरिजापते मां संसार० ॥ ३ ॥ हे विश्वनाथ शिव शङ्कर देवदेव गङ्गाधर प्रमथनायक नन्दिकेश ॥ बाणेश्वरान्धकरिपो हर लोकनाथ संसार० ॥ ४ ॥ वाराणसीपुरपते मणिकर्णिकेश वीरेश दक्षमखकाल विभो गणेश ॥ सर्वज्ञ सर्वहृदयैकनिवास नाथ संसार० ॥ ५ ॥ श्रीमन्महेश्वर कृपामय हे दयालो हे व्योमकेश शितिकण्ठ गणाधिनाथ । भस्माङ्गराग नृकपाल कलापमाल संसारदुःख० ॥ ६ ॥ कैलासशैलविनिवास वृषाकपे हे मृत्युञ्जय त्रिनयन त्रिजगन्निवास ॥ नारायणप्रिय मदापह शक्तिनाथ संसार० ॥ ७ ॥ विश्वेश विश्वभवनाशित विश्वरूप विश्वात्मक त्रिभुवनैकगुणाभिवेश ॥ हे विश्वबन्धुकरुणामय दीनबन्धो संसार० ॥ ८ ॥ गौरीविलासभुवनाय महेश्वराय पञ्चाननाय शरणागतकल्पकाय ॥ शर्वाय सर्वजगतामधिपाय तस्मै दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ९ ॥

इति श्रीमच्छङ्कराचार्यविरचितं शिवनामावल्यष्टकं सम्पूर्णम् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३१ प्रदोषस्तोत्राष्टकम् ।

श्रीगणेशाय नमः ॥ सत्यं ब्रवीमि परलोकहितं ब्रवीमि सारं ब्रवीम्युपनिषद्धृदयं ब्रवीमि ॥ संसारमुल्बणमसारमवाप्य जन्तोः सारोऽयमीश्वरपदाम्बुरुहस्य सेवा ॥ १ ॥ ये नार्चयन्ति गिरिशं समये प्रदोषे ये नार्चितं शिवमपि प्रणमन्ति चान्ये ॥ एतत्कथां श्रुतिपुटैर्न पिबन्ति मूढास्ते जन्म-जन्मसु भवन्ति नरा दरिद्राः ॥ २ ॥ ये वै प्रदोषसमये परमेश्वरस्य कुर्वन्त्यनन्यमनसोंऽघ्रिसरोजपूजाम् ॥ नित्यं प्रवृद्धधनधान्यकलत्रपुत्रसौभाग्यसम्पदधिकास्त इहैव लोके ॥ ३ ॥ कैलासशैलभुवने त्रिजगज्जनित्रीं गौरीं निवेश्य कनकाचितरत्नपीठे ॥ नृत्यं विधातुमभिवाञ्छति शूलपाणौ देवाः प्रदोषसमये नु भजन्ति सर्वे ॥ ४ ॥ वाग्देवी धृतवल्लकी शतमखो वेणुं दधत्पद्मजस्तालोन्निद्राकरो रमा भगवती गेयप्रयोगान्विता ॥ विष्णुः सान्द्रमृदङ्गवादनपटुर्देवाः समन्तात्स्थिताः सेवन्ते तमनु प्रदोषसमये देवं मृडानीपतिम् ॥५॥ गन्धर्वयक्षपतगोरगसिद्धसाध्यविद्याधरामरवराप्सरसां गणाश्च ॥ येऽन्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीलकण्ठ वृषभध्वज पञ्चवक्त्र लोकेश शेषवलय प्रमथेश शर्व ॥ हे धूर्जटे पशुपते गिरिजापते मां संसार० ॥ ३ ॥ हे विश्वनाथ शिव शङ्कर देवदेव गङ्गाधर प्रमथनायक नन्दिकेश ॥ बाणेश्वरान्धकरिपो हर लोकनाथ संसार० ॥ ४ ॥ वाराणसीपुरपते मणिकर्णिकेश वीरेश दक्षमखकाल विभो गणेश ॥ सर्वज्ञ सर्वहृदयैकनिवास नाथ संसार० ॥ ५ ॥ श्रीमन्महेश्वर कृपामय हे दयालो हे व्योमकेश शितिकण्ठ गणाधिनाथ । भस्माङ्गराग नृकपाल कलापमाल संसारदुःख० ॥ ६ ॥ कैलासशैलविनिवास वृषाकपे हे मृत्युञ्जय त्रिनयन त्रिजगन्निवास ॥ नारायणप्रिय मदापह शक्तिनाथ संसार० ॥ ७ ॥ विश्वेश विश्वभवनाशित विश्वरूप विश्वात्मक त्रिभुवनैकगुणाभिवेश ॥ हे विश्वबन्धुकरुणामय दीनबन्धो संसार० ॥ ८ ॥ गौरीविलासभुवनाय महेश्वराय पञ्चाननाय शरणागतकल्पकाय ॥ शर्वाय सर्वजगतामधिपाय तस्मै दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ९ ॥

इति श्रीमच्छङ्कराचार्यविरचितं शिवनामावल्यष्टकं सम्पूर्णम् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३१ प्रदोषस्तोत्राष्टकम् ।

श्रीगणेशाय नमः ॥ सत्यं ब्रवीमि परलोकहितं ब्रवीमि सारं ब्रवीम्युपनिषद्धृदयं ब्रवीमि ॥ संसारमुल्बणमसारमवाप्य जन्तोः सारोऽयमीश्वरपदाम्बुरुहस्य सेवा ॥ १ ॥ ये नार्चयन्ति गिरिशं समये प्रदोषे ये नार्चितं शिवमपि प्रणमन्ति चान्ये ॥ एतत्कथां श्रुतिपुटैर्न पिबन्ति मूढास्ते जन्म-जन्मसु भवन्ति नरा दरिद्राः ॥ २ ॥ ये वै प्रदोषसमये परमेश्वरस्य कुर्वन्त्यनन्यमनसोऽङ्घ्रिसरोजपूजाम् ॥ नित्यं प्रवृद्धधनधान्यकलत्रपुत्रसौभाग्यसम्पदधिकास्त इहैव लोके ॥ ३ ॥ कैलासशैलभुवने त्रिजगज्जनित्रीं गौरीं निवेश्य कनकाचितरत्नपीठे ॥ नृत्यं विधातुमभिवाञ्छति शूलपाणौ देवाः प्रदोषसमये नु भजन्ति सर्वे ॥ ४ ॥ वाग्देवी धृतवल्लकी शतमखो वेणुं दधत्पद्मजस्तालोन्निद्राकरो रमा भगवती गेयप्रयोगान्विता ॥ विष्णुः सान्द्रमृदङ्गवादनपटुर्देवाः समन्तात्स्थिताः सेवन्ते तमनु प्रदोषसमये देवं मृडानीपतिम् ॥५॥ गन्धर्वयक्षपतगोरगसिद्धसाध्यविद्याधरामरवराप्सरसां गणाश्च ॥ येऽन्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिलोकनिलयाः सहभूतवर्गाः प्राप्ते प्रदोषसमये हरपार्श्वसंस्थाः ॥ ६ ॥ अतः प्रदोषे शिव एक एव पूज्योऽथ नान्ये हरिपद्मजाद्याः ॥ तस्मिन्महेशे विधिनेज्यमाने सर्वे प्रसीदन्ति सुराधिनाथाः ॥७॥ एष ते तनयः पूर्वजन्मनि ब्राह्मणोत्तमाः ॥ प्रतिग्रहैर्वयो निन्ये न दानाद्यैः सुकर्मभिः ॥ ८ ॥ अतो दारिद्र्यमापन्नः पुत्रस्ते द्विजभामिनि ॥ तद्दोषपरिहारार्थं शरणं यातु शङ्करम् ॥ ९ ॥

इति श्रीस्कन्दपुराणे प्रदोषस्तोत्राष्टकं सम्पूर्णम् ॥२२॥

---

३२ प्रदोशस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जय देव जगन्नाथ जय शङ्कर शाश्वत ॥ जय सर्वसुराध्यक्ष जय सर्वसुरार्चित ॥ १ ॥ जय सर्वगुणातीत जय सर्ववरप्रद ॥ जय नित्य निराधार जय विश्वम्भराव्यय ॥ २ ॥ जय विश्वैकवन्द्येश जय नागेन्द्रभूषण ॥ जय गौरीपते शम्भो जय चन्द्रार्धशेखर ॥ ३ ॥ जय कोट्यर्कसंकाश जयानन्तगुणाश्रय ॥ जय भद्र विरूपाक्ष जयाचिन्त्य निरञ्जन ॥ ४ ॥ जय नाथ कृपासिन्धो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जय भक्तार्तिभञ्जन ॥ जय दुस्तरसंसारसागरोत्तारण प्रभो ॥ ५ ॥ प्रसीद मे महादेव संसारार्तस्य खिद्यतः ॥ सर्वपापक्षयं कृत्वा रक्ष मां परमेश्वर ॥६॥ महादारिद्र्यमग्नस्य महापापहतस्य च ॥ महाशोकनिविष्टस्य महारोगातुरस्य च ॥७॥ ऋणभारपरीतस्य दह्यमानस्य कर्मभिः ॥ ग्रहैः प्रपीड्यमानस्य प्रसीद मम शङ्कर ॥८॥ दरिद्रः प्रार्थयेद्देवं प्रदोषे गिरिजापतिम् ॥ अर्थाढ्यो वाऽथ राजा वा प्रार्थयेद्देवमीश्वरम् ॥ ९ ॥ दीर्घमायुः सदारोग्यं कोशवृद्धिर्बलोन्नतिः ॥ ममास्तु नित्यमानन्दः प्रसादात्तव शङ्कर ॥ १० ॥ शत्रवः संक्षयं यान्तु प्रसीदन्तु मम प्रजाः ॥ नायान्तु दस्यवो राष्ट्रे जनाः सन्तु निरापदः ॥ ११ ॥ दुर्भिक्षमारिसन्तापाः शमं यान्तु महीतले ॥ सर्वसस्यसमृद्धिश्च भूयात्सुखमया दिशः ॥१२॥ एवमाराधयेद्देवं पूजान्ते गिरिजापतिम् ॥ ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिश्च पूजयेत् ॥१३॥ सर्वपापक्षयकरी सर्वरोगनिवारिणी ॥ शिवपूजा मयाख्याता सर्वाभिष्टफलप्रदा ॥ १४ ॥

इति प्रदोषस्तोत्रं सम्पूर्णम् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३३ चन्द्रशेखराष्टकम् ।

श्रीगणेशाय नमः ॥ चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर पाहिमाम् ॥ चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर रक्ष माम् ॥ १ ॥ रत्नसानुशरासनं रजताद्रिशृङ्गनिकेतनं सिञ्जिनीकृतपन्नगेश्वरमच्युताननसायकम ॥ क्षिप्रदग्धपुरत्रयं त्रिदिवालयैरभिवन्दितं चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ २ ॥ पञ्चपादपपुष्पगन्धपदाम्बुजद्वयशोभितं भाललोचनजातपावकदग्धमन्मथविग्रहम ॥ भस्मदिग्धकलेवरं भवनाशनं भवमव्ययं चन्द्रशेखर० ॥ ३ ॥ मत्तवारणमुख्यचर्मकृतोत्तरीयमनोहरं पङ्कजासनपद्मलोचनपूजितांघ्रिसरोरुहम् ॥ देवसिन्धुतरङ्गसीकरसिक्तशुभ्रजटाधरं चन्द्र० ॥ ४ ॥ यक्षराजसखं भगाक्षहरं भुजङ्गविभूषणं शैलराजसुतापरिष्कृतचारुवामकलेवरम् ॥ क्ष्वेडनीलगलं परश्वधधारिणं मृगधारिणं चन्द्रशे० ॥ ५ ॥ कुण्डलीकृतकुण्डलेश्वरकुण्डलं वृषवाहनं नारदादिमुनीश्वरस्तुतवैभवं भुवनेश्वरम् ॥ अन्धकान्धकमाश्रितामरपादपं शमनान्तकं चन्द्रशेखर०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ६ ॥ भेषजं भवरोगिणामखिलापदामपहारिणं दक्षयज्ञविनाशनं त्रिगुणात्मकं त्रिविलोचनम् ॥ भुक्तिमुक्तिफलप्रदं सकलाघसंघनिबर्हणं चन्द्रशे० ॥ ७ ॥ भक्तवत्सलमर्चितं निधिमक्षयं हरिदम्बरं सर्वभूतपतिं परात्परमप्रमेयमनुत्तमम् ॥ सोमवारिजभूहुताशनसोमपानिलखाकृतिं चन्द्रशे० ॥ ८ ॥ विश्वसृष्टिविधायिनं पुनरेव पालनतत्परं संहरन्तमपि प्रपञ्चमशेषलोकनिवासिनम् । क्रीडयन्तमहर्निशं गणनाथयूथसमन्वितं चन्द्रशे० ॥ ९ ॥ मृत्युभीतमृकण्डसूनुकृतस्तवं शिवसन्निधौ यत्र कुत्र च यः पठेन्नहि तस्य मृत्युभयं भवेत् ॥ पूर्णमायुररोगितामखिलार्थसम्पदमादरं चन्द्रशेखर एव तस्य ददाति मुक्तिमयत्नतः ॥ १० ॥

इति श्रीचन्द्रशेखराष्टकं सम्पूर्णम् ॥ २४ ॥

---

३४ दारिद्र्यदहनशिवस्तोत्रम् ।

श्रीगणेशाय नमः ॥ विश्वेश्वराय नरकार्णवतारणाय कर्णामृताय शशिशेखरधारणाय ॥ कर्पूरकान्तिधवलाय जटाधराय दारिद्र्यदुःखदहनाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमः शिवायः ॥ १ ॥ गौरीप्रियाय रजनीशकलाधराय कालान्तकाय भुजगाधिपकङ्कणाय ॥ गङ्गाधराय गजराजविमर्दनाय दारिद्र्यदुःखदहनाय नमः शिवाय ॥ २ ॥ भक्तिप्रियाय भवरोगभयापहाय उग्राय दुर्गभवसागरतारणाय ॥ ज्योतिर्मयाय गुणनामसुनृत्यकाय दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ३ ॥ चर्माम्बराय शवभस्मविलेपनाय भालेक्षणाय मणिकुण्डलमण्डिताय ॥ मञ्जीरपादयुगलाय जटाधराय दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ४ ॥ पञ्चाननाय फणिराजविभूषणाय हेमांशुकाय भुवनत्रयमण्डिताय ॥ आनन्दभूमिवरदाय तमोमयाय दारिद्र्य० ॥ ५ ॥ भानुप्रियाय भवसागरतारणाय कालान्तकाय कमलासनपूजिताय ॥ नेत्रत्रयाय शुभलक्षणलक्षिताय दारिद्र्य०॥६॥ रामप्रियाय रघुनाथवरप्रदाय नागप्रियाय नरकार्णवतारणाय ॥ पुण्येषु पुण्यभरिताय सुरार्चिताय दारिद्र्य० ॥ ७ ॥ मुक्तेश्वराय फलदाय गणेश्वराय गीतप्रियाय वृषभेश्वरवाहनाय ॥ मातङ्गचर्मवसनाय महेश्वराय दारिद्र्य० ॥ ८ ॥ वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवारणम् ॥ सर्वसम्पत्करं शीघ्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुत्रपौत्रादिवर्धनम् ॥ त्रिसन्ध्यं यः पठेन्नित्यं स हि स्वर्गमवाप्नुयात् ॥ ९ ॥

इति श्रीवसिष्ठविरचितं दारिद्र्यदहनस्तोत्रं सम्पूर्णम् ॥ २५ ॥

---

३५ शिवाष्टोत्तरशतनामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ शिवो महेश्वरः शम्भुः पिनाकी शशिशेखरः ॥ वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥ १ ॥ शङ्करः शूलपाणिश्च खट्वाङ्गी विष्णुवल्लभः ॥ शिपिविष्टोऽम्बिकानाथः श्रीकण्ठो भक्तवत्सलः ॥२॥ भवः शर्वस्त्रिलोकेशः शितिकण्ठः शिवाप्रियः ॥ उग्रः कपाली कामारिरन्धकासुरसूदनः ॥ ३ ॥ गङ्गाधरो ललाटाक्षः कालकालः कृपानिधिः ॥ भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ॥ ४ ॥ कैलासवासी कवची कठोरस्त्रिपुरान्तकः ॥ वृषाङ्को वृषभारूढो भस्मोद्धूलितविग्रहः ॥ ५ ॥ सामप्रियः स्वरमयस्त्रयीमूर्तिरनीश्वरः ॥ सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ॥ ६ ॥ हविर्यज्ञमयः सोमः पञ्चवक्त्रः सदाशिवः ॥ विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिरण्यरेता दुर्धर्षो गिरीशो गिरिशोऽनघः ॥
भुजङ्गभूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥ ८ ॥
कृत्तिवासाः पुरारातिर्भगवान् प्रमथाधिपः ॥
मृत्युञ्जयः सूक्ष्मतनुर्जगद्व्यापीजगद्गुरुः ॥ ९ ॥
व्योमकेशो महासेनजनकश्चारुविक्रमः ॥ रुद्रो भूत-
पतिः स्थाणुरहिर्बुध्न्यो दिगम्बरः ॥ १० ॥ अष्ट-
मूर्तिरनेकाऽऽत्मा सात्त्विकः शुद्धविग्रहः ॥ शाश्वतः
खण्डपरशू रजःपाशविमोचनः ॥ ११ ॥ मृडः
पशुपतिर्देवो महादेवोऽव्ययो हरिः ॥ पूषदन्तभिद-
व्यग्रो दक्षाध्वरहरो हरः ॥ १२ ॥ भगनेत्रभिद-
व्यक्तः सहस्राक्षः सहस्रपात् ॥ अपवर्गप्रदोऽनन्त-
स्तारकः परमेश्वरः ॥ १३ ॥ एवमष्टोत्तरशतं नाम्ना-
माम्नायसम्मितम् ॥ शङ्करस्य प्रिया गौरी जप्त्वा
त्रैकाल्यमन्वहम् ॥ १४ ॥ प्रेरिता पद्मनाभेन वर्ष-
मेकं प्रयत्नतः ॥ अवाप सा शरीरार्द्धं प्रसादाच्छू-
लपाणिनः ॥ १५ ॥ यस्त्रिसन्ध्यं पठेच्छम्भोर्नाम्ना-
मष्टोत्तरं शतम् ॥ शतरुद्रत्रयावृत्त्या चैकावृत्त्या
पठेन्नरः ॥ १६ ॥

इति श्रीशिवाष्टोत्तरशतनामावलिस्तोत्रं सम्पूर्णम् ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३६ द्वादशज्योतिर्लिङ्गस्तोत्रम् ।

श्रीगणेशाय नमः ॥ सौराष्ट्रदेशे विशदेऽतिरम्ये ज्योतिर्मयं चन्द्रकलावतंसम् ॥ भक्तिप्रदानाय कृपावतीर्णं तं सोमनाथं शरणं प्रपद्ये ॥ १ ॥ श्रीशैलशृङ्गे विबुधातिसङ्गे तुलाद्रितुङ्गेऽपि मुदा वसन्तम् ॥ तमर्जुनं मल्लिकपूर्वमेकं नमामि संसारसमुद्रसेतुम् ॥ २ ॥ अवन्तिकायां विहितावतारं मुक्तिप्रदानाय च सज्जनानाम् ॥ अकालमृत्योः परिरक्षणार्थं वन्दे महाकालमहासुरेशम् ॥ ३ ॥ कावेरिकानर्मदयोः पवित्रे समागमे सज्जनतारणाय ॥ सदैव मान्धातृपुरे वसन्तमोङ्कारमीशं शिवमेकमीडे ॥ ४ ॥ पुर्वोत्तरे प्रज्वलिकानिधाने सदा वसन्तं गिरिजासमेतम् ॥ सुरासुराराधितपादपद्मं श्रीवैद्यनाथं तमहं नमामि ॥ ५ ॥ याम्ये सदङ्गे नगरेऽतिरम्ये विभूषिताङ्गं विविधैश्च भोगैः ॥ सद्भक्तिमुक्तिप्रदमीशमेकं श्रीनागनाथं शरणं पपद्ये ॥ ६ ॥ महाद्रिपार्श्वे च तटे रमन्तं सम्पूज्यमानं सततं मुनीन्द्रैः । सुरासुरैर्यक्षमहोरगाद्यैः केदारमीशं शिवमेकमीडे ॥ ७ ॥ सह्याद्रिशीर्ष विमले वसन्तं गोदावरीतीरपवित्रदेशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ यद्दर्शनात्पातकमाशु नाशं प्रयाति तं त्र्यम्बक-मीशमीडे ॥ ८ ॥ सुताम्रपर्णीजलराशियोगे निबध्य सेतुं विशिखैरसंख्यैः ॥ श्रीरामचन्द्रेण समर्पितं तं रामेश्वराख्यं नियतं नमामि ॥ ९ ॥ यं डाकिनी-शाकिनिकासमाजे निषेव्यमाणं पिशिताशनैश्च ॥ सदैव भीमादिप्रसिद्धं तं शङ्करं भक्तहितं नमामि ॥ १० ॥ सानन्दमानन्दवने वसन्तमानन्दकन्दं हतपापवृन्दम् ॥ वाराणसीनाथमनाथनाथं श्री-विश्वनाथं शरणं प्रपद्ये ॥ ११ ॥ इलापुरे रम्य-विशालकेऽस्मिन्समुल्लसन्तं च जगद्वरेण्यम् ॥ वन्दे महोदारतरं स्वभावं घृष्णेश्वराख्यं शरणं प्रपद्ये ॥ १२ ॥ ज्योतिर्मयद्वादशलिङ्गकानां शिवात्मनां प्रोक्तमिदं क्रमेण ॥ स्तोत्रं पठित्वा मनुजोऽतिभक्त्या फलं तदालोक्य निजं भजेच्च ॥ ११ ॥

इति श्रीद्वादशज्योतिर्लिङ्गस्तोत्रं सम्पूर्णम् ॥ २७ ॥

---

३७ विश्वमूर्त्यष्टकम् ।

श्रीगणेशाय नमः ॥ अकारणायाखिलकारणाय नमो महाकारणाय ॥ नमोऽस्तु कालनललोचनाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृतागसं मामवविश्वमूर्ते ॥ १ ॥ नमोऽस्त्वहीना-
भरणाय नित्यं नमः पशूनां पतये मृडाय ॥ वेदा-
न्तवेद्याय नमो नमस्ते कृता० ॥ २ ॥ नमोऽस्तु
भक्तेहितदानदात्रे सर्वौषधीनां पतये नमोऽस्तु ॥
ब्रह्मण्यदेवाय नमो नमस्ते कृता० ॥ ३ ॥ कालाय
कालानलसन्निभाय हिरण्यगर्भाय नमो नमस्ते ॥
हालाहलादाय सदा नमस्ते कृता० ॥ ४ ॥ विरञ्चि-
नारायणशक्रमुख्यैरज्ञातवीर्याय नमो नमस्ते ॥
सूक्ष्मातिसूक्ष्याय नमोऽघहन्त्रे कृता० ॥५॥ अनेक-
कोटीन्दुनिभाय तेऽस्तु नमो गिरीणां पतयेऽघहन्त्रे ॥
नमोऽस्तु ते भक्तविपद्धराय कृता० ॥ ६ ॥ सर्वा-
न्तरस्थाय विशुद्धधाम्ने नमोऽस्तु ते दुष्टकुलान्त-
काय ॥ समस्ततेजोनिधये नमस्ते कृता०॥७॥यज्ञाय
यज्ञादिफलप्रदात्रे यज्ञस्वरूपाय नमो नमस्ते ॥
नमो महानन्दमयाय नित्यं कृतागसं मामव०
॥८॥ इति स्तुतो महादेवो दक्षं प्राह कृताञ्जलिम् ॥
यत्तेऽभिलषितं दक्ष तत्ते दास्याम्यहं ध्रुवम् ॥ ९ ॥
अन्यच्च शृणु भो दक्ष यच्च किञ्चिद्ब्रवीम्यहम् ॥
यत्कृतं हि मम स्तोत्रं त्वया भक्त्या प्रजापते
॥ १० ॥ ये श्रद्धया पठिष्यन्ति मानवाः प्रत्यहं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुभम् ॥ निष्कल्मषा भविष्यन्ति सापराधा अपि ध्रुवम् ॥ ११ ॥

इति श्रीको० म० पक्षकृतं श्रीविश्वमूर्त्यष्टकम् ॥ २८ ॥

---

३८ कर्पूरस्तोत्रम् ।

श्रीगणेशाय नमः ॥ कर्पूरं मध्यमान्त्यस्वरपररहितं सेन्दु वामाक्षियुक्तं बीजं ते मातरेतत्त्रिपुरहरवधूस्त्रिःकृतं ये जपन्ति ॥ तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम् ॥ १ ॥ ईशानः सेन्दुवामश्रवणपरिगतो बीजमन्यन्महेशि द्वन्द्वं ते मन्दचेता यदि जपति जनो वारमेकं कदाचित् । जित्वा वाचामधीशं धनदमपि चिरं मोहयत्यम्बुजाक्षि चञ्चच्चन्द्रार्द्धचूडे प्रभवति स महाघोरशावावतंसे ॥ २ ॥ ईशो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तो बीजं ते द्वन्द्वमन्यद्विगलितचिकुरे कालिके ये जपन्ति ॥ द्वेष्टारं घ्नन्ति ते वै त्रिभुवनमपि ते वश्यभावं नयन्ति सृक्कद्वन्द्वास्रधाराद्वयधरवदने दक्षिणे कालिकेति ॥ ३ ॥ ऊर्द्ध्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वामे कृपाणं करकमलतले छिन्नमुण्डं ततोऽधः सव्ये भीतिं वरं च त्रिजगदघहरे दक्षिणे कालिकेति ॥ जप्त्वैतन्नामवर्णं तव मनुविभवं भावयन्त्येतदम्ब तेषामष्टौ करस्थाः प्रकटितवदने सिद्धयस्त्र्यम्बकस्य ॥ ४ ॥ वर्गाद्यं वह्निसंस्थं विधुरतिललितं तत्त्रयं कूर्चयुग्मं लज्जाद्वन्द्वञ्च पश्चात्स्मितमुखि तदधष्ठद्वयं योजयित्वा ॥ मातर्ये ये जपन्ति स्मरहरमहिले भावयन्तः स्वरूपं ते लक्ष्मीलास्यलीलाकरकमलदृशः काम्यरूपा भवन्ति ॥ ५ ॥ प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यन्तगुह्यं त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति ॥ तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे वाग्देवी देवमुण्डस्रगतिशबलसत्कण्ठपीनस्तनाढ्ये ॥ ६ ॥ गतासूनां बाहुप्रकरकृतकाञ्चीपरिलसन्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम् ॥ श्मशानस्थे तल्पे शवहृदि महाकालसुरते प्रसक्तां त्वां ध्यायञ्जननि जडचेता अपि कविः ॥ ७ ॥ शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिवहैः परं सङ्कीर्णायां प्रकटितचितायां हरवधूम् ॥ प्रविष्टां सन्तुष्टामुपरि च-सुरत्यापि युवति सदा त्वां ध्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यन्ति क्वचिदपि न तेषां परिभवः ॥ ८ ॥ वदामस्ते किं वा जननि वयमुच्चैर्जडधियो न धाता नापीशो हरिरपि न ते वेत्ति परमम् ॥ तथापि त्वद्भक्तिर्मुखरयति चास्माकमसिते तदेतत्क्षन्तव्यं न खलु पशुरोषः समुचितः ॥ ९ ॥ समन्तादापीनस्तनजघनदृग्यौवनवतीं रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम् ॥ विवासां त्वां ध्यायन् गलितचिकुरस्तस्य वशगाः ॥ समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः ॥ १० ॥ समः स्वस्थो भूत्वा जपति विपरीतां यदि सदा विचिन्त्य त्वां ध्यायन्नतिशयमहाकालसुरताम् ॥ तदा तस्य क्षोणीतलविहरमाणस्य विदुषः कराम्भोजे वश्या हरवधुपराः सिद्धिनिवहाः ॥ ११ ॥ प्रसूते संसारं जननि जगतं पालयति च समस्तक्षित्यादीन् प्रलयसमये संहरति च ॥ अतस्त्वां धातापि त्रिभुवनपतिः श्रीपतिरहो महेशोऽपि प्रायः सकलमपि किं स्तौमि भवतीम् ॥ १२ ॥ अनेके सेवन्तेभवदधिकगीर्वाणनिवहान् विमूढास्ते मातः किमपि न हि जानन्ति परमम् ॥ समाराध्यामाद्यां हरिहरविरिञ्च्यादिविबुधैः प्रसन्नोऽस्मि स्वैरं रतिरसमहानन्दनिर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताम् ॥ ॥ १३ ॥ धरित्रीकीलालं शुचिरपि समारोऽपि गगनं त्वमेका कल्याणी गिरिशरमणी कालि सततम् ॥ स्तुतिः का ते मातर्निजकरुणया मामगतिकं प्रसन्ना त्वं भूयाः पुनरपि न भूयो मम जनुः ॥ १४ ॥ श्मशानस्थः स्वस्थो गलितचिकुरो दिक्पटधरः सहस्रं त्वर्काणां निजगलितवीर्येण कुसुमम् ॥ जपँस्त्वत्प्रत्येकं मनुमपि तव ध्याननिरतो महाकालि स्वैरं स भवति धरित्रीपरिवृढः ॥ १५ ॥ गृहे सम्मार्जिन्याः परिगलितवीर्यं सचिकुरं समूलं मध्याह्ने वितरति चितायां कुजदिने ॥ समुच्चार्य प्रेम्णा मनुमति सकृत्कालनियतं गजारूढो याति क्षितिपतिवृतः सत्कविवरः ॥ १६ ॥ स्वपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो पुरो ध्यायन्ध्यायञ्जपति यदि भक्तस्तव मनुम् ॥ स गन्धर्वश्रेणीपतिरपि कवित्वामृतनदी न दीनः पूर्येत परमपदलीनः प्रभवति ॥ १७ ॥ त्रिपञ्चारे पीठे शिवशवहृदि स्मेरवदनां महाकालेनोचैर्मदनरसलावण्यनिरताम् ॥ समासक्तो नक्तं स्वयमपि रतानन्दनिरतो जनो यो ध्यायेत्त्वामपि जननि स स्यात्स्मरहरः ॥ १८ ॥ सलोमास्थि स्वैरं पललमपि मार्जारमसिते परं चोष्ट्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेषं नरमहिषयोश्छागमपि व ॥ बलिं ते पूजायामधिवितरतां पर्वतसुते सतां सिद्धिः सर्वा प्रतिदिनमपूर्वा प्रभवति ॥ १९ ॥ वशी लक्षं मन्त्रं प्रजपति हविष्याशनरतो दिवा मातर्युष्मच्चरणयुगलध्याननिरतः ॥ परं नक्तं नग्नो निधुवनविनोदेन च मनुं जनो लक्षं सम्यक्स्मरहरसमानः क्षितितले ॥ २० ॥ इदं स्तोत्रं मातस्तव मनुसमुद्धारणजपस्वरूपं त्वत्पादाम्बुजयुगलपूजाविधियुतम् ॥ निशार्द्धं वा पूजासमयमथवा यस्तु पठति प्रतापस्तस्यातिप्रसरति कवित्वामृतनदी ॥ २१ ॥ कुरङ्गाक्षीवृन्दं तव मनुरतिप्रेम तरलं वशस्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः ॥ रिपुः कारागारं कलयति चिरं केलिकलया परञ्ची वन्मुक्तः स भवति सुभक्तः प्रतिजनुः ॥ २२ ॥

इति महाकालरचितं कर्पूरस्तोत्रम् ॥ २९ ॥

* इति शिवस्तोत्राणि समाप्तानि *

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ विष्णुस्तोत्राणि ।

३९ नारायणहृदयम् ।

श्रीगणेशाय नमः ॥ आचम्य प्राणानायम्य देशाकालौ स्मृत्वा ममाभीष्टसिद्ध्यर्थं सङ्कलीकरण-रीत्या सम्पुटीकरणरीत्या वा सकृदावर्तनं करिष्ये । अस्य श्रीनारायणहृदयस्तोत्रमन्त्रस्य भार्गव ऋषिः । अनुष्टुप् छन्दः । श्रीलक्ष्मीनारायणो देवता । ॐ बीजम् । नमः शक्तिः । नारायणायेति कीलकम् । श्रीलक्ष्मीनारायणप्रीत्यर्थे जपे विनियोगः ॥ अथ न्यासः ॥ ॐ नारायणः परंज्योतिरित्यङ्गुष्ठाभ्यां नमः । ॐ नारायणः परं ब्रह्मेति तर्जनीभ्यां नमः । ॐ नारायणः परो देव इति मध्यमाभ्यां नमः । ॐ नारायणः परंधामेति अनामिकाभ्यां नमः । ॐनारायणः परो धर्म इति कनिष्ठिकाभ्यां नमः । ॐ विश्वं नारायण इति करतलकरपृष्ठाभ्यां नमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं हृदयादि ॥ अथ दिग्बन्धः ॥ ॐऐन्द्र्यादिदशदिशं–'ॐ नमः सुदर्शनाय सहस्राराय हुं फट् बध्नामि नमश्चक्राय स्वाहा ॥ इति प्रतिदिशं योज्यम् ॥ अथ ध्यानम् ॥ ॐउद्यद्भास्वत्समाभासश्चिदानन्दैकदेहवान् ॥ शंखचक्रगदापद्मधरो ध्येयो महेश्वरः ॥ १ ॥ लक्ष्मीधराभ्यामाश्लिष्टः स्वमूर्तिगणमध्यगः ॥ ब्रह्मवायुशिवाहीशविपैः शक्रादिकैरपि ॥२॥ सेव्यमानोऽधिकं भक्त्या नित्यं निःशेषशक्तिमान् ॥ मूर्तयोऽष्टावपि ध्येयाश्चक्रशंखवराभयैः ॥३॥ युक्ताः प्रदीपवर्णाश्च सर्वाभरणभूषिताः । श्रीनारायणप्रेरणया श्रीनारायणप्रीत्यर्थं श्रीनारायणाष्टकमन्त्रपठनं करिष्ये । ॐ नमो नारायणायेति जपः ॥ अथ मूलाष्टकम् ॥ ॐनारायणः परंज्योतिरात्मा नारायणः परः ॥ नारायणः परंब्रह्म नारायण नमोऽस्तुते ॥ १ ॥ नारायणः परो देव आत्मा नारायणः परः ॥ नारायणः परंधाता नारायण नमोऽस्तु ते ॥ २ ॥ नारायणः परंधाम ध्यानं नारायणः परः ॥ नारायणः परो धर्मो नारायण नमोऽस्तु ते ॥ ३ ॥ नारायणः परो वेद्यो विद्या नारायणः परः ॥ विश्वं नारायणः साक्षान्नारायण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमोऽस्तु ते ॥ ४ ॥ नारायणाद्विधिर्जातो जातो नारायणाच्छिवः जातो नारायणादिन्द्रो नारायण नमोऽस्तु ते ॥ ५ ॥ रविर्नारायणस्तेजश्चन्द्रो नारायणो महः ॥ वह्निर्नारायणः साक्षान्नारायण नमोऽस्तु ते ॥६॥ नारायण उपास्यः स्याद्गुरुर्नारायणः परः ॥ नारायणः परो बोधो नारायण नमोऽस्तु ते ॥ ७ ॥ नारायणः फलं मुख्यं सिद्धिर्नारायणः सुखम् ॥ सेव्यो नारायणः शुद्धो नारायण नमोऽस्तु ते ॥ ८ ॥ इति मूलाष्टकम् ॥

अथ प्रार्थनादशकम् ॥ नारायणस्त्वमेवासि दहराख्ये हृदि स्थितः ॥ प्रेरकः प्रेर्यमाणानां त्वया प्रेरितमानसः ॥१॥ त्वदाज्ञां शिरसा धृत्वा जपामि जनपावनम् ॥ नानोपासनमार्गाणां भावहृद्भावबोधकः ॥ २ ॥ भावार्थकृद्भवातीतो भवसौख्यप्रदो भव ॥ त्वन्मायामोहितं विश्वं त्वयव परिकल्पितम् ॥३॥ त्वदधिष्ठानमात्रेण सैव सर्वार्थकारिणी ॥ त्वमेव तां पुरस्कृत्य मम कामान् समर्पय ॥ ४ ॥ न मे त्वदन्यस्त्रोताऽस्ति त्वदन्यन्न हि दैवतम् । त्वदन्यन्न हि जानामि पालकं पुण्यवर्धनम् ॥५॥ यावत्सांसारिको भावो मनःस्थो भावनात्मकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तावत्सिद्धिर्भवेत्साध्या सर्वथा सर्वदा विभो ॥६॥ पापिनामहमेवाग्रयो दयालूनां त्वमग्रणीः ॥ दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥ ७ ॥ त्वयाऽप्यहं न सृष्टश्चेन्न स्यात्तव दयालुता ॥ आमयो वा न सृष्टश्चेदौषधस्य वृथोदयः ॥ ८ ॥ पापसंघपरिक्रान्तः पापात्मा पापरूपधृक् ॥ त्वदन्य कोऽत्र पापेभ्यस्त्राता त्वं जगतीतले ॥ ९ ॥ त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ॥ त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥ १० ॥ प्रार्थनादशकं चैव मूलाष्टकमथ द्वयम् ॥ यः पठेच्छृणुयान्नित्यं तस्य लक्ष्मीः स्थिरा भवेत् ॥ ११ ॥ नारायणस्य हृदयं सर्वाभीष्टफलप्रदम् ॥ लक्ष्मीहृदयकं स्तोत्रं यदि चैतद्विना कृतम् ॥ १२ ॥ तत्सर्वं निष्फलं प्रोक्तं लक्ष्मीः क्रुद्ध्यति सर्वदा ॥ एतत्संकलितं स्तोत्रं सर्वकर्मफलप्रदम् ॥ १३ ॥ लक्ष्मीहृदयकं चैव तथा नारायणात्मकम् ॥ जपेद्यः सम्पुटीकृत्य सर्वाभीष्टमवाप्नुयात् ॥ १४ ॥ नारायणस्य हृदयमादौ जप्त्वा ततः परम् ॥ लक्ष्मीहृदयकं स्तोत्रं जपेन्नारायणं पुनः ॥ १५ ॥ पुनर्नारायणं जप्त्वा पुनर्लक्ष्मीहृदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जपेत् ॥ १६ ॥ एवं मध्ये द्विवारेण जपेत्संकलितं हि तत् ॥ १७ ॥ तद्वद्धोमादिकं कुर्यादेतत्संकलितं शुभम् ॥ सर्वान्कामानवाप्नोति आधिव्याधिभयं हरेत् ॥ १८ ॥ गोप्यमेतत्सदा कुर्यान्न सर्वत्र प्रकाशयेत् ॥ इति गुह्यतमं शास्त्रं प्राप्तं ब्रह्मादिकैः पुरा ॥ १९ ॥ तस्मात्सर्वप्रयत्नेन गोपयेत्साधयेत्सुधीः ॥ यत्रैतत्पुस्तकं तिष्ठेल्लक्ष्मीनारायणात्मकम् ॥ २० ॥ भूतपैशाचवेताला न स्थिरास्तत्र सर्वदा ॥ लक्ष्मी हृदयकं प्रोक्तं विधिना साधयेत्सुधीः ॥२१॥ भृगुवारे च रात्रौ च पूजयेत्पुस्तकद्वयम् ॥ सर्वथा सवदा सत्यं गोपयेत्साधयेत्सुधीः ॥ २२ ॥ गोपनात् साधनाल्लोके धन्यो भवति तत्त्वतः ॥ २३ ॥

इत्यथर्वणरहस्ये उत्तरभागे नारायणहृदयं सम्पूर्णम् ॥ १ ॥

---

४० नारायणवर्म ।

श्रीगणेशाय नमः ॥ राजोवाच ॥ येन गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ॥ क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ १ ॥ भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ॥ यथाऽऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥ २ ॥ श्रीशुक उवाच । व्रतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ॥ नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥ विश्वरूप उवाच ॥ धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः ॥ कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः ॥४॥ नारायणमयं वर्म संनह्येद्भय आगते ॥ दैवभूतात्मकर्मभ्यो नारायणमयः पुमान् ॥ ५ ॥ पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥ मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत् ॥ ६ ॥ ॐ नमो नारायणायेति विपर्ययमथापि वा ॥ करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ॥ ७ ॥ प्रणवादि यकारान्तमङ्गुल्यङ्गुष्ठपर्वसु ॥ न्यसेद्धृदय ॐ कारं विकारमनुमूर्धनि ॥ ८ ॥ षकारं तु भ्रुवोर्मध्ये णकारं शिखया न्यसेत् ॥ वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु ॥ ९ ॥ मकारमन्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेद्बुधः ॥ सविसर्गं फडन्तं तत्सर्वदिक्षु विनिर्दिशेत् ॥ १० ॥ ॐ विष्णवे नमः ॥ इत्यात्मानं परं ध्यायेद्ध्येयं षट्शक्तिभिर्युतम् ॥ विद्यातेजस्तपोमूर्तिमिमं मन्त्रमुदाहरेत् ॥ ११ ॥ ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेन्द्रपृष्ठे ॥ दरारिचर्मासि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गदेषुचापपाशान्दधानोऽष्टगुणोऽष्टबाहुः ॥ १२ ॥
जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य
पाशात् ॥ स्थलेषु मायाबटुवामनोऽव्यात्
त्रिविक्रमः खेऽवतु विश्वरूपः ॥ १३ ॥ दुर्गेष्वट-
व्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथ-
पारिः ॥ विमुञ्चतो यस्य महाट्टहासं दिशो विनेदु-
र्न्यपतंश्च गर्भाः ॥ १४ ॥ रक्षत्वसौ माऽध्वनि यज्ञ-
कल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ॥ रामोऽद्रिकूटे-
ष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजो माम्
॥ १५ ॥ मामुग्रधर्मादखिलात्प्रमादान्नारायणः पातु
नरश्च हासात् ॥ दत्तस्त्वयोगादथ योगनाथः पाया-
द्गुणेशः कपिलः कर्मबन्धात् ॥ १६ ॥ सनत्कुमा-
रोऽवतु कामदेवाद्धयाननो मां पथि देवहेलनात् ॥
देवर्षिवर्यः पुरुषार्चनान्तरात्कूर्मो हरिर्मां निरया-
दशेषात् ॥ १७ ॥ धन्वन्तरिर्भगवान्पात्वपथ्याद्-
द्वन्द्वाद्भयादृषभो निर्जितात्मा ॥ यज्ञश्च लोकादव-
ताज्जनान्ताद्बलो गणात्क्रोधवशादहीन्द्रः ॥ १८ ॥
द्वैपायनो भगवानप्रबोधाद्बुद्धस्तु पाखण्डगणात्प्र-
मादात् । कल्किः कलेः कालमलात्प्रपातु धर्मावना-
योरुकृतावतारः ॥ १९ ॥ मां केशवो गदया प्रात-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रुऽव्याद्गोविन्द आसङ्गव आत्तवेणुः । नारायणः प्राह्ण उदात्तशक्तिर्मध्यन्दिने विष्णुररीन्द्रपाणिः ॥ २० ॥ देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामाऽवतु माधवो माम् ॥ दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥ २१ ॥ श्रीवत्सधामाऽपररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः । दामोदरोऽव्यादनुसन्ध्यं प्रभाते विश्वेश्वरो भगवान्कालमूर्त्तिः ॥ २२ ॥ चक्रं युगान्तानलतिग्मनेमि भ्रमत्समन्ताद्भगवत्प्रयुक्तम् ॥ दन्दग्धि दन्दग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ॥ २३ ॥ गदेऽशनिस्पर्शनविस्फुलिङ्गे निष्पिण्ढि निष्पिण्ढ्यजितप्रियासि ॥ कूष्माण्डवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ॥ २४ ॥ त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन ॥ नरेन्द्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कम्पयन् ॥२५॥ त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिन्धि छिन्धि ॥ चक्षूंषि चर्मन् शतचन्द्र छादय द्विषामघोनां हर पापचक्षुषाम् ॥ २६ ॥ यन्नो भयं ग्रहेभ्योऽभूत्केतुभ्यो नृभ्य एव च ॥ सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽघेभ्य एव च ॥ २७ ॥ सर्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एयेतानि भगवन्नामरूपास्त्रकीर्तनात् ॥ प्रयान्तु संक्षयं सद्यो येऽन्ये श्रेयः प्रतीपकाः ॥ २८ ॥ गरुडो भगवान्स्तोत्रस्तोभश्छन्दोमयः प्रभुः ॥ रक्षत्वशेष- कृच्छ्रेभ्यो विष्वक्सेनस्य वाहनम् ॥ २९ ॥ सर्वा- पद्भ्यो हरेर्नाम रूपयानायुधानि नः ॥ बुद्धीन्द्रि- यमनः प्राणान् पान्तु पार्षदभूषणाः ॥ ३० ॥ यथा हि भगवानेव वस्तुतः सदसच्च यत् ॥ सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः ॥ ३१ ॥ यथैकात्म्या- नुभावानां विकल्परहितः स्वयम् ॥ भूषणायुध- लिङ्गाख्या धत्ते शक्तीः स्वमायया ॥ ३२ ॥ तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः ॥ पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३ ॥ विदिक्षु दिक्षूर्ध्वमधः समन्तादन्तर्बहिर्भगवान्नारसिंह ॥ प्रहापयंल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥ ३४ ॥ मघवन्निदमाख्यातं वर्म नारायणात्मकम् ॥ विजेष्यस्यंजसा येन दंशितोऽसुरयूथपान् ॥ ३५ ॥ एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा ॥ पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते ॥ ३६ ॥ न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् ॥ राजदस्यु- ग्रहादिभ्यो व्याध्यादिभ्यश्च कर्हिचित् ॥ ३७ ॥ इमां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यां पुरा कश्चित्कौशिको धारयन् द्विजः ॥ योगधारणया स्वाङ्गं जहौ स मरुधन्वनि ॥ ३८ ॥ तस्योपरि विमानेन गन्धर्वपतिरेकदा ॥ ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३९ ॥ गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः ॥ स वालखिल्यवचनादस्थीन्यादाय विस्मितः ॥ ४० ॥ प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ य इदं शृणुयात्काले यो धारयति चादृतः ॥ तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥ ४१ ॥ श्रीशुक उवाच ॥ विद्यामधिगतो विश्वरूपाच्छतक्रतुः ॥ त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
नारायणवर्मकथनं नामाष्टमोऽध्यायः ॥ २ ॥

---

४१ श्रीविष्णुशतनामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ नारद उवाच ॥ ॐवासुदेवं हृषीकेशं वामनं जलशायिनम् ॥ जनार्दनं हरिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृष्णं श्रीवक्षं गरुडध्वजम् ॥ १ ॥ वाराहं पुण्डरीकाक्षं नृसिंहं नरकान्तकम् ॥ अव्यक्तं शाश्वतं विष्णुमनन्तमजमव्ययम् ॥ २ ॥ नारायणं गदाध्यक्षं गोविन्दं कीर्तिभाजनम् ॥ गोवर्धनोद्धरं देवं भूधरं भुवनेश्वरम् ॥ ३ ॥ वेत्तारं यज्ञपुरुषं यज्ञेशं यज्ञवाहकम् ॥ चक्रपाणिं गदापाणिं शंखपाणिं नरोत्तमम् ॥ ४ ॥ वैकुण्ठं दुष्टदमनं भूगर्भं पीतवाससम् ॥ त्रिविक्रमं त्रिकालज्ञं त्रिमूर्तिं नन्दिकेश्वरम् ॥ ५ ॥ रामं रामं हयग्रीवं भीमं रौद्रं भवोद्भवम् ॥ श्रीपतिं श्रीधरं श्रीशं मङ्गलं मङ्गलायुधम् ॥ ६ ॥ दामोदरं दमोपेतं केशवं केशिसूदनम् ॥ वरेण्यं वरदं विष्णुमानन्दं वसुदेवजम् ॥ ७ ॥ हिरण्यरेतसं दीप्तं पुराणं पुरुषोत्तमम् ॥ सकलं निष्कलं शुद्धं निर्गुणं गुणशाश्वतम् ॥ ८ ॥ हिरण्यतनुसंकाशं सूर्यायुतसमप्रभम् ॥ मेघश्यामं चतुर्बाहुं कुशलं कमलेक्षणम् ॥ ९ ॥ ज्योतिरूपमरूपं च स्वरूपं रूपसंस्थितम् ॥ सर्वज्ञं सर्वरूपस्थं सर्वेशं सर्वतोमुखम् ॥ १० ॥ ज्ञानं कूटस्थमचलं ज्ञानदं परमं प्रभुम ॥ योगीशं योगनिष्णातं योगिनं योगरूपिणं ॥ ११ ॥ ईश्वरं सर्वभूतानां वन्दे भूतमयं प्रभुम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...शतं दिव्यं वैष्णवं खलु पापहम् ॥ १२ ॥ ...सेन ...थितं पूर्वं सर्वपापप्रणाशनम् ॥ यः पठेत्प्रातरुत्थाय स भवेद्वैष्णवो नरः ॥ १३ ॥ सर्वपापविशुद्धात्मा विष्णुसायुज्यमाप्नुयात् ॥ चान्द्रायणसहस्राणि कन्यादानशतानि च ॥ १४ ॥ गवां लक्षसहस्राणि मुक्तिभागी भवेन्नरः ॥ अश्वमेधायुतं पुण्यं फलं प्राप्नोति मानवः ॥ १५ ॥

इति श्रीविष्णुपुराणे विष्णुशतनामस्तोत्रं सम्पूर्णम् ॥ ३ ॥

---

४२ हरिनाममालास्तोत्रम् ।

श्रीगणेशाय नमः ॥ गोविन्दं गोकुलानन्दं गोपालं गोपिवल्लभम् ॥ गोवर्धनोद्धरं धीरं तं वन्दे गोमतिप्रियम् ॥ १ ॥ नारायणं निराकारं नरवीरं नरोत्तमम् ॥ नृसिंहं नागनाथं च तं वन्दे नरकान्तकम् ॥ २ ॥ पीताम्बरं पद्मनाभं पद्माक्षं पुरुषोत्तमम् ॥ पवित्रं परमानन्दं तं वन्दे परमेश्वरम् ॥३॥ राघवं रामचन्द्रं च रावणारिं रमापतिम् ॥ राजी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वलोचनं रामं तं वन्दे रघुनन्दनम् ॥ ४ ॥ वा-
विश्वरूपं च वासुदेवं च विठ्ठलम् ॥ विश्वेश्वरं विभुं
व्यासं तं वन्दे देववल्लभम् ॥ ५ ॥ दामोदरं दिव्य-
सिंहं दयालुं दीननायकम् ॥ दैत्यारिं देवदेवेशं तं
वन्दे देवकीसुतम् ॥ ६ ॥ मुरारिं माधवं मत्स्यं
मुकुन्दं मुष्टिमर्दनम् ॥ मुञ्जकेशं महाबाहुं तं वन्दे
मधुसूदनम् ॥ ७ ॥ केशवं कमलाकान्तं कामेशं
कौस्तुभप्रियम् ॥ कौमोदकीधरं कृष्णं तं वन्दे कौर-
वान्तकम् ॥ ८ ॥ भूधरं भुवनानन्दं भूतेशं भूतना-
यकम् ॥ भावनैकं भुजङ्गेशं तं वन्दे भवनाशनम्
॥ ९ ॥ जनार्दनं जगन्नाथं जगज्जाड्यविनाशकम् ॥
जामदग्न्यं वरं ज्योतिस्तं वन्दे जलशायिनम् ॥१०॥
चतुर्भुजं चिदानन्दं चाणूरमल्लमर्दनम् ॥ चराच-
रगतं देवं तं वन्दे चक्रपाणिनम् ॥ ११ ॥ श्रियःकरं
श्रियोनाथं श्रीधरं श्रीवरप्रदम् ॥ श्रीवत्सलधरं
सौम्यं तं वन्दे श्रीसुरेश्वरम् ॥ १२ ॥ योगीश्वरं
यज्ञपतिं यशोदानन्ददायकम् ॥ यमुनाजलकल्लोलं
तं वन्दे यदुनायकम् ॥ १३ ॥ शालिग्रामशिलाशुद्धं
शंखचक्रोपशोभितम् ॥ सुरासुरसदासेव्यं तं वन्दे
साधुवल्लभम् ॥ १४ ॥ त्रिविक्रमं तपोमूर्तिं त्रिवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घौघनाशनम् । त्रिस्थलं तीर्थराजेन्द्रं तं वन्दे ऽसीप्रियम् ॥ १५ ॥ अनन्तमादिपुरुषमच्युतं च वरप्रदम् ॥ आनन्दं च सतानन्दं तं वन्दे चाघनाशनम् ॥ १६ ॥ लीलया धृतभूभारं लोकसत्त्वैकवन्दितम् ॥ लोकेश्वरं च श्रीकान्तं तं वन्दे लक्ष्मणप्रियम् ॥ १७ ॥ हरिं च हरिणाक्षं च हरिनाथं हरिप्रियम् ॥ हलायुधसहायं च तं वन्दे हनुमत्पतिम् ॥ १८ ॥ हरिनामकृता माला पवित्रा पापनाशिनी ॥ बलिराजेन्द्रेण चोक्ता कण्ठे धार्या प्रयत्नतः ॥ १९ ॥

इति श्रीबलिराजेन्द्रेणोक्तं हरिनाममालास्तोत्रं सम्पूर्णम् ॥ ४ ॥

---

४३ श्रीहरिस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जगज्जालपालं लसत्कण्ठमालं शरच्चन्द्रभालं महादैत्यकालम् ॥ नभोनीलकायं दुरावारमायं सुपद्मासहायं भजेऽहं भजेऽहम् ॥१॥ सदाम्भोधिवासं गलत्पुष्पहासं जगत्सन्निवासं शतादित्यभासम् ॥ गदाचक्रशस्त्रं लसत्पीतवस्त्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हसच्चारुवक्त्रं भजे० ॥ २ ॥ रमाकण्ठहारं श्रुतिव्रातसारं जलान्तर्विहारं धराभारहारम् ॥ चिदानन्दरूपं मनोज्ञस्वरूपं धृतानेकरूपं भजेऽहं० ॥ ३ ॥ जराजन्महीनं परानन्दपीनं समाधानलीनं सदैवानवीनम् ॥ जगज्जन्महेतुं सुरानीककेतुं त्रिलोकैकसेतुं भजे० ॥ ४ ॥ कृताम्नायगानं खगाधीशयानं विमुक्तेर्निदानं हरारातिमानम् ॥ स्वभक्तानुकूलं जगद्वृक्षमूलं निरस्तार्तशूलं भजे० ॥ ५ ॥ समस्तामरेशं द्विरेफाभकेशं जगद्बिम्बलेशं हृदाकाशदेशम् ॥ सदा दिव्यदेहं विमुक्ताखिलेहं सुवैकुण्ठगेहं भजे० ॥ ६ ॥ सुरालीबलिष्ठं त्रिलोकीवरिष्ठं गुरूणां गरिष्ठं स्वरूपैकनिष्ठम् ॥ सदा युद्धधीरं महावीरधीरं भवाम्भोधितीरं भजे० ॥ ७ ॥ रमावामभागं तलानग्ननागं कृताधीनयागं गतारागरागम् ॥ मुनीन्द्रैः सुगीतं सुरैः संपरीतं गुणौघैरतीतं भजे० ॥ ८ ॥ इदं यस्तु नित्यं समाधाय चित्तं पठेदष्टकं कष्टहारं मुरारेः ॥ स विष्णोर्विशोकं ध्रुवं याति लोकं जराजन्मशोकं पुनर्विन्दते नो ॥ ९ ॥

इति श्रीमत्प० स्वामिब्रह्मानन्दवि० श्रीहरिस्तोत्रं सम्पूर्णं ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४४ श्रीहरिनामाष्टकम् ।

श्रीगणेशाय नमः ॥ श्रीकेशवाच्युत मुकुन्द रथाङ्गपाणे गोविन्द माधव जनार्दन दानवारे ॥ नारायणामरपते त्रिजगन्निवास जिह्वे जपेति सततं मधुराक्षराणि ॥ १ ॥ श्रीदेवदेव मधुसूदन शार्ङ्गपाणे दामोदरार्णवनिकेतन कैटभारे ॥ विश्वम्भराभरणभूषितभूमिपाल जिह्वे० ॥ २ ॥ श्रीपद्मलोचन गदाधर पद्मनाभ पद्मेश पद्मपदपावन पद्मपाणे ॥ पीताम्बराम्बररुचे रुचिरावतार जिह्वे० ॥ ३ ॥ श्रीकान्त कौस्तुभधरार्तिहराब्जपाणे विष्णो त्रिविक्रम महीधर धर्मसेतो ॥ वैकुण्ठवास वसुधाधिप वासुदेव जिह्वे० ॥ ४ ॥ श्रीनारसिंह नरकान्तक कान्तमूर्ते लक्ष्मीपते गरुडवाहन शेषशायिन् ॥ केशिप्रणाशन सुकेश किरीटमौले जिह्वे० ॥ ५ ॥ श्रीवत्सलाञ्छन सुरर्षभ शङ्खपाणे कल्पान्तवारिधिविहार हरे मुरारे ॥ यज्ञेश यज्ञमय यज्ञभुगादिदेव जिह्वे० ॥ ६ ॥ श्रीराम रावणरिपो रघुवंशकेतो सीतापते दशरथात्मज राजसिंह ॥ सुग्रीवमित्र मृगवेधन चापपाणे जिह्वे० ॥ ७ ॥ श्रीकृष्ण वृष्णि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर यादव राधिकेश गोवर्धनोद्धरण कंशविनाश शौरे ॥ गोपाल वेणुधर पाण्डुसुतैकबन्धो जिह्वे० ॥ ८ ॥ इत्यष्टकं भगवतः सततं नरो यो नामाङ्कितं पठति नित्यमनन्यचेताः ॥ विष्णोः परं पदमुपैति पुनर्न जातु मातुः पयोधररसं पिबतीह सत्यम् ॥९॥

इति श्रीस्वामिब्रह्मानन्दविरचितं श्रीहरिनामाष्टकं सम्पूर्णम् ॥ ६ ॥

---

४५ श्रीकमलापत्यष्टकम् ।

श्रीगणेशाय नमः ॥ भुजगतल्पगतं घनसुन्दरं गरुडवाहनमम्बुजलोचनम् ॥ नलिनचक्रगदाधर-मव्ययं भजत रे मनुजाः कमलापतिम् ॥ १ ॥ अलिकुलासितकोमलकुन्तलं विमलपीतदुकूलमनो-हरम् ॥ जलधिजाश्रितवामकलेवरं भजत० ॥२॥ किमु जपैश्च तपोभिरुताध्वरैरपि किमुत्तमतीर्थ-निषेवणैः ॥ किमुत शास्त्रकदम्बविलोकनैर्भजत० ॥ ३ ॥ मनुजदेहमिमं भुवि दुर्लभं समधिगम्य सुरैरपि वाञ्छितम् ॥ विषयलम्पटतामपहाय वै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भजत० ॥ ४ ॥ न वनिता न सुतो न सहोदरो न हि पिता जननी न च बान्धवाः ॥ व्रजति साकमनेन जनेन वै भजत० ॥ ५ ॥ सकलमेव चलं सचराचरं जगदिदं सुतरां धनयौवनम् ॥ समवलोक्य विवेकदृशा द्रुतं भजत० ॥ ६ ॥ विविधरोगयुतं क्षणभङ्गुरं परवशं नवमार्गमनाकुलम् ॥ परिनिरीक्ष्य शरीरमिदं स्वकं भजत० ॥ ७ ॥ मुनिवरैरनिशं हृदि भावितं शिवविरञ्चिमहेन्द्रनुतं सदा ॥ मरणजन्मजराभयमोचनं भजत० ॥ ८ ॥ हरिपदाष्टकमेतदनुत्तमं परमहंसजनेन समीरितम् ॥ पठति यस्तु समाहितचेतसा व्रजति विष्णुपदं स नरो ध्रुवम् ॥ ९ ॥

इति श्री मत्प० स्वामिब्रह्मानन्दवि० कमलापत्यष्टकं सम्पूर्णम् ॥ ७ ॥

---

४६ दीनबन्ध्वष्टकम् ।

श्रीगणेशाय नमः ॥ यस्मादिदं जगदुदेति चतुर्मुखाद्यं यस्मिन्नवस्थितमशेषमशेषमूले ॥ यत्रोपयाति विलयं च तमस्तमन्ते दृग्गोचरो भवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेऽद्य स दीनबन्धुः ॥ १ ॥ चक्रं सहस्रकरचारुक-
रारविन्दे गुर्वी गदा दरवरश्च विभाति यस्य ॥
पक्षीन्द्रपृष्ठपरिरोपितपादपद्मो दृग्गोच० ॥ २ ॥
येनोद्धृता वसुमती सलिले निमग्ना नग्ना च
पाण्डववधूः स्थगिता दुकूलैः ॥ संमोचितो जलच-
रस्य मुखाद्गजेन्द्रो दृग्गो० ॥ ३ ॥ यस्यार्द्रदृष्टिव-
शतस्तु सुराः समृद्धिं कोपेक्षणेन दनुजा विलयं
व्रजन्ति ॥ भीताश्चरन्ति च यतोऽर्कयमानिलाद्या
दृग्गो० ॥ ४ ॥ गायन्ति सामकुशला यमजं मखेषु
ध्यायन्ति धीरमतयो यतयो विविक्ते ॥ पश्यन्ति
योगिपुरुषाः पुरुषं शरीरे दृग्गो० ॥ ५ ॥ आकार-
रूपगुणयोगविवर्जितोऽपि भक्तानुकम्पननिमित्तगृ-
हीतमूर्त्तिः ॥ यः सर्वगोऽपि कृतशेषशरीरशय्यो
दृग्गो० ॥ ६ ॥ यस्यांघ्रिपङ्कजमनिद्रमुनीन्द्रवृन्दैरा-
राध्यते भवदवानलदाहशान्त्यै ॥ सर्वापराधमवि-
चिन्त्य ममाखिलात्मा दृग्गो० ॥ ७ ॥ यन्नामकीर्त-
नपरः श्वपचोऽपि नूनं हित्वाऽखिलं कलिमलं
भुवनं पुनाति ॥ दग्ध्वा ममाघमखिलं करुणेक्षणेन
दृग्गो० ॥ ८ ॥ दीनबन्ध्वष्टकं पुण्यं ब्रह्मानन्देन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाषितम् ॥ यः पठेत्प्रयतो नित्यं तस्य विष्णुः प्रसीदति ॥ ६ ॥

इति श्रीमत्प० स्वामीब्रह्मानन्दवि० श्रीदीनबन्ध्वष्टकं सम्पूर्णम् ॥ ८ ॥

---

४७ अच्युताष्टकम् ।

श्रीगणेशाय नमः ॥ अच्युतं केशवं राम नारायणं कृष्ण दामोदरं वासुदेवं हरिम् ॥ श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे ॥ १ ॥ अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाराधितम् ॥ इन्दिरामन्दिरं चेतसा सुन्दरं देवकीनन्दनं नन्दजं संदधे ॥ २ ॥ विष्णवे जिष्णवे शंखिने चक्रिणे रुक्मिणीरागिणे जानकीजानये ॥ वल्लवीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः ॥ ३ ॥ कृष्ण गोविन्द हे राम नारायण श्रीपते वासुदेवाजित श्रीनिधे ॥ अच्युतानन्त हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक ॥ ४ ॥ राक्षसक्षोभितः सीतया शोभितो दण्डका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रण्यभूपुण्यताकारणः ॥ लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसम्पूजितो राघवः पातु माम् ॥ ५ ॥ धेनुकारिष्टकाऽनिष्टकृद्द्वेषिणां केशिहा कंसहृद्वंशिकावादकः ॥ पूतनाकोपकः सूरजाखेलनो बालगोपालकः पातु मां सर्वदा ॥ ६ ॥ विद्युदुद्द्योतवान्प्रस्फुरद्वाससं प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम् ॥ वन्यया मालया शोभितोरःस्थलं लोहिताङ्घ्रिद्वयं वारिजाक्षं भजे ॥७॥ कुञ्चितैः कुन्तलैर्भ्राजमानाननं रत्नमौलिं लसत्कुण्डलं गण्डयोः हारकेयूरकं कङ्कणप्रोज्ज्वलं किङ्किणीमञ्जुलं श्यामलं तं भजे ॥८॥ अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पूरुषः सस्पृहम् ॥ वृत्ततः सुन्दरं कर्तृविश्वम्भरं तस्य वश्यो हरिर्जायते सत्वरम् ॥ ९ ॥

इति श्रीमच्छङ्कराचार्य्यविरचितमच्युताष्टकं सम्पूर्णम् ॥ ९ ॥

---

४८ षट्पदीस्तोत्रम् ।

श्रीगणेशाय नमः ॥ अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णाम् ॥ भूतदयां विस्तारय तारय संसारसागरतः ॥ १ ॥ दिव्यधु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीमकरन्दे परिकलपरिभोगसच्चिदानन्दे ॥ श्रीपति-पदारविन्दे भवभयखेदच्छिदे वन्दे ॥ २ ॥ सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ॥ सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः ॥ ३ ॥ उद्धृ-तनग नगभिदनुज दनुजकुलामित्र मित्रशशिदृष्टे ॥ दृष्टे भवति प्रभवति न भवति किं भवतिरस्कारः ॥ ४ ॥ मत्स्यादिभिरवतारैरवताऽवता सदा वसु-धाम् ॥ परमेश्वर परिपाल्यो भवता भवतापभीतो-ऽहम् ॥ ५ ॥ दामोदर गुणमन्दिर सुन्दरवदनार-विन्द गोविन्द ॥ भवजलधिमथनमन्दर परमं दर-मपनय त्वं मे ॥ ६ ॥ नारायण करुणामय शरणं करवाणि तावकौ चरणौ ॥ इति षट्पदीमदीये वदनसरोजे सदा वसतु ॥ ७ ॥

इति श्रीमच्छङ्कराचार्यविरचितं षट्पदीस्तोत्रं सम्पूर्णम् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४६ श्रीमधुसूदनस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ॐ इति ज्ञानमात्रेण रोगा जीर्णेन निर्जितः । कालनिद्रां प्रपन्नोऽस्मि त्राहि मां मधुसूदन ॥ १ ॥ न गतिर्विद्यते चान्या त्वमेव शरणं मम ॥ पापपङ्के निमग्नोऽस्मि त्राहि० ॥ २ ॥ मोहितो मोहजालेन पुत्रदारगृहादिषु ॥ तृष्णया पीड्यमानोऽस्मि त्राहि० ॥ ३ ॥ भक्तिहीनं च दीनं च दुःखशोकातुरं प्रभो ॥ अनाश्रयमनाथं च त्रा० ॥ ४ ॥ गतागतेन श्रान्तोऽस्मि दीर्घसंसारवर्त्मसु ॥ येन भूनो न गच्छामि त्रा० ॥ ५ ॥ बहवो हि मया दृष्टाः क्लेशाश्चैव पृथक् पृथक् ॥ गर्भवासे महद्-दुःखं त्रा० ॥ ६ ॥ तेन देव प्रपन्नोऽस्मि त्राणार्थं त्वत्परायणः ॥ दुःखार्णवपरित्राणात् त्रा० ॥ ७ ॥ वाचा यत्र प्रतिज्ञातं कर्मणा नोपपादितम् ॥ तत्पा-पार्जितमग्नोऽस्मि त्रा० ॥ ८ ॥ सुकृतं न कृतं किञ्चिद्दुष्कृतं च कृतं मया ॥ संसारघोरे मग्नो-ऽस्मि त्रा० ॥ ९ ॥ देहान्तरसहस्रेषु चान्योन्यभ्रा-मितो मया ॥ तिर्यक्त्वं मानुषत्वं च त्रा० ॥ १० ॥ वाचयामि यथोन्मत्तः प्रलपामि तवाग्रतः ॥ जरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मरणभीतोऽस्मि त्रा० ॥ ११ ॥ यत्र यत्र च यातोऽस्मि स्त्रीषु वा पुरुषेषु च तत्र तत्राचला भक्तिस्त्रा० ॥ १२ ॥ गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः ॥ अद्यापि न निवर्तन्ते द्वादशाक्षरचिन्तकाः ॥ १३ ॥ ऊर्ध्वपातालमर्त्येषु व्याप्तलोकजगत्त्रयम् ॥ द्वादशाक्षरात्परं नास्ति वासुदेवेन भाषितम् ॥१४॥ द्वादशाक्षरं महामन्त्रं सर्वकालमफलप्रदम् ॥ गर्भवासनिवासेन शुकेन परिभाषितम् ॥ १५ ॥ द्वादशाक्षरं निराहारो यः पठेद्धरिवासरे ॥ स गच्छेद्वैष्णवं स्थानं यत्र योगेश्वरो हरिः ॥ १६ ॥

इति श्रीशुकदेवविरचितं मधुसूदनस्तोत्रं सम्पूर्णम् ॥ ११ ॥

---

५० मुकुन्दमालास्तोत्रम् ।

श्रीगणेशाय नमः ॥ वन्दे मुकुन्दमरविन्ददलायताक्षं कुन्देन्दुशङ्खदशनं शिशुगोपवेषम् ॥ इन्द्रादिदेवगणवन्दितपादपीठं वृन्दावनालयमहं वसुदेवसूनुम् ॥ १ ॥ श्रीवल्लभेति वरदेति दयापरेति भक्तप्रियेति भवलुण्ठनकोविदेति ॥ नाथेति नागश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यनेति जगन्निवासेत्यालापिनं प्रतिदिनं कुरु मां कुमुन्द ॥ २ ॥ जयतु जयतु देवो देवकीनन्दनोऽयं जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ॥ जयतु जयतु मेघश्यामलः कोमलाङ्गो जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥ ३ ॥ मुकुन्द मूर्ध्ना प्रणिपत्य याचे भवन्तमेकान्तमियन्तमर्थम् ॥ अविस्मृतिस्त्वच्चरणारविन्दे भवे भवे मेऽस्तु तव प्रसादात् ॥४॥ श्रीगोविन्दपदाम्भोजमधुनो महदद्भुतम् ॥ यत्पायिनो न मुञ्चन्ति मुञ्चन्ति यदपायिनः ॥ ५ ॥ नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् ॥ रम्भारामामृदुतनुलतानन्दनेनापि रन्तुं भावे भावे हृदयभवने भावयेयं भवन्तम् ॥ ६ ॥ नास्था धर्मे न वसुनिचये नैव कामोपभोगे यद्यद्भाव्यं भवतु भगवन्पूर्वकर्मानुरूपम् ॥ एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥ ७ ॥ दिवि वा भुवि वा ममास्तु वासो नरके वा नरकान्तक प्रकामम् ॥ अवधीरितशारदारविन्दौ चरणौ ते मरणे विचिन्तयामि ॥ ८ ॥ सरसिजनयने सशंखचक्रे मुरभिदि मा विरमस्व चित्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रन्तुम् ॥ सुखतरमपरं न जातु जाने हरिचरणस्मरणामृतेन तुल्यम् ॥ ९ ॥ मा भैर्मन्दमनो विचिन्त्य बहुधा यामीश्चिरं यातना नैवामी प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ॥ आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥ १० ॥ भवजलधिगतानां द्वन्द्ववाताहतानां सुतदुहितृकलत्रत्राणभारावृतानाम् ॥ विषमविषयतोये मज्जतामप्लवानां भवति शरणमेको विष्णुपोतो नराणाम् ॥ ११ ॥ रजसि निपतितानां मोहजालावृतानां जननमरणदोलादुर्गसंसर्गगाणाम् ॥ शरणमशरणानामेक एवातुराणां कुशलपथनियुक्तश्चक्रपाणिर्नराणाम् ॥ १२ ॥ अपराधसहस्रसंकुलं पतितं भीमभवार्णवोदरे ॥ अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥ १३ ॥ मा मे स्त्रीत्वं मा च मे स्यात्कुभावो च मूर्खत्वं मा कुदेशेषु जन्म ॥ मिथ्यादृष्टिर्मा च मे स्यात्कदाचिज्जातौ जातौ विष्णुभक्तो भवेयम् ॥ १४ ॥ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतः स्वभावात् ॥ करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्कृतं यत्करिष्यामि तत्सर्वं न मया कृतम् ॥ त्वया कृतं तु फलभुक्त्वमेव मधुसूदन ॥ १६ ॥ भवजलधिमगाधं दुस्तरं निस्तरेयं कथमहमिति चेतो मा स्मगाः कातरत्वम् ॥ सरसिजदृशि देवे तावकी भक्तिरेका नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ॥ १७ ॥ तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले दारावर्ते तनयसहजग्राहसंघाकुले च ॥ संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन् पादाम्भोजे वरद भवतो भक्तिभावं प्रदेहि ॥ १८ ॥ पृथ्वीरेणुरणुःपयांसि कणिकाः फल्गुः स्फुलिङ्गो लघुस्तेजोनिःश्वसनं मरुत्तनुतरं रन्ध्रं सुसूक्ष्मं नभः ॥ क्षुद्रा रुद्रपितामहप्रभृतयः कीटाः समस्ताः सुरा दृष्टे यत्र स तारको विजयते श्रीपादधूलीकणः ॥ १९ ॥ आम्नायाभ्यसनान्यरण्यरुदितं कृच्छ्रव्रतान्यन्वहं भेदश्छेदपदानि पूर्तविधयः सर्वं हुतं भस्मनि ॥ तीर्थानामवगाहनानि च गजस्नानं विना यत्पदद्वन्द्वाम्भोरुहसंस्मृतिं विजयते देवः स नारायणः ॥ २० ॥ आनन्द गोविन्द मुकुन्द राम नारायणानन्त निरामयेति ॥ वक्तुं समर्थोऽपि न वक्ति कश्चिदहो जनानां व्यसनानि मोक्षे ॥ २१ ॥ क्षीर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सागरतरङ्गसीकरासारतारकितचारुमूर्तये ॥ भोगिभोगशयनीयशायिने माधवाय मधुविद्विषे नमः ॥ २२ ॥

इति श्रीकुलशेखरेण राज्ञा विरचितं मुकुन्दमालास्तोत्रं सम्पूर्णम् ॥ १२ ॥

---

५१ मुरारिपञ्चरत्नम् ।

श्रीगणेशाय नमः ॥ यत्सेवनेन पितृमातृसहोदराणां चित्तं न मोहमहिमा मलिनंकरोति ॥ इत्थं समीक्ष्य तव भक्तजनान् मुरारे मूकोऽस्मि तेऽङ्घ्रिकमलं तदतीव धन्यम् ॥ १ ॥ ये ये विलग्नमनसः सुखमाप्तुकामास्ते ते भवन्ति जगदुद्भवमोदशून्याः ॥ दृष्ट्वा विनष्टधनधान्यगृहान् मुरारे मू० ॥ २ ॥ वस्त्राणि दिग्वलयमावसतिः श्मशाने पात्रं कपालमहिमुण्डविभूषणानि ॥ रुद्रे प्रसादमचलं तव वीक्ष्य शौरे मू० ॥ ३ ॥ यत्कीर्तिगायनपरस्य विधातृसूनोः कौपीनमैणमजिनं विपुलां विभूतिम् ॥ स्वार्थे च दिभ्रमणमीक्ष्य तु सर्वकालं मू० (१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ४ ॥ यद्वीक्षणे धृतधियामशनं फलादि वासोऽपि निर्जनवने गिरिकन्दरासु ॥ वासांसि वल्कलमयानि विलोक्य चैवं मूकोऽस्मि० ॥ ५ ॥ स्तोत्रं पादाम्बुजस्यैतच्छ्रीशस्य विजितेन्द्रियः ॥ पठित्वा-तत्पदं याति श्लोकार्थज्ञस्तु यो नरः ॥ ६ ॥

इति श्रीमालवशुक्लमथुरानाथपण्डितेन्द्रकृतं सुरारिपञ्चरत्नम् ॥ १३ ॥

---

५२ शालिग्रामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीशालिग्रामस्तोत्रमन्त्रस्य श्रीभगवान्ऋषिः । नारायणो देवता । अनुष्टुप्छन्दः । श्रीशालिग्रामस्तोत्रमन्त्रजपे विनियोगः । युधिष्ठिर उवाच ॥ श्रीदेवदेवदेवेश देवतार्चनमुत्तमम् ॥ तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरुषोत्तम ॥ १ ॥ श्रीभगवानुवाच ॥ गण्डक्याश्चोत्तरे तीरे गिरिराजस्य दक्षिणे ॥ दशयोजनविस्तीर्णा महाक्षेत्रवसुन्धरा ॥ २ ॥ शालिग्रामो भवेद्देवो देवी द्वारावती भवेत् ॥ उभयोः सङ्गमो यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुक्तिस्तत्र न संशयः ॥ ३ ॥ शालिग्रामशिला यत्र तत्र द्वारावती शिला ॥ उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥ ४ ॥ आजन्मकृतपापानां प्रायश्चित्तं य इच्छिति ॥ शालिग्रामशिलावारि पापहारि नमोऽस्तु ते ॥ ५ ॥ अकालमृत्युहरणं सर्वव्याधिविनाशनम् ॥ विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ॥ ६ ॥ शङ्खमध्ये स्थितं तोयं भ्रामितं केशवोपरि ॥ अङ्गलग्नं मनुष्याणां ब्रह्महत्यादिकं दहेत् ॥ ७ ॥ स्नानोदकं पिबेन्नित्यं चक्राङ्कितशिलोद्भवम् ॥ प्रक्षाल्य शुद्धं तत्तोयं ब्रह्महत्यां व्यपोहति ॥ ८ ॥ अग्निष्टोमसहस्राणि वाजपेयशतानि च ॥ सम्यक्फलमवाप्नोति विष्णोर्नैवेद्यभक्षणात् ॥ ९ ॥ नैवेद्ययुक्तां तुलसीं च मिश्रितां विशेषतः पादजलेन विष्णोः ॥ योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यम् ॥ १० ॥ खण्डिताः स्फुटिता भिन्ना अग्निदग्धास्तथैव च ॥ शालिग्रामशिला यत्र तत्र दोषो न विद्यते ॥ ११ ॥ न मन्त्रः पूजनं नैव न तीर्थं न च भावना ॥ न स्तुतिर्नोपचारश्च शालिग्रामशिलार्चने ॥ १२ ॥ ब्रह्महत्यादिकं पापं मनोवाक्कायसम्भवम् ॥ शीघ्रं नश्यति तत्सर्वं शालिग्राम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिलार्चनात् ॥ १३ ॥ नानावर्णमयं चैव नानाभोगेन वेष्टिम् ॥ तथा वरप्रसादेन लक्ष्मीकान्तं वदाम्यहम् ॥ १४ ॥ नारायणोद्भवो देवश्चक्रमध्ये च कर्मणा ॥ तथा वरप्रसादेन लक्ष्मीकान्तं वदाम्यहम् ॥ १५ ॥ कृष्णे शिलातले यत्र सूक्ष्मं चक्रं सुदृश्यते ॥ सौभाग्यं सन्तति धत्ते सर्वसौख्यं ददाति च ॥ १६ ॥ वासुदेवस्य चिह्नानि दृष्ट्वा पापैः प्रमुच्यते ॥ श्रीधरः सुकरे वामे हरिद्वर्णस्तु दृश्यते वाराहरूपिणं देवं कूर्माङ्गैरपि चिह्नितम् ॥ गोपदं तत्र दृश्येत वाराहं वामनं तथा ॥ १८ ॥ पीतवर्णस्तु देवानां रक्तवर्णो भयावहः ॥ नारसिंहो भवेद्देवो मोक्षदश्च प्रकीर्तितः ॥ १९ ॥ शंखचक्रगदाकूर्माः शंखो यत्र प्रदृश्यते ॥ शंखवर्णस्य देवानां वामदेवस्य लक्षणम् ॥ २० ॥ दामोदरं तथा स्थूलं मध्ये चक्रं प्रतिष्ठितम् ॥ पूर्णद्वारेण संकीर्णा पीतरेखा च दृश्यते ॥ २१ ॥ छत्राकारे भवेद्राज्यं वर्तुले च महाश्रियः ॥ कपटे च महादुःखं शूलाग्रे तु रणं ध्रुवम् ॥ २२ ॥ ललाटे शेषभोगस्तु शिरोपरि सुकाञ्चनम् ॥ चक्रकाञ्चनवर्णानां वामदेवस्य लक्षणम् ॥ २३ ॥ वामपार्श्वे च वै चक्रे कृष्णवर्णस्तु पिङ्ग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लम् ॥ लक्ष्मीनृसिंहदेवानां पृथग्वर्णस्तु दृश्यते ॥ २४ ॥ लम्बोष्ठे च दरिद्रं स्यात्पिङ्गले हानिरेव च ॥ लग्नचक्रे भवेद्व्याधिर्विदारे मरणं ध्रुवम् ॥ २५ ॥ पादोदकं च निर्माल्यं मस्तके धारयेत्सदा ॥ विष्णोर्दृष्टं भक्षितव्यं तुलसीदलमिश्रितम् ॥ २६ ॥ कल्पकोटिसहस्राणि वैकुण्ठे वसते सदा ॥ शालिग्रामशिलाविन्दुर्हत्याकोटिविनाशनः ॥ २७ ॥ तस्मात्सम्पूजयेद्ध्यात्वा पूजितं चापि सर्वदा ॥ शालिग्रामशिलास्तोत्रं यः पठेच्च द्विजोत्तमः ॥ २८ ॥ स गच्छेत्परमं स्थानं यत्र लोकेश्वरो हरिः ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ २९ ॥ दशावतारो देवानां पृथग्वर्णस्तु दृश्यते ॥ ईप्सितं लभते राज्यं विष्णुपूजामनुक्रमात् ॥ ३० ॥ कोट्यो हि ब्रह्महत्यानामगम्यागम्यकोटयः ॥ ताः सर्वा नाशमायान्ति विष्णुनैवेद्यभक्षणात् ॥ ३१ ॥ विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनम् ॥ तस्मादष्टगुणं पापं भूमौ विन्दुनिपातनात् ॥ ३२ ॥

इति शालिग्रामस्तोत्रं सम्पूर्णम् ॥ १४ ॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५३ नारायणस्तोत्रम्।

श्रीगणेशाय नमः॥ नारायण नारायण जय गोविन्द हरे। नारायण नारायण जय गोपाल हरे॥ ध्रु०॥ करुणापारावारा वरुणालयगम्भीरा॥ नारायण०॥ १॥ घननीरदसंकाशा कृतकलिकल्मषनाशा॥ नारा०॥ २॥ यमुनातीरविहारा धृतकौस्तुभमणिहारा॥ नारायण०॥ ३॥ पीताम्बरपरिधाना सुरकल्याणनिधाना॥ नारा॥ ४॥ मञ्जुलगुञ्जाभूषा मायामानुषवेषा॥ नारा०॥ ५॥ राधाऽधरमधुरसिका रजनीकरकुलतिलका॥ नारा०॥ ६॥ मुरलीगानविनोदा वेदस्तुतभूपादा॥ नारायण०॥ ७॥ वर्हिनिबर्हापीडा नटनाटकफणिक्रीडा॥ नारा०॥ ८॥ वारिजभूषाभरणा राजीवरुक्मिणीरमणा॥ ९॥ जलरुहदलनिभनेत्रा जगदारम्भकसूत्रा॥ नारा०॥ १०॥ पातकरजनीसंहर करुणालय मामुद्धर॥ नारा०॥ ११॥ अघबकक्षय कंसारे केशव कृष्ण मुरारे॥ नारा०॥ १२॥ हाटकनिभपीताम्बर अभयं कुरु मे मावर॥ नारा०॥ १३॥ दशरथराजकुमारा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दानवमदसंहारा ॥ नारा० ॥ १४ ॥ गोवर्धनगिरिरमणा गोपीमानसहरणा ॥ नारा० ॥ १५ ॥ सरयूतीरविहारा सज्जनऋषिमन्दारा ॥ नारा० ॥ १६ ॥ विश्वामित्रमखत्रा विविधपरासुचरित्रा ॥ नारायण० ॥ १७ ॥ ध्वजवज्राङ्कुशपादा धरणीसुतसहमोदा ॥ नारा० ॥ १८ ॥ जनकसुताप्रतिपाला जय जय संस्मृतिलीला ॥ नारायण० ॥ ॥ १९ ॥ दशरथवाग्धृतिभारा दण्डकवनसंचारा ॥ नारायण० ॥ २० ॥ मुष्टिकचाणूरसंहारा मुनिमानसविहारा ॥ नारायण० ॥ २१ ॥ वालिविनिग्रहशौर्या वरसुग्रीवहितार्या ॥ नारायण० ॥ २२ ॥ मां मुरलीकर धीवर पालय पालय श्रीधर ॥ नारायण० ॥ २३ ॥ जलनिधिबन्धनधीरा रावणकण्ठविदारा ॥ नारायण० ॥ २४ ॥ ताटीमददलनाढ्या नटगुणविविधधनाढ्या ॥ नारा० ॥ २५ ॥ गौतमपत्नीपूजन करुणाघनावलोकन ॥ नारायण० ॥ २६ ॥ संभ्रमसीताहारा साकेतपुरविहारा ॥ नारायण० ॥ २७ ॥ अचलोद्धृतिचञ्चत्कर भक्तानुग्रहतत्पर ॥ नारायण० ॥ २८ ॥ नैगमगानविनोदा रक्षः सुतप्रह्लादा ॥ नारायण० ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भारतियतिवरशङ्कर नामामृतमखिलान्तर ॥ नारायण नारायण जय गोपाल हरे ॥ ३० ॥

इति श्रीमच्छङ्कराचार्यविरचित नारायणस्तोत्रं सम्पूर्णम् ॥ १५ ॥

---

५४ विष्णुस्तवराजः ।

श्रीगणेशाय नमः ॥ पद्मोवाच ॥ योगेन सिद्धविबुधैः परिभाव्यमानं लक्ष्म्यालयं तुलसिकाचितभक्तभृङ्गम् ॥ प्रोत्तुङ्गरक्तनखराङ्गुलिपत्रचित्रं गङ्गारसं हरिपदाम्बुजमाश्रयेऽहम् ॥ १ ॥ गुम्फन्मणिप्रचयघट्टितराजहंससिञ्जत्सुनूपुरयुतं पदपद्मवृन्दम् ॥ पिताम्बराञ्चलविलोलचत्पताकं सवर्णत्रिवक्रवलयं च हरेः स्मरामि ॥ २ ॥ जङ्घे सुपर्णगलनीलमणिप्रवृद्धे शोभास्पदारुणमणिद्युतिचञ्चुमध्ये ॥ आरक्तपादतलम्बनशोभमाने लोकेक्षणोत्सवकरे च हरेः स्मरामि ॥ ३ ॥ ते जानुनी मखपतेर्भुजमूलसङ्गरङ्गोत्सवावृततडिद्वसने विचित्रे ॥ चञ्चत्पतत्रिमुखनिर्गतसामगीतविस्तारितात्मयशसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च हरेः स्मरामि ॥ ४ ॥ विष्णोः कटिं विधिकृतान्तमनोजभूमिं जीवाण्डकोशगणसङ्गदुकूलमध्याम् ॥ नानागुणप्रकृतिपीतविचित्रवस्त्रां ध्याये निबद्धवसनां खगपृष्ठसंस्थाम् ॥ ५ ॥ शान्तोदरं भगवतस्त्रिवलिप्रकाशमावर्तनाभिविकसद्विधिजन्मपद्मम् ॥ नाडीनदीगणरसोत्थसितान्त्रसिन्धुं ध्यायेऽण्डकोशनिलयं तनुलोमरेखम् ॥ ६ ॥ वक्षःपयोधितनयाकुचकुङ्कुमेन हारेण कौस्तुभमणिप्रभया विभातम् ॥ श्रीवत्सलक्ष्महरिचन्दनजप्रसूनमालोचितं भगवतः सुभगं स्मरामि ॥ ७ ॥ बाहू सुवेषसदनौ वलयाङ्गदादिशोभास्पदौ दुरितदैत्यविनाशदक्षौ ॥ तौ दक्षिणौ भगवतश्च गदासुनाभतेजोर्जितौ सुललितौ मनसा स्मरामि ॥ ८ ॥ वामौ भुजौ मुररिपोर्धृतपद्मशंखौ श्यामौ करीन्द्रकरवन्मणिभूषणाढ्यौ ॥ रक्ताङ्गुलिप्रचयचुम्बितजानु मध्यौ पद्मालयाप्रियकरौ रुचिरौ स्मरामि ॥ ९ ॥ कण्ठं मृणालममलं मुखपङ्कजस्य लेखात्रयेण वनमालिकया निवीतम् ॥ किं वा विमुक्तिवशमन्त्रकसत्फलस्य वृन्तं चिरं भगवतः सुभगं स्मरामि ॥ १० ॥ वक्त्राम्बुजं दशनहासविकासरम्यं रक्ताधरौष्ठवरकोमलवाक्सु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धाढ्यम् ॥ सन्मानसोद्भवचलेक्षणपत्रचित्रं लोका-
भिराममलं च हरेः स्मरामि ॥ ११ ॥ सुरात्म-
जावसथगन्धमिदं सुनासं भ्रूपल्लवं स्थितिलयोदय-
कर्मदक्षम् ॥ कामोत्सवं च कमलाहृदयप्रकाशं
सञ्चिन्तयामि हरिवक्त्रविलासदक्षम् ॥ १२ ॥ कर्णो
लसन्मकरकुण्डलगन्धलोलौ नानादिशां च नसभश्च
विकासगेहम् ॥ लोलालकप्रचयचुम्बनकुञ्चिताग्रौ
लग्नौ हरेर्मणिकिरीटतटे स्मरामि ॥ १३ ॥ भालं
विचित्रतिलकं प्रियचारुगन्धगोरोचनारचनया
ललनाक्षिसख्यम् ॥ ब्रह्मैकधाम मणिकान्तकिरीट-
जुष्टं ध्याये मनोनयनहारकमीश्वरस्य ॥ १४ ॥
श्रीवासुदेवचिकुर कुटिलं निबद्धं नानासुगन्धि-
कुसुमैः स्वजनादरेण ॥ दीर्घं रमाहृदयगाशमनं
धुनन्तं ध्यायेऽम्बुवाहरुचिरं हृदयाब्जमध्ये ॥१५॥
मेघाकारं सोमसूर्यप्रकाशं सुभ्रून्नासं शक्रचापैक-
मानम् ॥ लोकातीतं पुण्डरीकायताक्षं विद्युच्चैलं
चाश्रयेऽहं त्वपूर्वम् ॥ १६ ॥ दीनं हीनं सेवया
दैवगत्या पापैस्तापैः पूरितं मे शरीरम् ॥ लोभा-
क्रान्तं शोकमोहादिविद्धं कृपादृष्ट्या पाहि मां वासु-
देव ॥ १७ ॥ ये भक्त्याऽद्यां ध्यायमाना मनोज्ञां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यक्ति विष्णोः षोडशश्लोकपुष्पै ॥ स्तुत्वा नत्वा पूजयित्वा विधिज्ञाः शुद्धा मुक्ता ब्रह्मसौख्यं प्रयान्ति ॥ १८ ॥ पद्मेरितमिदं पुण्यं शिवेन परिभाषितम् ॥ धन्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं परम् ॥ १९ ॥ पठन्ति ये महाभागास्ते मुच्यन्तेंऽहसोऽखिलात् ॥ धर्मार्थकाममोक्षाणां परत्रेह फलप्रदम् ॥ २० ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये पद्म-
प्रोक्ते विष्णुस्तवराजः समाप्तः ॥ १९ ॥

इति विष्णुस्तोत्राणि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ सूर्यस्तोत्राणि ।

५५ आदित्यहृदयस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ॥ १ ॥ दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ॥ उपगम्याब्रवीद्राममगस्त्यो भगवांस्तदा ॥ २ ॥ राम राम महाबाहो शृणु गुह्यं सनातनम् ॥ येन सर्वानरीन् वत्स समरे विजयिष्यसे ॥ ३ ॥ आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ॥ जयावहं जपेन्नित्यमक्षयं परमं शिवम् ॥ ४ ॥ सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ॥ ५ ॥ रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ॥ पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥ ६ ॥ सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ॥ एष देवासुरगणाँल्लोकान् पातु गभस्तिभिः ॥ ७ ॥ एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ॥ महेन्द्रो धनदः कालो यमः सोमो ह्यपाम्पतिः ॥ ८ ॥ पितरो वसवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साध्या अश्विनौ मरुतो मनुः ॥ वायुर्वह्निः प्रजाप्राण ऋतुकर्ता प्रभाकरः ॥ ९ ॥ आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ॥ सुवर्णस्तपनो भानुः स्वर्णरेता दिवाकरः ॥ १० ॥ हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ॥ तिमिरोन्मथनः शम्भुस्त्वष्टा मार्तंडकोंऽशुमान् ॥ ११ ॥ हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः ॥ अग्निगर्भोऽदितेः पुत्रः शंखः शिशिरनाशनः ॥ १२ ॥ व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ॥ घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवङ्गमः ॥ १३ ॥ आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ॥ कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥ १४ ॥ नक्षत्रग्रहताराणामधिपो विश्वभावनः ॥ तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते ॥ १५ ॥ नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ॥ ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ १६ ॥ जयाय जयभद्राय हर्यश्वाय नमो नमः ॥ नमो नमः सहस्रांशो आदित्याय नमो नमः ॥ १७ ॥ नम उग्राय वीराय सारङ्गाय नमो नमः ॥ नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते ॥ १८ ॥ ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९ ॥
तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ॥ कृत-
घ्नघ्नाय देवाय ज्योतिषाम्पतये नमः ॥ २० ॥ तप्त-
चामीकराभाय हरये विश्वकर्मणे ॥ नमस्तमोऽभि-
निघ्नाय रुचये लोकसाक्षिणे ॥ २१ ॥ नाशयत्येष
वै भूतं तदेव सृजति प्रभुः ॥ पायत्येष तपत्येष
वर्षत्येष गभस्तिभिः ॥ २२ ॥ एष सुप्तेषु जागर्ति
भूतेषु परिनिष्ठितः ॥ एष चैवाग्निहोत्रं च फलं चैवा-
ग्निहोत्रिणाम् ॥ २३ ॥ देवाश्च ऋतवश्चैव क्रतूनां
फलमेव च ॥ यानि कृत्यानि लोकेषु सर्वेषु परम-
प्रभुः ॥ २४ ॥ एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु
च ॥ कीर्तयन्पुरुषः कश्चिन्नावसीदति राघव ॥२५॥
पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ॥ एतत्त्रि-
गुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ २६ ॥
अस्मिन्क्षणे महाबाहो रावणं त्वं जयिष्यसि ॥
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ॥२७॥
एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ॥ धार-
यामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २८ ॥
आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान् ॥ त्रिरा-
चम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रावणं प्रेक्ष्य हृष्टात्मा युद्धार्थं समुपागमत् ॥ सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥ ३० ॥ अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ॥ निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥ ३१ ॥

इत्यार्षे आदित्यहृदयस्तोत्रं समाप्तम् ॥ १ ॥

---

५६ सूर्याष्टकम् ।

श्रीगणेशाय नमः ॥ प्रभाते यस्मिन्नभ्युदितसमये कर्मसु नृणां प्रवर्तेद्वै चेतो गतिरपि च शीतापहरणम् ॥ गतो मैत्र्यं पृथ्वीसुरकुलपतेर्यश्च तमहं नमामि श्रीसूर्यं तिमिरहरणं शान्तशरणम् ॥ १ ॥ त्रिनेत्रोऽप्यञ्जल्या सुरमुकुटसंघृष्टचरणो बलिं नीत्वा नित्यं स्तुतिमुदितकालास्तसमये ॥ निधानं यस्यायं कुरुत इति धाम्नामधिपतिर्नमामि० ॥ २ ॥ मृगाङ्के मूर्तित्वं ह्यमरगणभर्ता कृत इति नृणां वर्त्मातमात्मेत्तिणितविदुषां यश्च यजताम् ॥ ऋतुर्लोकानां यो लयभरभवेषु प्रभुरयं नमा० ॥ ३ ॥ दिशः खं कालो भूरुदधिरचलं चाक्षुषमिदं विभागो येनायं निखिलमहसा दीपयति तान् ॥ स्वयं शुद्धं संविन्निरति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शयमानन्दमजरं नमामि० ॥ ४ ॥ वृषात्पञ्चस्वेत्यौ-
ढयति दिनमामन्दगमनस्तथा वृद्धिं रात्रौ प्रकटयति
कीटाज्जवगतिः ॥ तुले मेषे यातो रचयति समानं
दिननिशं नमामि० ॥ ५ ॥ वहन्ते यं ह्यश्वा अरुण-
विनियुक्ताः प्रमुदितास्त्रयीरूपं साक्षाद्दधति च रथं
मुक्तिसदनम् ॥ न जीवानां यं वै विषयति मनो
वागवसरो नमामि० ॥ ६ ॥ तथा ब्रह्मा नित्यं
मुनिजनयुता यस्य पुरतश्चलन्ते नत्यन्तोऽयुतभुत
रसेनानुगुणितम् ॥ निबध्नन्तो नागा रथमपि च
नागायुतबला नमामि० ॥ ७ ॥ प्रभाते ब्रह्माणं
शिवतनुभृतं मध्यदिवसे तथा सायं विष्णुं जगति
हितकारी सुखकरम् ॥ सदा तेजोराशिं त्रिविधमथ
पापौघशमनं नमा० ॥ ८ ॥ सतं शास्त्राणां यत्तदनु
रघुनाथेन रचितं शुभं चुंराग्रामे तिमिरहरसूर्याष्ट-
कमिदम् ॥ त्रिसन्ध्यायां नित्यं पठति मनुजोऽनन्य-
गतिमांश्चतुर्वर्गप्राप्तौ प्रभवति सदा तस्य विजयम्
॥ ९ ॥ नन्देन्द्वङ्कक्षिताब्दे (१९१९) मार्गमासे शुभे
दले ॥ सूर्याष्टकमिदं प्रोक्तं दशम्यां रविवासरे ॥१०॥

इति श्रीपण्डितरघुनाथशर्मणा विरचितं श्री-
सूर्याष्टकं सम्पूर्णम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५७ त्रैलोक्यमङ्गलं सूर्यकवचम् ।

श्रीगणेशाय नमः ॥ श्रीसूर्य उवाच । साम्ब साम्ब महाबाहो शृणु मे कवचं शुभम् ॥ त्रैलोक्यमङ्गलं नाम कवचं परमाद्भुतम् ॥ १ ॥ यज्ज्ञात्वा मन्त्रवित्सम्यक् फलमाप्नोति निश्चितम् ॥ यद्धृत्वा च महादेवो गणानामधिपोऽभवत् ॥ २ ॥ पठनाद्धारणाद्विष्णुः सर्वेषां पालकः सदा ॥ एवमिन्द्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः ॥ ३ ॥ कवचस्य ऋषिर्ब्रह्मा छन्दोऽनुष्टुबुदाहृतः ॥ श्रीसूर्यो देवता चात्र सर्वदेवनमस्कृतः ॥ ४ ॥ यश आरोग्यमोक्षेषु विनियोगः प्रकीर्तितः ॥ प्रणवो मे शिरः पातु घृणिर्मे पातु भालकम् ॥ ५ ॥ सूर्योऽव्यान्नयनद्वन्द्वमादित्यः कर्णयुग्मकम् ॥ अष्टाक्षरो महामन्त्रः सर्वाभीष्टफलप्रदः ॥ ६ ॥ ह्रीं बीजं मे मुखं पातु हृदयं भुवनेश्वरी ॥ चन्द्रबिम्बं विंशदाद्यं पातु मे गुह्यदेशकम् ॥ ७ ॥ अक्षरोऽसौ महामन्त्रः सर्वतन्त्रेषु गोपितः ॥ शिवो वह्निसमायुक्तो वामाक्षीबिन्दुभूषितः ॥ ८ ॥ एकाक्षरो महामन्त्रः श्रीसूर्यस्य प्रकीर्तितः ॥ गुह्याद्गुह्यतरो मन्त्रो वाञ्छाचिन्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मणिः स्मृतः ॥ ९ ॥ शीर्षादिपादपर्यन्तं सदा पातु मनूत्तमः ॥ इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभम् ॥ १० ॥ श्रीप्रदं कान्तिदं नित्यं धनारोग्यविवर्धनम् ॥ कुष्ठादिरोगशमनं महाव्याधिविनाशनम् ॥ ११ ॥ त्रिसन्ध्यं यः पठेन्नित्यमरोगी बलवान्भवेत् ॥ बहुना किमिहोक्तेन यद्यन्मनसि वर्तते ॥ १२ ॥ तत्तत्सर्वं भवेत्तस्य कवचस्य च धारणात् ॥ भूतप्रेतपिशाचाश्च यक्षगन्धर्वराक्षसाः ॥ १३ ॥ ब्रह्मराक्षसवेताला न द्रष्टुमपि तं क्षमाः ॥ दूरादेव पलायन्ते यस्य सङ्कीर्तनादपि ॥ १४ ॥ भूर्जपत्रे समालिख्य रोचनागुरुकुङ्कुमैः ॥ रविवारे च संक्रान्त्यां सप्तम्यां च विशेषतः ॥ धारयेत्साधकश्रेष्ठः श्रीसूर्यस्य प्रियो भवेत् ॥ १५ ॥ त्रिलोकमध्यगं कृत्वा धारयेद्दक्षिणे करे ॥ शिखायामथवा कण्ठे सोऽपि सूर्यो न संशयः ॥ १६ ॥ इति ते कथितं साम्ब त्रैलोक्यमङ्गलाभिधम् ॥ कवचं दुर्लभं लोके तव स्नेहात्प्रकाशितम् ॥ १७ ॥ अज्ञात्वा कवचं दिव्यं यो जपेत्सूर्यमुत्तमम् । सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥ १८ ॥

इति श्रीब्रह्मयामले त्रैलोक्यमङ्गलं नाम सूर्यकवचं सम्पूर्णम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५८ सूर्यार्यास्तोत्रम् ।

श्रीगणेशाय नमः ॥ शुकतुण्डच्छविसवितुश्चण्डरुचेः पुण्डरीकवनबन्धोः ॥ मण्डलमुदितं वन्दे कुण्डलमाखण्डलाशायाः ॥ १ ॥ यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोऽपि ॥ कुरुतेऽञ्जलिं त्रिनेत्रः स जयति धाम्नां निधिः सूर्यः ॥ २ ॥ उदयाचलतिलकाय प्रणतोऽस्मि विवस्वते ग्रहेशाय ॥ अम्बरचूडामणये दिग्वनिताकर्णपूराय ॥३॥ जयति जनानन्दकरः करनिकरनिरस्ततिमिरसङ्घातः ॥ लोकालोकालोकः कमलारुणमण्डलः सूर्यः ॥ ४ ॥ प्रतिबोधितकमलवनः कृतघटनश्चक्रवाकमिथुनानाम् ॥ दर्शितसमस्तभुवनः परहितनिरतो रविः सदा जयति ॥ ५ ॥ अपनयतु सकलकलिकृतमलपटलं संप्रतप्तकनकाभः ॥ अरविन्दवृन्दविघटनपटुतरकिरणोत्करः सविता ॥ ६ ॥ उदयाद्रिचारुचामरहरितहयखुरपरिहतरेणुराग ॥ हरितहय हरितपरिकर गगनाङ्गनदीपक नमस्ते ॥ ७ ॥ उदितवति त्वयि विकसति मुकुलीयति समस्तमस्तमितबिम्बे ॥ नह्यन्यस्मिन्दिनकर सकलं कम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF.

लायते भुवनम् ॥ ८ ॥ जयति रविरुदयसमये बालातपः कनकसन्निभो यस्य ॥ कुसुमाञ्जलिरिव जलधौ तरन्ति रथसप्तयः सप्त ॥ ९ ॥ आर्याः साम्बपुरे सप्त आकाशात्पतिता भुवि ॥ यस्य कण्ठे गृहे वापि न स लक्ष्म्या वियुज्यते ॥ १० ॥ आर्याः सप्त सदा यस्तु सप्तम्यां सप्तधा जपेत् ॥ तस्य गेहं च देहं च पद्मा सत्यं न मुञ्चति ॥ ११ ॥ निधिरेष दरिद्राणां रोगिणां परमौषधम् ॥ सिद्धिः सकलकार्याणां गाथेयं संस्मृता रवेः ॥ १२ ॥

इति श्रीयाज्ञवल्क्यविरचितं सूर्यार्यास्तोत्रं सम्पूर्णम् ॥ ४ ॥

---

५६ गद्यात्मकं सूर्यस्तोत्रम् ।

श्रीगणेशाय नमः ॥ याज्ञवल्क्य उवाच ॥ ॐ नमो भगवते आदित्यायाखिलजगतामात्मस्वरूपेण कालस्वरूपेण चतुर्विधभूतनिकायानां ब्रह्मादिस्तम्बपर्यन्तानामन्तर्हृदयेषु बहिरपि च आकाश इव उपाधिनाऽव्यवधीयमानो भगवानेक एव क्षणलव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निमेषावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति ॥ १ ॥ यदुह वाव विबुधर्षभ सवितरदस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजावभर्जनभगवतः समभिधीमहि तपनमण्डलम् ॥ २ ॥ य इह वाव स्थिरचरनिकराणां निजनिकेतनानां मनइन्द्रियासुगणानात्मनः स्वयमात्माऽन्तर्यामी प्रचोदयति ॥ ३ ॥ य एवेमं लोकं अतिकरालवदनान्धकारसंज्ञाजगरग्रहगिलितसंमृतकमिव विचेतनमवलोक्याऽनुकम्पया परमकारुणिकवीक्षयैव उत्थाप्य अहरहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्थाने प्रवर्तयति अवनिपतिरिव असाधूनां भयमुदीरयन्नटति ॥ ४ ॥ परित आशापालैस्तत्र तत्र कमलकोशाञ्जलिभिरुपहृताहणः ॥ ५ ॥ अथ हे भगवंस्तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्वन्दितमहमयातयामयजुः काम उपसरामीति ॥ ६ ॥

इति श्रीमद्भागवतान्तर्गतं गद्यात्मकं सूर्यस्तोत्रं संपूर्णम् ॥ ५ ॥

इति सूर्यस्तोत्राणि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ देवीस्तोत्राणि ।

—*:-:*—

६० श्रीसूक्तम् ।

श्रीगणेशाय नमः ॥ ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ॥ चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह ॥ १ ॥ तां मऽआवह जातवेदो लक्ष्मीमनपगामिनीम् ॥ यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ॥ श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ ३ ॥ कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ॥ पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ४ ॥ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ॥ तां पद्मनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ॥ ५ ॥ आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ॥ तस्य फलानि तपसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नुदन्तु मायान्तरा याश्च बाह्या अलक्ष्मीः ॥ ६ ॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह ॥ प्रादु-
र्भूतो सुराष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ ७ ॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ॥
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥ ८ ॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ॥
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ९ ॥
मनसः काममाकूतिं वाचः सत्यमशीमहि ॥ पशूनां
रूपमन्नस्य मयि श्रीः श्रयतां यशः । १० ॥ कर्दमेन
प्रजाभूता मयि सम्भव कर्दम ॥ श्रियं वासय मे
कुले मातरं पद्ममालिनीम् ॥ ११ ॥ आपः सृजन्तु
स्निग्धानि चिक्लीत वस मे गृहे ॥ निच देवीं
मातरं श्रियं वासय मे कुले ॥ १२ ॥ आर्द्रां पुष्क-
रिणीं पुष्टिं सुवर्णां हेममालिनीम् ॥ सूर्यां हिर-
ण्मयीं लक्ष्मीं जातवेदो मऽआवह ॥ १३ ॥ आर्द्रां
यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ॥ चन्द्रां
हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह ॥ १४ ॥
तां मऽआवह जातवेदो लक्ष्मीमनपगामिनीम् ॥
यस्यां हिरण्यं प्रभूतिं गावो दास्योश्वान्विन्देयं
पुरुषानहम् ॥ १५ ॥ यः शुचिः प्रयतो भूत्वा जुहु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यादाज्यमन्वहम् ॥ श्रियः पञ्चदशर्चञ्च श्रीकामः
सततं जपेत् ॥ १६ ॥ सरसिजनिलये सरोजहस्ते
धवलतरांशुकगन्धमाल्यशोभे ॥ भगवति हरि-
वल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम्
॥ १७ ॥ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ॥
धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्विनौ ॥ १८ ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ॥ सोमं
धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ १९ ॥ न
क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ॥
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥२०॥
पद्मानने पद्मऊरू पद्माक्षी पद्मसम्भवे ॥ तन्मे
भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥ २१ ॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ॥
विष्णुप्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ २२ ॥
महालक्ष्मी च विद्महे विष्णुपत्नीं च धीमहि ॥
तन्नो लक्ष्मीः प्रचोदयात् ॥ २३ ॥ पद्मानने पद्मिनि
पद्मसम्भवे पद्मप्रिये पद्मदलायताक्षि ॥ विश्वप्रिये
विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व
॥ २४ ॥ आनन्दः कर्दमः श्रीदश्चिक्लीत इति
विश्रुताः ॥ ऋषयः श्रियपुत्राश्च मयि श्रीदेवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवता ॥ २५ ॥ ऋणरोगादिदारिद्र्यं पापञ्च अपमृत्यवः भयशोकमनस्तापा नश्यन्तु मम सर्वदा ॥ २६ ॥ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते ॥ धनं धान्यं पशून् बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ २७ ॥

इति अथर्वं श्रीसूक्तम् ॥ १ ॥

श्रीलक्ष्मीहृदयम् ।

श्रीगणेशाय नमः ॥ आद्यादि श्रीमहालक्ष्मीहृदयस्तोत्रमन्त्रस्य भार्गव ऋषिः । आद्यादि श्रीमहालक्ष्मीर्देवता । अनुष्टुबादिनानाविधानि छन्दांसि । श्रीं बीजम् । ह्रीं शक्तिः । ऐं कीलकम् । आद्यादि श्रीमहालक्ष्मीप्रीत्यर्थे जपे विनियोगः ॥ श्रींबीजेन षड्वारं करशुद्धिं कुर्यात् ॥ अथ अङ्गन्यासः ॥ ॐभार्गवऋषये नमः शिरसि । अनुष्टुबादिनानाछन्दोभ्यो नमः मुखे । आद्यादि श्रीमहालक्ष्म्यै देवतायै नमः हृदये । श्रीं बीजाय नमः गुह्ये । ह्रीं शक्तये नमः पादयोः । ऐं कीलकाय नमः सर्वाङ्गे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ करन्यासः ॥ ॐ श्रीं अङ्गुष्ठाभ्यां नमः । ॐ ह्रीं तर्जनीभ्यां नमः । ॐ ऐं मध्यमाभ्यां नमः । ॐ श्रीं अनामिकाभ्यां नमः । ॐ ह्रीं कनिष्ठिकाभ्यां नमः । ॐ ऐं करतलकरपृष्ठाभ्यां नमः । ॐ श्रीं हृदयाय नमः । ॐ ह्रीं शिरसे स्वाहा । ॐ ऐं शिखायै वषट् । ॐ श्रीं कवचाय हुम् । ॐ ह्रीं नेत्रत्रयाय वौषट् । ॐ ऐं अस्त्राय फट् । ॐ श्रीं ह्रीं ऐं, इति दिग्बन्धः ॥ अथ ध्यानम् ॥ हस्तद्वयेन कमले धारयन्तीं स्वलीलया ॥ हारनूपुरसंयुक्तां लक्ष्मीं देवीं विचिन्तये ॥ इति ध्यात्वा सम्पूज्य ॥ शङ्खचक्रगदाहस्ते शुभवर्णे सुवासिनि ॥ मम देहि वरं लक्ष्मि सर्वसिद्धिप्रदायिनि ॥ इति सम्प्रार्थ्य । ॐ श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यै स्वाहा । इति मन्त्रं जपित्वा पुनः पूर्ववद्धृदयादिषडङ्गन्यासं कृत्वा स्तोत्रं पठेत् । तदित्थम्—वन्दे लक्ष्मीं परशिवमयीं शुद्धजाम्बूनदाभां तेजोरूपां कनकवसनां सर्वभूषोज्ज्वलाङ्गीम् ॥ बीजापूरं कनककलशं हेमपद्मं दधानामाद्यां शक्तिं सकलजननीं विष्णुवामाङ्कसंस्थाम् ॥ १ ॥ श्रीमत्सौभाग्यजननीं स्तौमि लक्ष्मीं सनातनीम् ॥ सर्वकामफला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाञ्छितसाधनैकसुखावहाम् ॥ २ ॥ स्मरामि नित्यं देवेशि त्वया प्रेरितमानसः ॥ त्वदाज्ञां शिरसा धृत्वा भजामि परमेश्वरीम् ॥ ३ ॥ समस्तसम्पत्सुखदां महाश्रियं समस्तसौभाग्यकरीं महाश्रियम् । समस्तकल्याणकरीं महाश्रियं भजाम्यहं ज्ञानकरीं महाश्रियम् ॥ ४ ॥ विज्ञानसम्पत्सुखदां सनातनीं विचित्रवाग्भूतिकरीं मनोहराम् ॥ अनन्तसम्मादसुखप्रदायिनीं नमाम्यहं भूतिकरीं हरिप्रियाम् ॥ ५ ॥ समस्तभूतान्तरसंस्थिता त्वं समस्तभूतेश्वरि विश्वरूपे ॥ तन्नास्ति यत्त्वद्व्यतिरिक्तवस्तु त्वत्पादपद्मं प्रणमाम्यहं श्रीः ॥ ६ ॥ दारिद्र्यदुःखौघतमोपहन्त्रि त्वत्पादपद्मं मयि सन्निधत्स्व ॥ दीनार्तिविच्छेदनहेतुभूतैः कृपाकटाक्षैरभिषिञ्च मां श्रीः ॥ ७ ॥ अम्ब प्रसीद करुणासुधयार्द्रदृष्ट्या मां त्वत्कृपाद्रविणगेहमिमं कुरुष्व ॥ आलोकय प्रणतहृद्गतशोकहन्त्रि त्वत्पादपद्मयुगलं प्रणमाम्यहं श्रीः ॥ ८ ॥ शान्त्यै नमोऽस्तु शरणागतरक्षणायै कान्त्यै नमोऽस्तु कमनीयगुणाश्रयायै ॥ क्षान्त्यै नमोऽस्तु दुरितक्षयकारणायै धात्र्यै नमोऽस्तु धनधान्यसमृद्धिदायै ॥ ९ ॥ शक्त्यै नमोऽस्तु शशिशेखरसंस्तुतायै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रत्यै नमोऽस्तु रजनीकरसोदरायै ॥ भक्त्यै नमोऽ-
स्तु भवसागरतारकायै मत्यै नमोऽस्तु मधुसूदन-
वल्लभायै ॥ १० ॥ लक्ष्म्यै नमोऽस्तु शुभलक्षण-
लक्षितायै सिद्ध्यै नमोऽस्तु शिवसिद्धसुपूजितायै ॥
धृत्यै नमोऽस्त्वमितदुर्गतिभञ्जनायै गत्यै नमोऽस्तु
वरसद्गतिदायिकायै ॥ ११ ॥ देव्यै नमोऽस्तु दिवि-
देवगणार्चितायै भूत्यै नमोऽस्तु भुवनार्तिविनाश-
नायै ॥ दात्र्यै नमोऽस्तु धरणीधरवल्लभायै पुष्ट्यै
नमोऽस्तु पुरुषोत्तमवल्लभायै ॥ १२ ॥ सुतीव्रदा-
रिद्र्यविदुःखहन्त्र्यै नमोऽस्तु ते सर्वभयापहन्त्र्यै ॥
श्रीविष्णुवक्षःस्थलसंस्थितायै नमो नमः सर्वविभू-
तिदायै ॥ १३ ॥ जयतु जयतु लक्ष्मीर्लक्षणालङ्-
कृताङ्गी जयतु जयतु पद्मा पद्मसद्माभिवन्द्या ॥
जयतु जयतु विद्या विष्णुवामाङ्कसंस्था जयतु जयतु
सम्यक्सर्वसम्पत्करी श्रीः ॥ १४ ॥ जयतु जयतु
देवी देवसंघाऽभिपूज्या जयतु जयतु भद्रा भार्गवी
भाग्यरूपा ॥ जयतु जयतु नित्या निर्मलज्ञानवेद्या
जयतु जयतु सत्या सर्वभूतान्तरस्था ॥ १५ ॥ जयतु
जयतु रम्या रत्नगर्भान्तरस्था जयतु जयतु शुद्धा
शुद्धजाम्बूनदाभा ॥ जयतु जयतु कान्ता कान्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मद्भालसिताङ्गी जयतु जयतु शान्ता शीघ्रमागच्छ सौम्ये ॥ १६ ॥ यस्याः कलाद्याः कमलोद्भवाद्या. रुद्राश्च शक्रप्रमुखाश्च देवाः ॥ जीवन्ति सर्वे अपि शक्तयस्ते प्रभुत्वमाप्ताः परमायुषस्ते ॥ १७ ॥ लिलेख निटिले विधिर्मम लिपिं विसृज्यान्तरं त्वया विलिखितव्यमेतदिति तत्फलप्राप्तये ॥ तदन्तरफले स्फुटं कमलवासिनीं श्रीरिमां समर्पय सुमुद्रिकां सकलभाग्यसंसूचिकाम् ॥ १८ ॥ कलया ते यथा देवी जीवन्ति सचराचराः ॥ तथा संपत्करे लक्ष्मीः सर्वदा सम्प्रसीद मे ॥ १९ ॥ यथा विष्णुर्ध्रुवे नित्यं स्वकलां संन्यवेशयत् ॥ तथैव स्वकलां लक्ष्मीर्मयि सम्यक्समर्पय ॥ २० ॥ सर्वसौख्यप्रदे देवि भक्तानामभयप्रदे ॥ अचलां कुरु यत्नेन कलां मद्विनिवेशिताम् ॥ २१ ॥ मुदाऽऽस्तां मद्भाले परमपदलक्ष्मीः स्फुटकला सदा वैकुण्ठश्रीर्निवसतु कला मे नयनयोः ॥ वसेत् सत्ये लोके मम वचसि लक्ष्मीर्वरकला श्रियः श्वेतद्वीपे निवसतु कला मे स्वकरयोः ॥ २२ ॥ तावन्नित्यं ममाङ्गेषु क्षीराब्धौ श्रीकलावसेत् ॥ सूर्याचन्द्रमसौ यावद्यावल्लक्ष्मीपतिः श्रिया ॥ २३ ॥ सर्वमङ्गलसम्पूर्णा सर्वैश्वर्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समन्विता ॥ आद्यादि श्रीमहालक्ष्मीस्त्वत्कला मयि
तिष्ठतु ॥ २४ ॥ अज्ञानतिमिरं हन्तुं शुद्धज्ञानप्रका-
शिका ॥ सर्वैश्वर्यप्रदा मेऽस्तु त्वत्कला मयि तिष्ठतु
॥ २५ ॥ अलक्ष्मीं हरतु क्षिप्रं तमः सूर्यप्रभा यथा ॥
वितनोतु मम श्रेयस्त्वत्कला मयि संस्थिता ॥ २६ ॥
ऐश्वर्यं मङ्गलोत्पत्तिस्त्वत्कलायां निधीयते ॥ अहं
तस्मात्कृतार्थोऽस्मि पात्रमस्मि स्थितेस्तव ॥ २७ ॥
भवदावेशभाग्यार्हो भाग्यवानस्मि भार्गवि ॥ त्वत्प्र-
सादात्पवित्रोऽहं लोकमातर्नमोऽस्तु ते ॥ २८ ॥
पुनासि मां त्वत्कलयैव यस्मादतः समागच्छ ममा-
ग्रतस्त्वम् ॥ परंपदं श्रीर्भव सुप्रसन्ना मय्यच्युतेन
प्रविशाद्य लक्ष्मीः ॥ २९ ॥ श्रीवैकुण्ठस्थिते लक्ष्मीः
समागच्छ ममाग्रतः ॥ नारायणेन सह मां कृपा-
दृष्ट्याऽवलोकय ॥ ३० ॥ सत्यलोकस्थिते लक्ष्मीस्त्वं
ममागच्छ सन्निधौ ॥ वासुदेवेन सहिता प्रसीद
वरदा भव ॥ ३१ ॥ श्वेतद्वीपस्थिते लक्ष्मीः शीघ्र-
मागच्छ सुव्रते ॥ विष्णुना सहिते देवि जगन्मात-
र्नमोऽस्तु ते ॥ ३२ ॥ क्षीराम्बुधिस्थिते लक्ष्मीः
समागच्छ समाधवे ॥ त्वत्कृपादृष्टिसुधया सततं मां
विलोकय ॥ ३३ ॥ रत्नगर्भस्थिते लक्ष्मीः परिपूर्ण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिरण्मयि ॥ समागच्छ समागच्छ स्थित्वाशु पुरतो मम ॥ ३४ ॥ स्थिरा भव महालक्ष्मीर्निश्चला भव-निर्मले ॥ प्रसन्ने कमले देवि प्रसन्ना वरदा भव ॥ ३५ ॥ श्रीधरे श्रीमहाभूते त्वदन्तस्थं महानिधिम् ॥ शीघ्रमुद्धृत्य पुरतः प्रदर्शय समर्पय ॥३६॥ वसुन्धरे श्रीवसुदे वसुदोग्ध्रि कृपामयि ॥ त्वत्कुक्षिगतसर्वस्वं शीघ्रं मे सम्प्रदर्शय ॥ ३७ ॥ विष्णुप्रिये रत्नगर्भे समस्तफलदे शिवे ॥ त्वत्कुक्षिगतहेमाद्रीन् सम्प्रदर्शय दर्शय ॥ ३८ ॥ रसातलगते लक्ष्मीः शीघ्रमागच्छ मे पुरः ॥ न जाने परमं रूपं मातर्मे सम्प्रदर्शय ॥ ३९ ॥ आविर्भव मनोवेगाच्छीघ्रमागच्छ मे पुरः ॥ मा वत्स भैरिहेत्युक्त्वा कामं गौरिव रक्ष माम् ॥ ४० ॥ देवि शीघ्रं समागच्छ धरणीगर्भसंस्थिते ॥ मातस्त्वद्भृत्यभृत्योऽहं मृगये त्वां कुतूहलात् ॥ ४१ ॥ उत्तिष्ठ जागृहि त्वं मे समुत्तिष्ठ सुजागृहि ॥ अक्षयान् हेमकलशान् सुवर्णेन सुपूरितान् ॥ ४२ ॥ निक्षेपान् मे समाकृष्य समुद्धृत्य ममाग्रतः ॥ समुन्नतानना भूत्वा समाधेहि धरान्तरात् ॥ ४३ ॥ मत्सन्निधिं समागच्छ मदाहितकृपारसात् ॥ प्रसीद श्रेयसां दोग्ध्रि लक्ष्मीर्मे नय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाग्रतः ॥ ४४ ॥ अत्रोपविश्य लक्ष्मीस्त्वं स्थिरा भव हिरण्मयि ॥ सुस्थिरा भव सम्प्रीत्या प्रसन्ना वरदा भव ॥ ४५ ॥ आनीतांस्त्वं त्वया देवि निधीन् मे सम्प्रदर्शय ॥ अद्य क्षणेन सहसा दत्त्वा संरक्ष मां सदा ॥ ४६ ॥ मयि तिष्ठ तथा नित्यं यथेन्द्रादिषु तिष्ठसि ॥ अभयं कुरु मे देवि महालक्ष्मीर्नमोऽस्तु ते ॥ ४७ ॥ समागच्छ महालक्ष्मि शुद्धजाम्बूनदप्रभे ॥ प्रसाद पुरतः स्थित्वा प्रणतं मां विलोकय ॥ ४८ ॥ लक्ष्मीभुवं गता भासि यत्र यत्र हिरण्मयी ॥ तत्र तत्र स्थिता त्वं मे तव रूपं प्रदर्शय ॥ ४६ ॥ क्रीडसे बहुधा भूमौ परिपूर्णकृपा मयि ॥ मम मूर्धनि ते हस्तमविलम्बितमर्पय ॥ ५० ॥ फलद्भाग्योदये लक्ष्मीः समस्तपुरवासिनी ॥ प्रसीद मे महालक्ष्मीः परिपूर्णमनोरथे ॥ ५१ ॥ अयोध्यादिषु सर्वेषु नगरेषु समास्थिते ॥ वैभवैर्विविधैर्युक्ते समागच्छ बलान्विते ॥ ५२ ॥ समागच्छ समागच्छ ममाग्रे भव सुस्थिरा ॥ करुणारसनिष्यन्दनेत्रद्वयविलासिनी ॥ ५३ ॥ सन्निधत्स्व महालक्ष्मीस्त्वत्पाणिं मम मस्तके ॥ करुणासुधया मां त्वमभिषिञ्च स्थिरं कुरु ॥ ५४ ॥ सर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजगृहे लक्ष्मीः समागच्छ बलान्विते ॥ स्थित्वाऽऽशु पुरतो मेऽद्य प्रसादेनाभयं कुरु ॥ ५५ ॥ सादरं मस्तके हस्तं मम त्वं कृपयाऽर्पय ॥ सर्वराजगृहे लक्ष्मीस्त्वत्कृपा मयि तिष्ठतु ॥ ५६ ॥ आद्यादि-श्रीर्महालक्ष्मीर्विष्णुवामाङ्कसंस्थिते ॥ प्रत्यक्षं कुरु मे रूपं रक्ष मां शरणागतम् ॥ ५७ ॥ प्रसीद मे महालक्ष्मीः सुप्रसीद महाशिवे ॥ अचला भव सम्प्रीत्या सुस्थिरा भव मद्गृहे ॥ ५८ ॥ यावत्ति-ष्ठन्ति वेदाश्च यावत्त्वन्नाम तिष्ठति ॥ यावद्वि-ष्णुश्च यावत्त्वं तावत्कुरु कृपां मयि ॥ ५९ ॥ चान्द्री कला यथा शुक्ले वर्धते सा दिने दिने ॥ तथा दया ते मय्येव वर्धतामभिवर्धताम् ॥ ६० ॥ यथा वैकु-ण्ठनगरे यथैव क्षीरसागरे ॥ तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह ॥ ६१ ॥ योगिनां हृदये नित्यं यथा तिष्ठसि विष्णुना ॥ तथा सद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह ॥ ६२ ॥ नारायणस्य हृदये भवती यथाऽऽस्ते नारायणोऽपि तव हृत्कमले यथाऽऽस्ते ॥ नारायणस्त्वमपि नित्यमुभौ तथैव तौ तिष्ठतां हृदि ममापि दयावति श्रीः ॥ ६३ ॥ विज्ञानवृद्धिं हृदये कुरु श्रीः सौभाग्यवृद्धिं कुरु मे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृहे श्रीः ॥ दयासु वृद्धिं कुरुतां मयि श्रीः सुवर्णवृद्धिं कुरु मे गृहे श्रीः ॥ ६४ ॥ न मां त्यजेथाः श्रितकल्पवल्लि सद्भक्तिचिन्तामणि कामधेनो ॥ विश्वस्य मातर्भव सुप्रसन्ना गृहे कलत्रेषु च पुत्रवर्गे ॥ ६५ ॥ आद्यादि माये त्वमजाण्डबीजं त्वमेव साकारनिराकृतिस्त्वम् ॥ त्वया कृताश्चाब्जभवाण्डसङ्घाश्चित्रं चरित्रं तव देवि विष्णोः ॥ ६६ ॥ ब्रह्मरुद्रादयो देवा वेदाश्चापि न शक्नुयुः ॥ महिमानं तव स्तोतुं मन्दोऽहं शक्नुयां कथम् ॥ ६७ ॥ अम्ब त्वद्वत्सवाक्यानि सूक्तासूक्तानि यानि च ॥ तानि स्वीकुरु सर्वज्ञे दयालुत्वेन सादरम् ॥ ६८ ॥ भवतीं शरणं गत्वा कृतार्थाः स्युः पुरातनाः ॥ इति सञ्चिन्त्य मनसा त्वामहं शरणं गतः ॥ ६९ ॥ तव प्रतिज्ञा मद्भक्ता न नश्यन्तीत्यपि क्वचित् ॥ इति सञ्चिन्त्य सञ्चिन्त्य प्राणान् संधारयाम्यहम् ॥ ७० ॥ त्वदधीनस्त्वहं मातस्त्वत्कृपा मयि वर्तते ॥ यावत्सम्पूर्णकामः स्यां तावद्देहि दयानिधे ॥ ७१ ॥ क्षणमात्रं न शक्नोति जीवितुं त्वत्कृपां विना ॥ न जीवन्तीह जलजा जलं त्यक्त्वा जलग्रहाः ॥ ७२ ॥ हितार्थं पुत्रवात्सल्याज्जननी प्रस्नुतस्तनी ॥ वत्सं त्वरित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मागत्य सम्प्रीणयति वत्सला ॥ ७३ ॥ यदि स्यां तव पुत्रोऽहं माता त्वं यदि मामकी ॥ दयापयोधर-स्तन्यसुधाभिरभिषिञ्च माम् ॥ ७४ ॥ मृग्यो न गुणलेशोऽपि मयि दोषैकमन्दिरे ॥ पांसूनां वृष्टिबिन्दूनां दोषाणां च न मे मितिः ॥ ७५ ॥ पापिनामहमेवाग्र्यो दयालूनां त्वमग्रणीः ॥ दय-नीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥ ७६ ॥ विधिनाऽहं न सृष्टश्चेन्नासत्तव दयालुता ॥ आमयो वा न सृष्टश्चेदौषधस्य वृथोदयः ॥ ७७ ॥ कृपा मदग्रजा किं ते अहं किं वा तदग्रजः ॥ विचार्य देहि मे वित्तं तव देवि दयानिधे ॥ ७८ ॥ माता पिता त्वं गुरुसद्गतिः श्रीस्त्वमेव सञ्जीव-नहेतुभूता ॥ अन्यन्न मन्ये जगदेकनाथे त्वमेव सर्वं मम देवि सत्यम् ॥ ७९ ॥ आद्यादिलक्ष्मीर्भव सुप्रसन्ना विशुद्धविज्ञानसुखैकदोग्ध्री ॥ अज्ञानहन्त्री त्रिगुणातिरिक्ता प्रज्ञाननेत्री भव सुप्रसन्ना ॥ ८० ॥ अशेषवाग्जाड्यमलापहारिणी नवं नवं स्पष्टसुख-प्रदायिनी ॥ ममेह जिह्वाग्रसुरङ्गनर्तकी भव प्रसन्ना वदने च मे श्रीः ॥ ८१ ॥ समस्तसम्पत्सु विराज-माना समस्ततेजःसु विभासमाना ॥ विष्णुप्रिये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वं भवदीप्यमाना वाग्देवता मे वदने प्रसन्ना ॥८२॥ सर्वार्थदा सवजगत्प्रसूतिः सर्वेश्वरी सर्वभयापहन्त्री ॥ सर्वोन्नता त्वं सुमुखी भव श्रीर्हिरण्मयी मे नयने प्रसन्ना ॥ ८३ ॥ सर्वप्रदर्शे सकलार्थदे त्वं प्रभासु लावण्यदयाप्रदोग्ध्री ॥ सुवर्णदे त्वं सुमुखी भव श्रीर्हिरण्मयी मे नयने प्रसन्ना ॥ ८४ ॥ समस्तविघ्नौघविनाशकारिणी समस्तभक्तोद्धरणे विचक्षणा ॥ अनन्तसौभाग्यसुखप्रदायिनी हिरण्मयी मे नयने प्रसन्ना ॥ ८५ ॥ देवि प्रसीद दयनीयतमाय मह्यं देवाधिनाथ भव देवगणाभिवन्द्ये ॥ मातस्तथैव भव सन्निहिता दृशोर्मे पत्या समं मम सुखे भव सुप्रसन्ना ॥ ८६ ॥ मा वत्स भैरभयदानकरोऽर्पितस्ते मौलौ ममेति मयि दीनदयानुकम्पे ॥ मातः समर्पय मुदा करुणाकटाक्षं माङ्गल्यबीजमिह नः सृज जन्म मातः ॥ ८७ ॥ कटाक्ष इह कामधुक् तव मनस्तु चिन्तामणिः करः सुरतरुः सदा नवनिधिस्त्वमेवेन्दिरे ॥ भवेत्तव दयारसो रसरसायनं चान्वहं मुखं तव कलानिधिर्विविधवाञ्छितार्थप्रदम् ॥ ८८ ॥ यथा रसस्पर्शनतोऽयसोऽपि सुवर्णता स्यात्कमले तथा ते ॥ कटाक्षसंद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्शनतो जनानाममङ्गलानामपि मङ्गला त्वम् ॥८९॥ देहीति नास्तीति वचः प्रवेशाद्भीतो रमे त्वां शरणं प्रपद्ये ॥ अतः सदाऽस्मिन्न भयप्रदात्वं सहैव पत्या मयि सन्निधेहि ॥ ९० ॥ कल्पद्रुमेण मणिना सहिता सुरभ्या श्रीस्ते कला मयि रसेन रसायनेन ॥ आस्तां यतो मम च दृक्स्मृतिपाणिपादस्पृष्टाः सुवर्णवपुषः स्थिरजङ्गमाः स्युः ॥ ९१ ॥ आद्यादिविष्णोः स्थिरधर्मपत्नी त्वमम्ब पत्या मयि सन्निधेहि ॥ आद्यादिलक्ष्मीस्त्वदनुग्रहेण पदे पदे मे निधिदर्शनं स्यात् ॥ ९२ ॥ आद्यादिलक्ष्मीहृदयं पठेद्यः स राजलक्ष्मीमचलां तनोति ॥ महादरिद्रोऽपि भवेद्धनाढ्यस्तदन्वये श्रीः स्थिरतां प्रयाति ॥९३॥ यस्य स्मरणमात्रेण तुष्टा स्याद्विष्णुवल्लभा ॥ तस्याभीष्टं ददात्याशु तं पालयति पुत्रवत् ॥ ९४ ॥ इदं रहस्यं हृदयं सर्वकामफलप्रदम् ॥ जपः पञ्चसहस्रं तु पुरश्चरणमुच्यते ॥ ९५ ॥ त्रिकालमेककालं वा नरो भक्तिसमन्वितः ॥ यः पठेच्छृणुयाद्वापि स याति परमां श्रियम् ॥ ९६ ॥ महालक्ष्मीं समुद्दिश्य निशि भार्गववासरे ॥ इदं श्रीहृदयं जप्त्वा पञ्चवारं धनी भवेत् ॥ ९७ ॥ अनेन हृदयेनान्नं गर्भिण्यै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिमन्त्रितम्॥ ददाति तत्कुले पुत्रो जायते श्रीपतिः स्वयम् ॥ ९८ ॥ नरेण वाथवा नार्या लक्ष्मीहृदयमन्त्रिते ॥ जले पीते च तद्वंशे मन्दभाग्यो न जायते ॥ ९९ ॥ य आश्विने मासि च शुक्लपक्षे रमोत्सवे सन्ततमेकभक्त्या ॥ पठेत्तथैकोत्तरवारवृद्ध्या लभेत सौवर्णमयीं सुवृष्टिम् ॥ १०० ॥ य एकभक्तोऽन्वहमेकवर्षं विशुद्धधीः सप्ततिवारजापी ॥ स मन्दभाग्योऽपि रमाकटाक्षाद्भवेत् सहस्राक्षशताधिकश्रीः ॥ १०१ ॥ श्रीशाङ्घ्रिभक्तिं हरिदासदास्यं प्रसन्नमन्त्रार्थदृढैकनिष्ठाम् ॥ गुरोः स्मृतिं निर्मलबोधबुद्धिं प्रदेहि मातः परमं पदं श्रीः ॥ १०२ ॥ पृथ्वीपतित्वं पुरुषोत्तमत्वं विभूतिवासं विविधार्थसिद्धिम् ॥ सम्पूर्णकीर्तिं बहुलोकवश्यं वयःस्थिरत्वं ललनासुभोगम् ॥ १०३ ॥ वेदार्थसिद्धिं बहुलोकवश्यं वयःस्थिरत्वं परमैकनैष्ठ्यम् ॥ पुत्रादिलब्धिं सकलार्थसिद्धिं प्रदेहि मे भार्गवि जन्मजन्मनि ॥ १०४ ॥ सुवर्णवृष्टिं कुरु मे गृहे श्रीः सुधान्यवृद्धिं कुरु मे गृहे श्रीः ॥ कल्याणवृद्धिं कुरु मे गृहे श्रीः विभूतिवृद्धिं कुरु मे गृहे श्रीः ॥ १०५ ॥ ध्यायेल्लक्ष्मीं प्रहसितमुखीं कोटिबालार्कभासां विद्युद्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्णाम्बरवरधरां भूषणाढ्यां सुशोभाम् ।। बीजापूरं सरसिजयुगं बिभ्रतीं स्वर्णपात्रं भर्त्रा युक्तां मुहुरभयदां मह्यमप्यच्युतश्रीः ।। १०६ ।।

इति श्रीअथर्वणरहस्ये आद्यादिश्रीमहालक्ष्मीहृदयस्तोत्रं सम्पूर्णम् ।। २ ।।

---

६२ भारतभूमातृ-स्तोत्रम् ।

श्रीगणेशाय नमः ।। वन्दे मातरमव्यक्तां व्यक्तां च जननीं पराम् ।। दीनोऽहं बालकः काङ्क्षे सेवां जन्मनि जन्मनि ।। १ ।। सागरालिङ्गितां लक्ष्मीं जगज्जनककन्यकाम् ।। स्थितां हिमनगस्याङ्के पार्वतीमपरां भजे ।। २ ।। शुभ्रं धर्मध्वजं मातुः किं वा राशीकृतं यशः ।। रौप्यं वा मुकुटं दिव्यं वन्देऽहं तं हिमालयम् ।। ३ ।। जाह्नवीयमुनासिन्धुब्रह्मपुत्राशतद्रुभिः ।। भूदेवीं पञ्चधाराभिः सततं सोऽभिषिञ्चति ।। ४ ।। नगाधिपं धारयन्तीं मस्तके रत्नमद्वयम् ।। काश्मीरं च ललाटे भ्रूमध्ये नेपालिकां शुभाम् ।। ५ ।। नर्मदातापतीविन्ध्यसप्तपीठकमेख-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लाम् ॥ पूर्वापराचलोरूरू मलयं पादपीठके ॥ मध्यदेशोदरे गुप्तानक्षयान् धनसञ्चयान् ॥ ६ ॥ असुराणां पुरी लङ्का दासी यच्चरणे कृता ॥ तां देवीं भारतीं वन्दे मातरं विश्वपूजिताम् ॥ ७ ॥ द्रष्टारश्चोपनिषदां गीताशास्त्रप्रवर्तकः ॥ षड्दर्शनप्रवक्तारो भगवान्पाणिनिर्मुनिः ॥ ८ ॥ वाल्मीकिश्च तथा व्यासः कालिदासो महाकविः ॥ आर्यभट्टश्च भरतः शङ्करोऽद्वैतकेसरी ॥ ९ ॥ भीष्मरामार्जुना वीरा नृपौ रामयुधिष्ठिरौ ॥ सावित्री द्रौपदी सीता दमयन्ती च तारका ॥ १० ॥ महार्घान्यद्वितीयानि रत्नान्येतानि भूतले ॥ जननी भारती तेषां रत्नगर्भा कथं न सा ॥ ११ ॥ वसुन्धरा रत्नगर्भा रसा विश्वम्भरा क्षमा ॥ सर्वंसहा स्थिरा चैव भारती भूसुकन्यका ॥ १२ ॥ रत्नाकरः स्वयं भुक्त्या मुक्तोपायनपूर्वकम् ॥ चरणान्क्षालयत्यस्या अतन्द्रश्च दिवानिशम् ॥ १३ ॥ कैलासद्वारकाधीशौ रामेश्वरपुरीश्वरौ ॥ द्वारपाला बभूवुश्च सौभाग्यं मातुरद्भुतम् ॥ १४ ॥ पोषयन्ति सदा मातुः पर्वतस्तनमण्डलात् ॥ निःसृताश्च पयोधाराः सन्ततीनां परम्पराः ॥ १५ ॥ पुत्रवत्सलता मातुरगाधा हरिणा स्वयम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवतार्योदरे सोढुं गर्भदुःखं पुनः पुनः ॥ १६ ॥ मरणे जन्मकाले च मुमूर्षुर्नवबालकः ॥ त्वदङ्के चैव संशेते अहो वत्सलता तव ॥ १७ ॥ पद्मालया त्वमेवासि त्वमेव च सरस्वती ॥ अन्नपूर्णा त्वमेवाऽसि त्वमेव च शिवा सती ॥ १८ ॥ त्वद्वृक्षाः कल्पवृक्षाश्च चिन्तामणिशिलाः शिलाः ॥ त्वद्वनं नन्दनं साक्षात् साक्षात्त्वं स्वर्गदेवता ॥ १९ ॥ प्रतिजन्मनि मे वित्तं चित्तं देहश्च सन्ततिः ॥ त्वत्सेवानिरताभूवुर्माता त्वं करुणामयी ॥ २० ॥ न मे वाञ्छाऽस्ति यशसि विद्वत्वे न च वा सुखे प्रभुत्वे नैव वा स्वर्गे मोक्षेऽप्यानन्ददायके ॥ २१ ॥ परं च भारते जन्म मानवस्य च वा पशोः ॥ विहङ्गस्य च वा जन्तोर्वृक्षपाषाणयोरपि ॥ २२ ॥ निरन्तरं भवतु मे मातृसेवांशभाग्यभाक् ॥ एषैव वाञ्छा हृदये साक्षी सर्वात्मकः प्रभुः ॥ २३ ॥

इति श्री 'भूपेन्द्र' कृतं भारतभूमातृस्तोत्रं सम्पूर्णम् ॥ ३ ॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६३ अम्बाष्टकम् ।

श्रीगणेशायनमः ॥ चेटीभवन्निखिलखेटीकदम्बतरुवाटीषु नाकिपटलीकोटीरचारुतरकोटीमणीकिरणकोटीकरम्बितपदा ॥ पाटीरगन्धकुचशाटी कवित्वपरिपाटीमृगाधिपसुता घोटी कुलादधिकधाटीमुदामुखवीटीरसेन तनुताम् ॥ १ ॥ कूलातिगामिभयतूलावलिज्वलनकीला निजस्तुतिविधाकोलाहलक्षपितकालाभरी कुशलकीलालपोषणनभाः ॥ स्थूला कुचे जलदनीला कचे कलितलीला कदम्बविपिने शूलायुधप्रणतिशीला विभातु हृदि शैलाधिराजतनया ॥ २ ॥ यत्रायशो लगति तत्रागजा वसतु कुत्रापि निस्तुलशुका सुत्रामकालमुखसत्राशनप्रकरसुत्राणकारिचरणा ॥ छत्रानिलातिरयपत्राभिरामगुणमित्रावरीसमवधूः कुत्रासहन्मणिविचित्राकृतिः स्फुरितपुत्रादिदाननिपुणा ॥ ३ ॥ द्वैपायनप्रभृतिशापायुधत्रिदिवसोपानधूलिचरणा पापापहस्वमनुजापानुलीनजनतापापनोदनिपुणा ॥ नीपालया सुरभिधूपालका दुरितकूपादुदञ्चयतु मां रूपाधिका शिखरिभूपालवंशमणिदीपायिता भगवती ॥ ४ ॥ यालीभिरात्मतनुतालीसकृत्प्रियकपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लीषु खेलति भयव्यालीनकुल्यसितचूलीभरा चरण-
धूलीलसन्मुनिवरा ॥ बालीभृति श्रवसि तालीदलं
वहति यालीकशोभितिलका सालीकरोतु मम काली
मनः स्वपदनालीकसेवनविधौ ॥ ५ ॥ न्यङ्काकरे
वपुषि कङ्कादिरक्तवपुषि कङ्कादिपक्षिविषये त्वं
कामनायसि किं कारणं हृदयपङ्कारिमेहि गिरि-
जाम् ॥ शङ्काशिलानिशितटङ्कायमानपदसङ्काशमान-
सुमनो झङ्कारिमानततिमङ्कानुपेतशशिसङ्काशिवक्त्र-
कमलाम् ॥ ६ ॥ कुम्बावतीसमविडम्बा गलेन नव-
तुम्बाभवीणसविधा शं बाहुलेयशशिबिम्बाभिराम-
मुखसम्बाधितस्तनभरा ॥ अम्बा कुरङ्गमदजम्बा-
लरोचिरिह लम्बालका दिशतु मे बिम्बाधरा नित-
तशम्बायुधादिनकुरम्बा कदम्बविपिने ॥ ७ ॥
इन्धानकीरमणिबन्धाभवे हृदयबन्धावतीव रसिका
सन्धावती भुवनसन्धारणेऽप्यमृतसिन्धावुदारनि-
लया ॥ गन्धानुभानमुहुरन्धालिवीतकचबन्धा सम-
र्पयतु मे शन्धाम भानुमपि सन्धानमाशु पदसन्धा-
नमप्यगसुधा ॥ ८ ॥

इति श्रीमच्छङ्कराचार्यविरचितमम्बाष्टकं
सम्पूर्णम् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६४ श्रीस्तोत्रम् ।

श्रीगणेशाय नमः ॥ पुष्कर उवाच ॥ राजलक्ष्मीस्थिरत्वाय यथेन्द्रेण पुरा श्रियः ॥ स्तुतिः कृता तथा राजन् जयार्थं स्तुतिमाचरेत् ॥ १ ॥ इन्द्र उवाच ॥ नमोस्तु सर्वलोकानां जननीमब्धिसम्भवाम् ॥ श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षःस्थलस्थिताम् ॥ २ ॥ त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनी ॥ सन्ध्या रात्रिः प्रभा मूर्तिर्मेधा श्रद्धा सरस्वती ॥ ३ ॥ यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ॥ आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥४॥ आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्त्वमेव च ॥ सौम्यासौम्यर्जगद्रुपैस्त्वयैतद्देवि पूरितम् ॥ ५ ॥ का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः ॥ अध्यास्ते देवदेवस्य योगिचिन्त्यं गदाभृतः ॥ ६ ॥ त्वया देवि परित्यक्तं सकलं भुवनत्रयम् ॥ विनष्टप्रायमभवत्त्वयेदानीं समेधितम् ॥ ७ ॥ दाराः पुत्रास्तथागारं सुहृद्धान्यधनादिकम् ॥ भवत्येतन्महाभागे नित्यं त्वद्वीक्षिणान्नृणाम् ॥ ८ ॥ शरीरारोग्यमैश्वर्यमरिपक्षक्षयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुखम् ॥ देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभम् ॥ ९ ॥ त्वमम्बा सर्वलोकानां देवदेवो हरिः पिता॥ त्वयैतद्विष्णुनाचाम्ब जगद्व्याप्तं चराचरम् ॥ १० ॥ मानं कोषं तथा कोष्ठं मा गृहं मा परिच्छदम् ॥ मा शरीरं कलत्रं च त्यजेथाः सर्वपावनि ॥ ११ ॥ मा पुत्रान्मा सुहृद्वर्गान् मा पशून्मा विभूषणम् ॥ त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलालये ॥ १२ ॥ सत्त्वेन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः ॥ त्यजन्ते ते नराः सद्यः सन्त्यक्ता ये त्वयाऽमले ॥ १३ ॥ त्वयाऽवलोकिता सद्यः शीलाद्यैरखिलैर्गुणैः ॥ कुलैश्वर्यैश्च युज्यन्ते पुरुषा निर्गुणा अपि ॥ १४ ॥ स श्लाध्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ॥ स शूरः स च विक्रान्तो यस्त्वया देवी वीक्षितः ॥ १५ ॥ सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः ॥ पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥ १६ ॥ न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः ॥ प्रसीद देवि पद्माक्षि माऽस्मांस्त्यक्षीः कदाचन ॥ १७ ॥ पुष्कर उवाच ॥ एवं स्तुता ददौ श्रीश्च वरमिन्द्राय चेप्सितम् ॥ सुस्थिरत्वं च राज्यस्य संग्रामविजयादिकम् ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वस्तोत्रपाठश्रवणकर्तॄणां भुक्तिमुक्तिदम् ॥ श्री
त्रं सततं तस्मात्पठेच्चशृणुयान्नरः ॥ १९ ॥ ॥ ६ ॥

इति श्री अग्निपुराणान्तर्गतं श्री स्तोत्रं संपूर्णम् ...नकानने ॥ ॥ ७ ॥

---

६५ महालक्ष्म्याष्टकम् ।

श्रीगणेशाय नमः ॥ इन्द्र उवाच ॥ नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ॥ शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥ १ ॥ नमस्ते गरुडारूढे कालासुरभयङ्करि ॥ सर्वपापहरे देवि महालक्ष्मि न० ॥ २ ॥ सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि ॥ सर्वदुःखहरे देवि महालक्ष्मि न० ॥ ३ ॥ सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि ॥ मन्त्रमूर्ते सदा देवि महालक्ष्मि न० ॥ ४ ॥ आद्यन्तरहिते देवि आद्यशक्ति महेश्वरि ॥ योगजे योगसम्भूते महालक्ष्मि न० ॥ ५ ॥ स्थूलसूक्ष्ममहारौद्रे महाशक्ति महोदरे ॥ महापापहरे देवि महालक्ष्मि न० ॥ ६ ॥ पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ॥ परमेशि जगन्मातर्महालक्ष्मि न० ॥ ७ ॥ श्वेताम्बरधरे देवि नानालङ्कारभूषिते ॥ जगत्स्थिते जग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुखम् ॥ देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभम् ॥ ९ ॥ त्वमम्बा सर्वलोकानां देवदेवो हरिः पिता ॥ त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरम् ॥ १० ॥ मानं कोषं तथा कोष्ठं मा गृहं मा परिच्छदम् ॥ मा शरीरं कलत्रं च त्यजेथाः सर्वपावनि ॥ ११ ॥ मा पुत्रान्मा सुहृद्वर्गान् मा पशून्मा विभूषणम ॥ त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलालये ॥ १२ ॥ सत्त्वेन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः ॥ त्यजन्ते ते नराः सद्यः सन्त्यक्ता ये त्वयाऽमले ॥ १३ ॥ त्वयाऽवलोकिता सद्यः शीलाद्यैरखिलैर्गुणैः ॥ कुलैश्वर्यैश्च युज्यन्ते पुरुषा निर्गुणा अपि ॥ १४ ॥ स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ॥ स शूरः स च विक्रान्तो यस्त्वया देवी वीक्षितः ॥ १५ ॥ सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः ॥ पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥ १६ ॥ न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः ॥ प्रसीद देवि पद्माक्षि माऽस्मांस्त्यक्षीः कदाचन ॥ १७ ॥ पुष्कर उवाच ॥ एवं स्तुता ददौ श्रीश्च वरमिन्द्राय चेप्सितम् ॥ सुस्थिरत्वं च राज्यस्य संग्रामविजयादिकम् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वस्तोत्रपाठश्रवणकर्तृणां भुक्तिमुक्तिदम् ॥ श्री ... ॥
त्रं सततं तस्मात्पठेच्चश्रृणुयान्नरः ॥ १६ ॥ ... ६ ॥

इति श्री अग्निपुराणान्तर्गतं श्री स्तोत्रं संपूर्णम् ...कानने ॥
... ॥ ७ ॥
...नी

---

६५ महालक्ष्म्याष्टकम् ।

श्रीगणेशाय नमः ॥ इन्द्र उवाच ॥ नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ॥ शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥ १ ॥ नमस्ते गरुडारूढे कालासुरभयङ्करि ॥ सर्वपापहरे देवि महालक्ष्मि न० ॥ २ ॥ सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि ॥ सर्वदुःखहरे देवि महालक्ष्मि न० ॥ ३ ॥ सिद्धि-बुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि ॥ मन्त्रमूर्ते सदा देवि महालक्ष्मि न० ॥ ४ ॥ आद्यन्तरहिते देवि आद्यशक्ति महेश्वरि ॥ योगजे योगसम्भूते महालक्ष्मि न० ॥ ५ ॥ स्थूलसूक्ष्ममहारौद्रे महा-शक्ति महोदरे ॥ महापापहरे देवि महालक्ष्मि न० ॥ ६ ॥ पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ॥ परमेशि जगन्मातर्महालक्ष्मि न० ॥ ७ ॥ श्वेता-म्बरधरे देवि नानालङ्कारभूषिते ॥ जगत्स्थिते जग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रातर्महालक्ष्मि न० ॥ ८ ॥ महालक्ष्म्यष्टकस्तोत्रं त्वयैतद्भक्तिमान्नरः ॥ सर्वसिद्धिमवाप्नोति राज्यं मानं क॰॰ सदा ॥ ९ ॥ एककालं पठेन्नित्यं महापा॰शनम् ॥ द्विकालं यः पठेन्नित्यं धनधान्य-॰॰ तः ॥ १० ॥ त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् ॥ महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥ ११ ॥

इतीन्द्रकृतं श्रीमहालक्ष्म्यष्टकं सम्पूर्णम् ॥ ६ ॥

६६ देवकृतं लक्ष्मीस्तोत्रम् ।

श्रीगणेशाय नमः ॥ क्षमस्व भगवत्यम्ब क्षमाशीले परात्परे ॥ शुद्धसत्त्वस्वरूपे च कोपादिपरिवर्जिते ॥ १ ॥ उपमे सर्वसाध्वीनां देवीनां देवपूजिते ॥ त्वया विना जगत्सर्वं मृततुल्यं च निष्फलम् ॥ २ ॥ सर्वसंपत्स्वरूपा त्वं सर्वेषां सर्वरूपिणी ॥ रासेश्वर्यधिदेवी त्वं त्वत्कलाः सर्वयोषितः ॥ ३ ॥ कैलासे पार्वती त्वं च क्षीरोदे सिन्धुकन्यका ॥ स्वर्गे च स्वर्गलक्ष्मीस्त्वं मर्त्यलक्ष्मीश्च भूतले ॥ ४ ॥ वैकुण्ठे च महालक्ष्मीर्देवदेवी सरस्वती ॥ गङ्गा च तुलसी त्वं च सावित्री ब्रह्मलोकतः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृष्णप्राणाधिदेवी त्वं गोलोके राधिका स्वयम् ॥
रासे रासेश्वरी त्वं च वृन्दावनवने वने ॥ ६ ॥
कृष्णप्रिया त्वं भाण्डीरे चन्द्रा चन्दनकानने ॥
विरजा चम्पकवने शतशृङ्गे च सुन्दरी ॥ ७ ॥
पद्मावती पद्मवने मालती मालतीवने ॥ कुन्ददन्ती कुन्दवने सुशीला केतकीवने ॥ ८ ॥ कदम्बमाला त्वं देवी कदम्बकाननेऽपि च ॥ राजलक्ष्मी राजगेहे गृहलक्ष्मीर्गृहे गृहे ॥ ९ ॥ इत्युक्त्वा देवताः सर्वे मुनयो मनवस्तथा ॥ रुरुदुर्नम्रवदनाः शुष्ककण्ठोष्ठतालुकाः ॥ १० ॥ इति लक्ष्मीस्तवं पुण्यं सर्वदेवैः कृतं शुभम् ॥ यः पठेत्प्रातरुत्थाय स वै सर्वं लभेद्ध्रुवम् ॥ ११ ॥ अभार्यो लभते भार्यां विनीतां सुसुतां सतीम् ॥ सुशीलां सुन्दरीं रम्यामतिसुप्रियवादिनीम् ॥ १२ ॥ पुत्रपौत्रवतीं शुद्धां कुलजां कोमलां वराम् ॥ अपुत्रो लभते पुत्रं वैष्णवं चिरजीविनम् ॥ १३ ॥ परमैश्वर्ययुक्तं च विद्यावन्तं यशस्विनाम् ॥ भ्रष्टराज्यो लभेद्राज्यं भ्रष्टश्रीः लभते श्रियम् ॥ १४ ॥ हतबन्धुर्लभेद्बन्धुं धनभ्रष्टो धनं लभेत् ॥ कीर्तिहीनो लभेत्कीर्तिं प्रतिष्ठां च लभेद्ध्रुवम् ॥ १५ ॥ सर्वमङ्गलदं स्तोत्रं शोकस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तापनाशनम् ।। हर्षानन्दकरं शश्वद्धर्ममोक्षसुहृत्प्रदम् ।। १६ ।।

इति श्रीदेवकृतं लक्ष्मीस्तोत्रं सम्पूर्णम् ॥ ७ ॥

---

६७ देव्यपराधक्षमापनस्तोत्रम् ।

श्री गणेशाय नमः ।। न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।। न जाने मुद्रास्ते तदपि च न जाने विलपनं परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ।। १ ।। विधेरज्ञानेन द्रविणविरहेणालसतया विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।। तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।। २ ।। पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः परं तेषां मध्ये विरलतरलोऽहं तव सुतः ।। मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।। ३ ।। जगन्मातर्मातस्तव चरणसेवा न रचिता न वा दत्तं देवि द्रविणमपि भूयस्तव मया ।। तथाऽपि त्वं स्नेहं मयि निरुपमं यत्प्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुरुषे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ४ ॥ परित्यक्त्वा देवान्विविधविधिसेवाकुलतया मया पञ्चाशीतेरधिकमपनीते तु वयसि ॥ इदानीं चेन्मातस्तव यदि कृपा नापि भवति निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥ ५ ॥ श्वपाको जल्पाको भवति मधुपाकोपमगिरा निरातङ्को रङ्को विहरति चिरं कोटिकनकैः ॥ तवापर्णे कर्णे विशति मनुवर्ण फलमिदं जनः को जानीते जननि जपनीयं जपविधौ ॥ ६ ॥ चिताभस्मालेपो गरलमशनं दिक्पटधरो जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ॥ कपाली भूतेशो भजति जगदीशैकपदवीं भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥ ७ ॥ न मोक्षस्याकांक्षा न च विभववाञ्छाऽपि च न मे न विज्ञानापेक्षा शशिमुखिसुखेच्छाऽपि न पुनः ॥ अतस्त्वां संयाचे जननि जननं यातु मम वै मृडानी रुद्राणी शिवशिवभवानीति जपतः ॥ ८ ॥ नाराधिताऽसि विधिना विविधोपचारैः किं रूक्षचिन्तनपरैर्न कृतं वचोभिः ॥ श्यामे त्वमेव यदि कञ्चनमय्यनाथे धत्से कृपामुचितमम्ब परं तवैव ॥ ९ ॥ आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करुणार्णवेशि ॥ नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति ॥ १० ॥ जगदम्ब विचित्रमत्र किं परिपूर्णा करुणाऽस्ति चेन्मयि ॥ अपराधपरम्परावृतं नहि माता समुपेक्षते सुतम् ॥ ११ ॥ मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ॥ एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु ॥ १२ ॥

इति श्रीमच्छ० वि० देव्यपराधक्षमापनस्तोत्रं सम्पूर्णम् ॥८॥

६८ त्रिपुरसुन्दरीस्तोत्रम् ।

श्रीगणेशाय नमः ॥ कदम्बवनचारिणीं मुनिकदम्बकादम्बिनीं नितम्बजितभूधरां सुरनितम्बिनीसेविताम् ॥ नवाम्बुरुहलोचनामभिनवाम्बुदश्यामलां त्रिलोचनकुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ॥ १ ॥ कदम्बवनवासिनीं कनकवल्लकीधारिणीं महार्हमणिहारिणीं मुखसमुल्लसद्वारुणीम् ॥ दयाविभवकारिणीं विशदलोचनीं चारिणीं त्रिलोचनकुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ॥ २ ॥ कदम्बवनशालया कुचभरोल्लसन्मालया कुचोपमितशैलया गुरुकृपालसद्वेलया ॥ मदारुणकपोलया मधुरगीतवाचाल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या कयाऽपि घननीलया कवचिता जयं लीलया ॥ ३ ॥ कदम्बवनमध्यगां कनकमण्डलोपस्थितां षडम्बुरुहवासिनीं सततसिद्धसौदामिनीम् ॥ विडम्बितजपारुचिं विकचचन्द्रचूडामणिं त्रिलोचनकुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ॥ ४ ॥ कुचाञ्चितविपञ्चिकां कुटिलकुन्तलालङ्कृतां कुशेशयनिवासिनीं कुटिलचित्तविद्वेषिणीम् ॥ मदारुणविलोचनां मनसिजारिसंमोहिनीं मतङ्गमुनिकन्यकां मधुरभाषिणीमाश्रये ॥ ५ ॥ स्मरेत्प्रथमपुष्पिणीं रुधिरबिन्दुनीलाम्बरां गृहीतमधुपात्रिकां मधुविघूर्णनेत्राञ्चलाम् ॥ घनस्तनभरोन्नतां गलितचूलिकां श्यामलां त्रिलोचनकुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ॥ ६ ॥ सकुङ्कुमविलेपनामलकचुम्बिकस्तुरिकां समन्दहसितेक्षणां सशरचापपाशाङ्कुशाम् ॥ अशेषजनमोहिनीमरुणमाल्यभूषाम्बरां जपाकुसुमभासुरां जपविधौ स्मराम्यम्बिकाम् ॥ ७ ॥ पुरन्दरपुरन्ध्रिकाचिकुरबन्धसैरन्ध्रिकां हितामहपतिव्रतां पटुपटीरचर्चारताम् ॥ मुकुन्दरमणीं मणोलसदलंक्रियाकारिणीं भजामि भुवनाम्बिकां सुरवधूटिकाचेटिकाम् ॥ ८ ॥

इति श्रीमत्प० श्रीमच्छ० त्रिपुरसुन्दरीस्तोत्रं सम्पूर्णम् ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३९ आनन्दलहरी ।

श्रीगणेशाय नमः ॥ भवानि स्तोतुं त्वां प्रभवति चतुर्भिर्न वदनैः प्रजानामीशानस्त्रिपुरमथनः पञ्चभिरपि ॥ न षड्भिः सेनानीर्दशशतमुखैरप्यहिपतिस्तदाऽन्येषां केषां कथय कथमस्मिन्नवसरः ॥ १ ॥ घृतक्षीरद्राक्षामधुमधुरिमा कैरपि पदैर्विशिष्यानाख्येयो भवति रसनामात्रविषयः ॥ तथा ते सौन्दर्यं परमशिवदृङ्मात्रविषयः कथङ्कारं ब्रूमः सकलनिगमागोचरगुणे ॥ २ ॥ मुखे ते ताम्बूलं नयनयुगले कज्जलकला ललाटे काश्मीरं विलसति गले मौक्तिकलता ॥ स्फुरत्काञ्ची शाटी पृथुकटितटे हाटकमयी भजामस्त्वां गौरीं नगपतिकिशोरीमविरतम् ॥ ३ ॥ विराजन्मन्दारद्रुमकुसुमहारस्तनतटी नदद्वीणानादश्रवणविलसत्कुण्डलगुणा ॥ नताङ्गी मातङ्गी रुचिरगतिभङ्गी भगवती सती शम्भोरम्भोरुहचटुलचक्षुर्विजयते ॥ ४ ॥ नवीनार्कभ्राजन्मणिकनकभूषापरिकरैर्वृताङ्गी सारङ्गीरुचिरनयनाङ्गीकृतशिवा ॥ तडित्पीतापीताम्बरललितमञ्जीरसुभगा ममापर्णा पूर्णा निरवधिसुखैरस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुमुखी ॥ ५ ॥ हिमाद्रेः संभूता सुललितकरैः पल्ल-
वयुता सुपुष्पा मुक्ताभिर्भ्रमरकलिता चालकभरैः ॥
कृतस्थाणुस्थाना कुचफलनता सूक्तिसरसा रुजां
हन्त्री गन्त्री विलसति चिदानन्दलतिका ॥ ६ ॥
सपर्णामाकीर्णां कतिपयगुणैः सादरमिह श्रयन्त्यन्ये
वल्लीं मम तु मतिरेवं विलसति ॥ अपर्णैका सेव्या
जगति सकलैर्यत्परिवृतः पुराणोऽपि स्थाणुः फलति
किल कैवल्यपदवीम् ॥ ७ ॥ विधात्री धर्माणां
त्वमसि सकलाम्नायजननी त्वमर्थानां मूलं धनद-
नमनीयाङ्घ्रिकमले ॥ त्वमादिः कामानां जननि
कृतकन्दर्पविजये सतां मुक्तेर्बीजं त्वमसि परमब्रह्म-
महिषी ॥ ८ ॥ प्रभूता भक्तिस्ते यदपि न ममालोल-
मनसस्त्वया तु श्रीमत्या सदयमवलोक्योऽहमधु-
ना ॥ पयोदः पानीयं दिशति मधुरं चातकमुखे
भृशं शङ्के कैर्वा विधिभिरनुनीता मम मतिः ॥ ९ ॥
कृपापाङ्गालोकं वितरतरसा साधुचरिते न ते
युक्तोपेक्षा मयि शरणदीक्षामुपगते ॥ न चेदिष्टं
दद्यादनुपदमहो कल्पलतिका विशेषः सामान्यैः
कथमितरवल्लीपरिकरैः ॥ १० ॥ महान्तं विश्वासं
तव चरणपङ्केरुहयुगे निधायान्यन्नैवाश्रितमिह मया।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दैवतमुमे ॥ तथाऽपि त्वच्चेतो यदि मयि न जायेत सदयं निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥ ११ ॥ अयःस्पर्शे लग्नं सपदि लभते हेमपदवीं यथा रथ्यापाथः शुचि भवति गङ्गौघमिलनम् ॥ तथा तत्पापैरतिमलिनमन्तर्मम यदि त्वयि प्रेम्णा सक्तं कथमिव न जायेत विमलम् ॥ १२ ॥ त्वदन्यस्मादिच्छाविषयफललाभेन नियमस्त्वमर्थानामिच्छाधिकमपि समर्था वितरणे ॥ इति प्राहुः प्राञ्चः कमलभवनाद्यास्त्वयि मनस्त्वदासक्तं नक्तं दिवमुचितमीशानि कुरु तत् ॥ १३ ॥ स्फुरन्नानारत्नस्फटिकमयभित्तिप्रतिफलत्त्वदाकारं चञ्चच्छशधरविलासौघशिखरम् ॥ मुकुन्दब्रह्मेन्द्रप्रभृतिपरिवारं विजयते तवागारं रम्यं त्रिभुवनमहाराजगृहिणि ॥१४॥ निवासः कैलासे विधिशतमखाद्याः स्तुतिकराः कुटुम्बं त्रैलोक्यं कृतकरपुटः सिद्धिनिकरः ॥ महेशः प्राणेशस्तदवनिधराधीशतनये न ते सौभाग्यस्य क्वचिदपि मनागस्ति तुलना ॥ १५ ॥ वृषो वृद्धा यानं विषमशनमाशानिवसनं श्मशानं क्रीडाभूभुजगनिवहो भूषणनिधिः ॥ समग्रा सामग्री जगति विदितैव स्मररिपोर्यदेतस्यैश्वर्यं तव जननि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सौभाग्यमहिमा ॥ १६ ॥ अशेषब्रह्माण्डप्रलयविधि-
नैसर्गिकमतिः श्मशानेष्वासीनः कृतभसितलेपः
पशुपतिः ॥ ददौ कण्ठे हालाहलमखिलभूगोलकृपया
भवत्याः सङ्गत्याः फलमिति च कल्याणि कलये
॥ १७ ॥ त्वदीयं सौन्दर्यं निरतिशयमालोक्य परया
भियैवासीद्गङ्गा जलमयतनुः शैलतनये ॥ तदे-
तस्यास्ताम्यद्वदनकमलं वीक्ष्य कृपया प्रतिष्ठामातेने
निजशिरसि वासेन गिरिशः ॥ १८ ॥ विशाल-
श्रीखण्डद्रवमृगमदाकीर्णघुसृणप्रसूनव्यामिश्रं भग-
वति तवाभ्यङ्गसलिलम् ॥ समादाय स्रष्टा चलित-
पदपांसून्निजकरैः समाधत्ते सृष्टिं विबुधपुरपङ्केरुह-
दृशाम् ॥ १९ ॥ वसन्ते सानन्दे कुसुमितलताभिः
परिवृते स्फुरन्नानापद्मे सरसिकलहंसालिसुभगे ॥
सखीभिः खेलन्तीं मलयपवनान्दोलितजलैः स्मरे-
द्यस्त्वां तस्य ज्वरजनितपीडाऽपसरति ॥ २० ॥

इति श्रीमच्छङ्कराचार्यविरचिताऽऽनन्द-
लहरी सम्पूर्णा ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७० वाराहीनिग्रहाष्टकम् ।

श्रीगणेशाय नमः ॥ देवि क्रोडमुखि त्वदङ्घ्रिकमलद्वन्द्वानुरक्तात्मने मह्यं द्रुह्यति यो महेशि मनसा कायेन वाचा नरः ॥ तस्याशु त्वदयोग्रनिष्ठुरहलाघातप्रभूतव्यथा पर्यस्यन्मनसो भवन्तु वपुषः प्राणाः प्रयाणोन्मुखाः ॥ १ ॥ देवि त्वत्पदपद्मभक्तिविभवप्रक्षीणदुष्कर्मणि प्रादुर्भूतनृशंसभावमलिनां वृत्तिं विधत्ते मयि ॥ यो देही भुवने तदीयहृदयान्निर्गत्वरैर्लोहितैः सद्यः पूरयसे कराब्जचषकं वाञ्छाफलैर्मामपि ॥ २ ॥ चण्डोत्तुण्डविदीर्णदुष्टहृदयप्रोद्भिन्नरक्तच्छटाहालापानमदाट्टहासनिनदाटोपप्रतापोत्कटम् ॥ मातर्मत्परिपन्थिनामपहृतैः प्राणैस्त्वदङ्घ्रिद्वयं ध्यानोद्दामरवैर्भवोदयवशात्संतर्पयामि क्षणात् ॥ ३ ॥ श्यामां तामरसाननाङ्घ्रिनयनां सोमार्धचूडां जगत्त्राणव्यग्रहलायुधाग्रमुसलां संत्रासमुद्रावताम् ॥ ये त्वां रक्तकपालिनीं हरवरारोहे वराहाननां भावैः संदधते कथं क्षणमपि प्राणन्ति तेषां द्विषः ॥ ४ ॥ विश्वाधीश्वरवल्लभे विजयसे या त्वं नियन्त्र्यात्मिका भूतान्ता पुरुषायुषा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वधिकरी पाकप्रदा कर्मणाम् ॥ त्वां याचे भवतीं किमप्यवितथं को मद्विरोधी जनस्तस्यायुर्मम वाञ्छितावधि भवेन्मातस्तवैवाज्ञया ॥ ५ ॥ मातः सम्यगुपासितुं जडमतिस्त्वां नैव शक्नोम्यहं यद्यप्यन्वितदेशिकाङ्घ्रिकमलामुक्रोशपात्रस्य मे ॥ जन्तुः कश्चन चिन्तयत्यकुशलं यस्तस्य तद्वैशसं भूयाद्देवि विरोधिनो मम च ते श्रेयःपदासङ्गिनः ॥ ६ ॥ वाराही व्यथमानमानसगलत्सौख्यं तदाशावलिं सीदन्तं यमपाकृताध्यवसितं प्राप्ताखिलोत्पादितम् ॥ क्रन्दद्बन्धुजनैः कलङ्कितकुलं कण्ठव्रणोद्यत्कृमिं पश्यामि प्रतिपक्षमाशु पतितं भ्रान्तं लुठन्तं मुहुः ॥ ७ ॥ वाराहि त्वमशेषजन्तुषु पुनः प्राणात्मिका स्पन्दसे शक्तिव्याप्तचराचरा खलु यतस्त्वामेतदभ्यर्थये ॥ त्वत्पादाम्बुजसङ्गिनो मम सकृत्पापं चिकीर्षन्ति ये तेषां मां कुरु शङ्करप्रियतमे देहान्तरावस्थितिम् ॥ ८ ॥

इति श्रीवाराहीनिग्रहाष्टकं सम्पूर्णम् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७१ वाराह्यनुग्रहाष्टकम् ।

श्रीगणेशाय नमः ॥ ईश्वर उवाच ॥ मातर्जगद्रचननाटकसूत्रधारः सद्रूपमाकलयितुं परमार्थतोऽयम् ॥ ईशोऽप्यनीश्वरपदं समुपैति तादृक्कोऽन्यः स्तवं किमिव तावकमादधातु ॥ १ ॥ नामानि किंतु गृणतस्तव लोकतुण्डे नाडम्बरं स्पृशति दण्डधरस्य दण्डः ॥ यल्लेशलम्बितभवाम्बुनिधिर्यतो यत्त्वन्नामसंस्मृतिरियं ननु नः स्तुतिस्ते ॥ २ ॥ त्वच्चिन्तनादरसमुल्लसदप्रमेयानन्दोदयात्समुदितः स्फुटरोमहर्षः ॥ मातर्नमामि सुदिनानि सदेत्यमुं त्वामभ्यर्थयेऽर्थमिहि पूरयतादयालो ॥ इन्द्रेन्दुमौलिविधिकेशवमौलिरत्नरोचिश्चयोज्ज्वलितपादसरोजयुग्मे ॥ चेतो नतौ मम सदा प्रतिबिम्बिता त्वं भूया भवानि विदधातु सदोरुहारे ॥ ४ ॥ लीलोद्धृतक्षितितलस्य वराहमूर्तेर्वाराहमूर्तिरखिलार्थकरी त्वमेव ॥ प्रालेयरश्मिसुकलोल्लसितावतंसा त्वं देवि वामतनुभागहरा हरस्य ॥ ५ ॥ त्वामम्ब तप्तकनकोज्ज्वलकान्तिमन्तर्ये चिन्तयन्ति युवतीतनुमागलान्ताम् ॥ चक्रायुधत्रिनयनाम्बरपोत्रवक्त्रां तेषां पदाम्बुजयुगं प्रणमन्ति देवाः ॥ ६ ॥ त्वत्सेवनस्खलितपापचयस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातर्मोक्षोऽपि यत्र न सतां गणनामुपैति ।। देवासुरोरगनृपालनमस्य पादस्तत्र श्रियः पटुगिरः कियदेवमस्तु ॥ ७ ।। किं दुष्करे त्वयि मनो विषयं गतायां किं दुर्लभं त्वयि विधानवदर्चितायाम् ।। किं दुष्करं त्वयि सकृत्स्मृतिमागतायां किं दुर्जयं त्वयि कृतस्तुतिवादपुंसाम् ॥ ८ ।।

इति श्रीताराह्यनुग्रहाष्टकं सम्पूर्णम् ॥ १२ ॥

---

७२ ताराष्टकम् ।

श्रीगणेशाय नमः ।। मातर्नीलसरस्वति प्रणमतां सौभाग्यसम्पत्प्रदे प्रत्यालीढपदस्थिते शिवहृदि स्मेराननाम्भोरुहे ।। फुल्लेन्दीवरलोचनत्रययुते कर्त्री कपालोत्पले खड्गं चादधती त्वमेव शरणं त्वामीश्वरीमाश्रये ।। १ ।। वाचामीश्वरि भक्तकल्पलतिके सर्वार्थसिद्धिप्रदे गद्यप्राकृतपद्यजातरचना सर्वत्र सिद्धिप्रदे ।। नीलेन्दीवरलोचनत्रययुते कारुण्यवारांनिधे सौभाग्यामृतवर्षणेन कृपया सिञ्च त्वमस्मादृशम् ।। २ ।। सर्वे गर्वसमूहपूरिततनो सर्पादिवेषोज्ज्वले व्याघ्रत्वक्परिवीतसुन्दरकटिव्याधूतघ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ण्टाङ्किते ॥ सद्यः कृत्तगलद्रजःपरिमिलन्मुण्डद्वयी-
मूर्धजग्रन्थिश्रेणिनृमुण्डदामललिते भीमे भयं नाशय
॥ ३ ॥ मायानङ्गविकाररूपललनाबिन्द्वर्धचन्द्रात्मि-
के हूँफट्कारमयि त्वमेव शरणं मन्त्रात्मिके
मादृशः ॥ मूर्तिस्ते जननि त्रिधामघटिता स्थूलाऽ-
तिसूक्ष्मा परा वेदानां न हि गोचरा कथमपि प्राप्तां
नु तामाश्रये ॥ ४ ॥ त्वत्पादाम्बुजसेवया सुकृतिनो
गच्छन्ति सायुज्यतां तस्य स्त्री परमेश्वरी त्रिनयनब्र-
ह्मादिसाम्यात्मनः ॥ संसाराम्बुधिमज्जने पटुतनू-
न्देवेन्द्रमुख्यान्सुरान्मातस्त्वत्पदसेवने हि विमुखो
यो मन्दधीः सेवते ॥ ५ ॥ मातस्त्वत्पदपङ्कजद्वयर-
जोमुद्राङ्ककोटीरिणस्ते देवा जयसङ्गरे विजयिनो
निःशङ्कमङ्के गताः ॥ देवोऽहं भुवने न मे सम इति
स्पर्धां वहन्तः परे तत्तुल्यं नियतं यथाऽसुभिरमी
नाशं व्रजन्ति स्वयम् ॥ ६ ॥ त्वन्नामस्मरणात्पला-
यनपरा द्रष्टुं च शक्ता न ते भूतप्रेतपिशाचराक्षस-
गणा यक्षाश्च नागाधिपाः ॥ दैत्या दानवपुङ्गवाश्च
खचरा व्याघ्रादिका जन्तवो डाकिन्यः कुपितान्त-
काश्च मनुजं मातः क्षणं भूतले ॥ ७ ॥ लक्ष्मीः सि-
द्धगणाश्च पादुकमुखाः सिद्धास्तथा चारणाः स्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तम्भश्चापि रणाङ्गणे गजघटास्तम्भस्तथा मोहनम् ॥ मातस्त्वत्पदसेवया खलु नृणां सिद्ध्यन्ति ते ते गुणाः कान्तिः कान्तमनोभवस्य भवति क्षुद्रोऽपि वाचस्पतिः ॥ ८ ॥ ताराष्टकमिदं रम्यं भक्तिमान् यः पठेन्नरः ॥ प्रातर्मध्याह्नकाले च सायाह्ने नियतः शुचिः ॥ ९ ॥ लभते कवितां दिव्यां सर्वशास्त्रार्थविद्भवेत् ॥ लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगान् यथेप्सितान् ॥ १० ॥ कीर्तिं कान्तिं च नैरुज्यं सर्वेषां प्रियतां व्रजेत् ॥ विख्यातिं चापि लोकेषु प्राप्यान्ते मोक्षमाप्नुयात् ॥ ११ ॥

इति नीलतन्त्रे ताराष्टकं सम्पूर्णम् ॥ ७२ ॥

---

७३ शीतलाष्टकम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीशीतलास्तोत्रस्य महादेव ऋषिः । अनुष्टुप्छन्दः । शीतला देवता लक्ष्मीर्बीजम् । भवानी शक्तिः । सर्वविस्फोटकनिवृत्तये जपे विनियोगः ॥ ईश्वर उवाच ॥ वन्देऽहं शीतलां देवीं रासभस्थां दिगम्बराम् ॥ मार्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वन्देऽहं शीतलां देवीं सर्वरोगभयापहाम् ॥ यामासाद्य निवर्तेत विस्फोटकभयं महत् ॥ २ ॥ शीतले शीतले चेति यो ब्रूयाद्दाहपीडितः ॥ विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणश्यति ॥ ३ ॥ यस्त्वामुदकमध्ये तु धृत्वा पूजयते नरः ॥ विस्फोटकभयं घोरं गृहे तस्य न जायते ॥ ४ ॥ शीतले ज्वरदग्धस्य पूतिगन्धयुतस्य च ॥ प्रणष्टचक्षुषः पुंसस्त्वामाहुर्जीवनौषधम् ॥ ५ ॥ शीतले तनुजान् रोगान्नृणां हरसि दुस्त्यजान् ॥ विस्फोटकविदीर्णानां त्वमेकाऽमृतवर्षिणी ॥ ६ ॥ गलगण्डग्रहा रोगा ये चान्ये दारुणा नृणाम् ॥ त्वदनुध्यानमात्रेण शीतले यान्ति संक्षयम् ॥ ७ ॥ न मन्त्रो नौषधं तस्य पापरोगस्य विद्यते ॥ त्वामेकां शीतले धात्रीं नान्यां पश्यामि देवताम् ॥ ८ ॥ मृणालतन्तुसदृशीं नाभिहृन्मध्यसंस्थिताम् ॥ यस्त्वां सञ्चिन्तयेद् देवि तस्य मृत्युर्न जायते ॥ ९ ॥ अष्टकं शीतलादेव्या यो नरः प्रपठेत्सदा ॥ विस्फोटकभयं घोरं गृहे तस्य न जायते ॥१०॥ श्रोतव्यं पठितव्यं च श्रद्धाभक्तिसमन्वितैः ॥ उपसर्गविनाशाय परं स्वस्त्ययनं महत् ॥११॥ शीतले त्वं जगन्माता शीतले त्वं जगत्पिता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शीतले त्वं जगद्धात्री शीतलायै नमो नमः ॥ १२ ॥ रासभो गदर्भश्चैव खरो वैशाखनन्दनः ॥ शीतला- वाहनश्चैव दूर्वाकन्दनिकृन्तनः ॥ १३ ॥ एतानि खरनामानि शीतलाग्रे तु यः पठेत् ॥ तस्य गेहे शिशूनां च शीतलारुङ्न जायते ॥ १४ ॥ शीतला- ष्टकमेवेदं न देयं यस्य कस्यचित् ॥ दातव्यं च सदा तस्मै श्रद्धाभक्तियुताय वै ॥ १५ ॥

इति श्रीस्कन्दपुराणे शीतलाष्टकस्तोत्रं सम्पूर्णम् ॥१४॥

---

७४ अन्नपूर्णास्तोत्रम् ।

श्रीगणेशाय नमः ॥ नित्यानन्दकरी वराभय- करी सौन्दर्यरत्नाकरी निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ॥ प्रालेयाचलवंशपावनकरी काशी- पुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्न- पूर्णेश्वरी ॥ १ ॥ नानारत्नविचित्रभूषणकरी हेमा- म्बराडम्बरी मुक्ताहारविलम्बमानविलसद्वक्षोज- कुम्भान्तरी ॥ काश्मीरागरुवासिता रुचिकरी काशी पुराधीश्वरी भिक्षां देहि कृपा० ॥ २ ॥ योगा- नन्दकरी रिपुक्षयकरी धर्मार्थनिष्ठाकरी चन्द्रार्कान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लभासमानलहरी त्रैलोक्यरक्षाकरी ॥ सर्वैश्वर्यसमस्तवाञ्छितकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ ३ ॥ कैलासाचलकन्दरालयकरी गौरी उमा शङ्करी कौमारी निगमार्थगोचरकरी ओङ्कारबीजाक्षरी ॥ मोक्षद्वारकपाटपाटनकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ ४ ॥ दृश्यादृश्यप्रभूतवाहनकरी ब्रह्माण्डभाण्डोदरी लीलानाटकसूत्रभेदनकरी विज्ञानदीपाङ्कुरी ॥ श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी भिक्षां देहि० ॥५॥ उर्वीसर्वजनेश्वरी भगवती मातान्नपूर्णेश्वरीवेणीनीलसमानकुन्तलहरी नित्यान्नदानेश्वरी ॥ सर्वानन्दकरी दशाशुभकरी काशीपुरा धीश्वरी भिक्षां देहि कृपा० ॥ ६ ॥ आदिक्षान्तसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी काश्मीरा त्रिजलेश्वरी त्रिलहरी नित्याङ्कुराशर्वरी ॥ कामाकाङ्क्षकरी जनोदयकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ ७ ॥ देवी सर्वविचित्ररत्नरचिता दाक्षायणी सुन्दरी वामं स्वादुपयोधरप्रियकरी सौभाग्यमाहेश्वरी भक्ताभीष्टकरी दशाशुभकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ ८ ॥ चन्द्रार्कानलकोटिकोटिसदृशा चन्द्रांशुबिम्बाधरी चन्द्रा·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्काग्निसमानकुन्तलधरी चन्द्रार्कवर्णेश्वरी ॥ मालापुस्तकपाशसाङ्कुशधरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ ९ ॥ क्षत्रत्राणकरी महाऽभयकरी माता कृपासागरी साक्षान्मोक्षकरी सदाशिवकरी विश्वेश्वरी श्रीधरी ॥ दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ १० ॥ अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ॥ ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ॥ ११ ॥ माता च पार्वती देवी पिता देवो महेश्वरः ॥ बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥ १२ ॥

इति श्रीमच्छङ्कराचार्यविरचितमन्नपूर्णाष्टकस्तोत्रं समाप्तम् ॥ १५ ॥

---

७५ सङ्कटानामाष्टकम् ।

श्रीगणेशाय नमः ॥ नारद उवाच ॥ जैगीषव्य मुनिश्रेष्ठ सर्वज्ञ सुखदायक ॥ आख्यातानि सुपुण्यानि श्रुतानि त्वत्प्रसादतः ॥ १ ॥ न तृप्तिमधिगच्छामि तव वागमृतेन च ॥ वदस्वैकं महाभाग सङ्कटाख्यानमुत्तमम् ॥ २ ॥ इति तस्य वचः श्रुत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जैगीषव्योऽब्रवीत्ततः ॥ सङ्कष्टनाशनं स्तोत्रं शृणु देवर्षिसत्तम ॥ ३ ॥ द्वापरे तु पुरा वृत्तो भ्रष्टराज्यो युधिष्ठिरः ॥ भ्रातृभिः सहितो राज्यनिर्वेदं परमं गतः ॥ ४ ॥ तदानीं तु ततः काशीं पुरीं यातो महामुनिः ॥ मार्कण्डेय इति ख्यातः सह शिष्यैर्महायशाः ॥ ५ ॥ तं दृष्ट्वा स समुत्थाय प्रणिपत्य सुपूजितः ॥ किमर्थं म्लानवदन एतत्त्वं मां निवेदय ॥ ६ ॥ युधिष्ठिर उवाच ॥ सङ्कष्टं मे महत्प्राप्तमेतादृग्वदनं ततः ॥ एतन्निवारणोपायं किञ्चिद्ब्रूहि मुने मम ॥ ७ ॥ मार्कण्डेय उवाच ॥ आनन्दकानने देवी सङ्कटा नाम विश्रुता ॥ वीरेश्वरोत्तरे भागे पूर्वं चन्द्रेश्वरस्य च ॥ ८ ॥ शृणु नामाष्टकं तस्याः सर्वसिद्धिकरं नृणाम् ॥ सङ्कटा प्रथमं नाम द्वितीयं विजया तथा ॥ ९ ॥ तृतीयं कामदा प्रोक्तं चतुर्थं दुःखहारिणी ॥ शर्वाणी पञ्चमं नाम षष्ठं कात्यायनी तथा ॥ १० ॥ सप्तमं भीमनयना सर्वरोगहराऽष्टमम् ॥ नामाष्टकमिदं पुण्यं त्रिसन्ध्यं श्रद्धयाऽन्वितः ॥११॥ यः पठेत्पाठयेद्वापि नरो मुच्येत सङ्कटात् ॥ इत्युक्त्वा तु द्विजश्रेष्ठमृषिर्वाराणसीं ययौ ॥ १२ ॥ इति तस्य वचः श्रुत्वा नारदो हर्षनिर्भरः ॥ ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्पूजितां देवीं वीरेश्वरसमन्विताम् ॥ १३ ॥ भुजैस्तु दशभिर्युक्तां लोचनत्रयभूषिताम् ॥ माला-कमण्डलुयुतां पद्मशङ्खगदायुताम् ॥ १४ ॥ त्रिशूल-डमरुधरां खड्गचर्मविभूषिताम् ॥ वरदाभयहस्तां तां प्रणम्य विधिनन्दनः ॥ १५ ॥ वारत्रयं गृहीत्वा तु ततो विष्णुपुरं ययौ ॥ एतत्स्तोत्रस्य पठनं पुत्र-पौत्रविवर्धनम् ॥ १६ ॥ सङ्कष्टनाशनं चैव त्रिषु लोकेषु विश्रुतम् ॥ गोपनीयं प्रयत्नेन महावन्ध्या-प्रसूतिकृत ॥ १७ ॥

इति श्रीपद्मपुराणे सङ्कटानामाष्टकं सम्पूर्णम् ॥ १६ ॥

७६ इन्द्राक्षीस्तोत्रम् ।

श्रीगणेशायनमः ॥ ॐ अस्य श्रीइन्द्राक्षीस्तोत्र-मन्त्रस्य सहस्राक्ष ऋषिः ॥ इन्द्राक्षी देवता ॥ अनुष्टुप्छन्दः ॥ महालक्ष्मीर्बीजम् ॥ भुवनेश्वरीति शक्तिः ॥ भवानीति कीलकम् ॥ ॐ श्रीं ह्रीं क्लीं इति बीजानि ॥ मम सर्वाभीष्टसिद्ध्यर्थं श्रीमदि-न्द्राक्षीस्तोत्रजपे विनियोगः ॥ ॐ इन्द्राक्षी इत्यङ्गु-ष्ठाभ्यां नमः ॥ ॐ महालक्ष्मीरिति तर्जनीभ्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमः ॥ ॐ महेश्वरीति मध्यमाभ्यां नमः ॥ ॐ अम्बुजाक्षीत्यनामिकाभ्यां नमः ॥ ॐ कात्यायनीति कनिष्ठिकाभ्यां नमः ॥ ॐ कौमारीति करतलकरपृष्ठाभ्यां नमः ॥ ॐ इन्द्राक्षीति हृदयाय नमः॥ ॐ महालक्ष्मीरिति शिरसे स्वाहा ॥ ॐ महेश्वरीति शिखायै वषट् ॥ ॐ अम्बुजाक्षीति कवचाय हुम् । ॐ कात्यायनीति नेत्रत्रयाय वौषट् ॥ ॐ कौमारीत्यस्त्राय फट् ॥ ॐ भूर्भुवःस्वरोम् इति दिग्बन्धनम् ॥
पूर्वस्यां पातु मां ब्राह्मी चाग्नेय्यां तु महेश्वरी ॥ कौमारी पातु याम्ये वै नैर्ऋत्यां पातु भैरवी ॥ १ ॥
पश्चिमे पातु वाराही वायव्ये नारसिंहिका ॥ कालरात्रिरुदीच्यां वा ऐशान्यां सर्वशक्तिधृक् ॥ २ ॥
ऊर्ध्वं मे भैरवी पातु चाधःस्थं विन्ध्यवासिनी ॥ यद्यद्विषमसंस्थानं तत्तद्रक्षतु चेश्वरी ॥ ३ ॥ अथ ध्यानम् ॥ इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रद्वयान्विताम् ॥ वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥१॥
इन्द्राक्षीं युवतीं देवीं नानालङ्कारभूषिताम् ॥ प्रसन्नवदनाम्भोजामप्सरोगणसेविताम् ॥ २ ॥ द्विभुजां सौम्यवदनां पाशाङ्कुशधरां पराम् ॥ त्रैलोक्यमोहिनीं देवीमिन्द्राक्षीनामकीर्तिताम् ॥ ३ ॥ अथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्त्रः ॥ ऐं ह्रीं श्रीं क्लीं क्लूं इन्द्राक्ष्यै नमः ॥
इन्द्र उवाच ॥ इन्द्राक्षी नाम सा देवी दैवतैः
समुदाहृता ॥ गौरी शाकम्भरी देवी दुर्गानाम्नीति
विश्रुता ॥ ४ ॥ कात्यायनी महादेवी चन्द्रघण्टा
महातपा ॥ सावित्री सा च गायत्री ब्रह्माणी ब्रह्म-
वादिनी ॥ ५ ॥ नारायणी भद्रकाली रुद्राणी
कृष्णपिङ्गला ॥ अग्निज्वाला रौद्रमुखी कालरात्रि-
स्तपस्विनी ॥ ६ ॥ मेघश्यामा सहस्राक्षी मुक्तकेशी
जलोदरी ॥ महादेवी मुक्तकेशी घोररूपा महा-
बला ॥ ७ ॥ अजिता भद्रदा नन्दा रोगहन्त्री
शिवप्रिया ॥ शिवदूती कराली च प्रत्यक्षा परमे-
श्वरी ॥ ८ ॥ सदा सम्मोहिनी देवी सुन्दरी भुव-
नेश्वरी ॥ इन्द्राक्षी इन्द्ररूपा च इन्द्रशक्तिः परा-
यणा ॥९॥ महिषासुरसंहर्त्री चामुण्डा गर्भदेवता ॥
वाराही नारसिंही च भीमा भैरवनादिनी ॥ १० ॥
श्रुतिः स्मृतिर्धृतिर्मेधा विद्या लक्ष्मीः सरस्वती ॥
अनन्ता विजया पूर्णा मानस्तोकाऽपराजिता ॥११॥
भवानी पार्वती दुर्गा हैमवत्यम्बिका शिवा ॥
एतैर्नामशतैर्दिव्यैः स्तुता शक्रेण धीमता ॥ १२ ॥
आयुरारोग्यमैश्वर्यं वित्तं ज्ञानं यशो बलम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाभिमात्रे जले स्नात्वा सहस्रपरिसंख्यया ॥ १३ ॥ जपेत्स्तोत्रमिमं मन्त्रं वाचां सिद्धिर्भवेत्ततः ॥ अनेन विधिना भक्त्या मन्त्रसिद्धिश्च जायते ॥१४॥ सन्तुष्टा च भवेद्देवी प्रत्यक्षा सम्प्रजायते ॥ शतमावर्तयेद्यस्तु मुच्यते नात्र संशयः ॥ १५ ॥ आवर्तनसहस्रेण लभ्यते वाञ्छितं फलम् ॥ सायं शतं पठेन्नित्यं षण्मासात्सिद्धिरुच्यते ॥ १६ ॥ चोरव्याधिभयस्थाने मनसा ह्यनुचिन्तयन् ॥ संवत्सरमुपाश्रित्य सर्वकामार्थसिद्धये ॥ १७ ॥ राजानं वश्यमाप्नोति षण्मासान्नात्र संशयः ॥ १८ ॥

इति श्री'युगल'कृतमिन्द्राक्षीस्तोत्रं सम्पूर्णम् ॥ १७ ॥

---

७७ भवानीभुजङ्गस्तोत्रम् ।

श्रीभवान्यै नमः ॥ षडाधारपङ्केरुहान्तर्विराजत्सुषुम्नान्तरालेऽतितेजोल्लसन्तीम् ॥ सुधामण्डलं द्रावयन्तीं पिबन्तीं सुधामूर्तिमीडेऽहमानन्दरूपाम् ॥ १ ॥ ज्वलत्कोटिबालार्कभासारुणाङ्गीं सुलावण्यशृङ्गारशोभाभिरामाम् ॥ महापद्मकिञ्जल्कमध्ये विराजत्त्रिकोणोल्लसन्तीं भजे श्रीभवानीम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ २ ॥ कणत्किङ्किणीनूपुरोद्भासिरत्नप्रभालीढलाक्षार्द्रपादारविन्दाम् ॥ अजेशाच्युताद्यैः सुरैः सेव्यमानां महादेवि मन्मूर्ध्नि ते भावयामि ॥ ३ ॥ सुशोणाम्बराबद्धनीवीविराजन्महारत्नकाञ्चीकलापं नितम्बतम् ॥ स्फुरद्दक्षिणावर्तनाभिं च तिस्रो बली रम्यते रोमराजीं भजेऽहम् ॥ ४ ॥ लसद्वृत्तमुत्तुङ्गमाणिक्यकुम्भोपमश्रीस्तनद्वन्द्वमम्बाम्बुजाक्षीम् ॥ भजे पूर्णदुग्धाभिरामं तवेदं महाहारदीप्तं सदा प्रस्नुतास्यम् ॥ ५ ॥ शिरीषप्रसूनोल्लसद्बाहुदण्डैर्ज्वलद्बाणकोदण्डपाशाङ्कुशैश्च ॥ चलत्कङ्कणोदारकेयूरभूषाज्वलद्भिः स्फुरन्तीं भजे श्रीभवानीम् ॥ ६ ॥ [१]शरत्पूर्णबिम्बाधरस्मेरवक्त्रारविन्दश्रियं शोभमानां प्रसन्नाम् ॥ सुरत्नावलीहारताटङ्कशोभां भजे सुप्रसन्नामहं श्रीभवानीम् ॥ ७ ॥ सुनासापुटं पद्मपत्रायताक्षं यजन्तः श्रियं दानदक्षं कटाक्षम् ॥ ललाटोल्लसद्गन्धकस्तूरिभूषोज्ज्वलद्भिः स्फुरन्तीं भजे श्रीभवानीम् ॥ ८ ॥

---

१. 'शरत्पूर्णचन्द्रप्रभापूर्णबिम्बाधरस्मेरवक्त्रारविन्दश्रियं ते ॥' इति पाठभेदः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चलत्कुण्डलान्ते भ्रमद्भृङ्गवृन्दाघनस्निग्धधम्मिल्ल-
भूषोज्ज्वलन्तीम् ॥ स्फुरन्मौलिमाणिक्यमध्येन्दुरे-
खाविलासोल्लसद्दिव्यमूर्धानमीडे ॥ ९ ॥ स्फुरावा-
स्यबिम्बस्य मे हृत्सरोजे सदा वाङ्मयं सर्वतेजो-
मयं च ॥ इति श्रीभवानिस्वरूपं तदेवं प्रपञ्चात्परं
चातिसूक्ष्मं प्रसन्नम् ॥ १० ॥ गणेशाणिमाद्याखिलैः
शक्तिवृन्दैः स्फुरच्छ्रीमहाचक्रराजोल्लसन्तीम् ॥ परां
राजराजेश्वरीं त्वां भवानीं शिवाङ्कोपरिस्थां शिवां
भावयेऽहम् ॥ ११ ॥ त्वमर्कस्त्वमग्निस्त्वमिन्दुस्त्व-
मापस्त्वमाकाशभूवायवस्त्वं चिदात्मा ॥ त्वदन्यो
न कश्चित्प्रकाशोऽस्ति सर्वं सदानन्दसंवित्स्वरूपं
तवेदम् ॥ १२ ॥ गुरुस्त्वं शिवस्त्वं च शक्तिस्त्वमेव
त्वमेवासि माता पिताऽसि त्वमेव॥ त्वमेवासि विद्या
त्वमेवासि बुद्धिर्गतिर्मे मतिर्देवि सर्वं त्वमेव॥१३॥
श्रुतीनामगम्यं सुवेदागमाद्यैर्महिम्नो न जानाति
पारं तवेदम् ॥ स्तुतिं कर्तुमिच्छामि ते त्वं भवानि
क्षमस्वेदमम्ब प्रमुग्धः किलाहम्॥१४॥ शरण्ये वरण्ये
सुकारुण्यपूर्णे हिरण्योदराद्यैरगम्येऽतिपुण्ये ॥ भवा-
रण्यभीतं च मां पाहि भद्रे नमस्ते नमस्ते नमस्ते
भवानि ॥ १५ ॥ इमामन्वहं श्रीभवानीभुजङ्गस्तुतिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यः पठेच्छ्रोतुमिच्छेत तस्मै ॥ स्वकीयं पदं शाश्वतं चैव सारं श्रियं चाष्टसिद्धीश्च देवी ददाति ॥१६॥

इति श्री मच्छङ्कराचार्यविरचितं भवानी भुजङ्गस्तोत्रं सम्पूर्णम् ॥ १८ ॥

---

७८ दुर्गापदुद्धारस्तोत्रम् ।

श्रीगणेशाय नमः ॥ नमस्ते शरण्ये शिवे सानुकम्पे नमस्ते जगद्व्यापिके विश्वरूपे ॥ नमस्ते जगद्वन्द्यपादारविन्दे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥१॥ नमस्ते जगच्चिन्त्यमानस्वरूपे नमस्ते महायोगिनि ज्ञानरूपे ॥ नमस्ते नमस्ते सदानन्दरूपे नमस्ते० ॥ २ ॥ अनाथस्य दीनस्य तृष्णातुरस्य भयार्तस्य भीतस्य बद्धस्य जन्तोः ॥ त्वमेका गतिर्देवि निस्तारकर्त्री नम० ॥३॥ अरण्ये रणे दारुणे शत्रुमध्येऽनले सागरे प्रान्तरे राजगेहे ॥ त्वमेका गतिर्देवि निस्तारनौका नमस्ते० ॥ ४ ॥ अपारे महादुस्तरेऽत्यन्तघोरे विपत्सागरे मज्जतां देहभाजाम् ॥ त्वमेका गतिर्देवि निस्तारहेतुर्नमस्ते० ॥ ५ ॥ नमश्चण्डिके चण्डदुर्दण्डलीलासमुत्खण्डिताखण्डिताशेषशत्रो ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वमेकागतिर्देवि निस्तारबीजे नमस्ते० ॥ ६ ॥ त्वमेवाघभावाधृतासत्यवादिर्न जाताजितांक्रोधनात्क्रोधनिष्ठा ॥ इडा पिङ्गला त्वं सुषुम्ना च नाडी नमस्ते० ॥ ७ ॥ नमो देवि दुर्गे शिवे भीमनादे सरस्वत्यरुन्धत्यमोघस्वरूपे ॥ विभूतिः शची कालरात्रिः सती त्वं नमस्ते० ॥ ८ ॥ शरणमसि सुराणां सिद्धविद्याधराणां मुनिमनुजपशूनां दस्युभिस्त्रासितानाम् ॥ नृपतिगृहगतानां व्याधिभिः पीडितानां त्वमसि शरणमेका देवि दुर्गे प्रसीद ॥ ९ ॥ इदं स्तोत्रं मया प्रोक्तमापदुद्धारहेतुकम् ॥ त्रिसन्ध्यमेकसन्ध्यं वा पठनाद् घोरसङ्कटात् ॥१०॥ मुच्यते नात्र सन्देहो भुवि स्वर्गे रसातले ॥ सर्वं वा श्लोकमेकं वा यः पठेद्भक्तिमान् सदा ॥११॥ स सर्वं दुष्कृतं त्यक्त्वा प्राप्नोति परमं पदम् ॥ पठनादस्य देवेशि किं न सिध्यति भूतले ॥ १२ ॥ स्तवराजमिदं देवि संक्षेपात्कथितं मया ॥ १३ ॥

इति श्रीसिद्धेश्वरीतन्त्रे उमामहेश्वरसंवादे

दुर्गापदुद्धारस्तोत्रं सम्पूर्णम् ॥ १९ ॥

— —

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७९ गायत्रीस्तोत्रम् ।

श्रीनारद उवाच ॥ भक्तानुकम्पिन्सर्वज्ञ हृदयं पापनाशनम् ॥ गायत्र्याः कथितं तस्माद्गायत्र्याः स्तोत्रमीरय ॥ १ ॥ श्रीनारायण उवाच ॥ आदिशक्ते जगन्मातर्भक्तानुग्रहकारिणि ॥ सर्वत्र व्यापिकेऽनन्ते श्रीसन्ध्ये ते नमोऽस्तु ते ॥ २ ॥ त्वमेव सन्ध्या गायत्री सावित्री च सरस्वती ॥ ब्रह्माणी वैष्णवी रौद्री रक्तश्वेता सितेतरा ॥ ३ ॥ प्रातर्बाला च मध्याह्ने यौवनस्था भवेत्पुनः ॥ वृद्धा सायं भगवती चिन्त्यते मुनिभिः सह ॥ ४ ॥ हंसस्था गरुडारूढा तथा वृषभवाहिनी ॥ ऋग्वेदाध्यायिनी भूमौ दृश्यते या तपस्विभिः ॥ ५ ॥ यजुर्वेदं पठन्ती च अन्तरिक्षे विराजते ॥ या सामगापि सर्वेषु भ्राम्यमाणा तथा भुवि ॥ ६ ॥ रुद्रलोकं गता त्वं हि विष्णुलोकनिवासिनी ॥ त्वमेव ब्रह्मणो लोके मर्त्यानुग्रहकारिणी ॥ ७ ॥ सप्तर्षिप्रीतिजननी माया बहुवरप्रदा ॥ शिवयोः करनेत्रोत्था ह्यश्रुस्वेदसमुद्भवा ॥ ८ ॥ आनन्दजननी दुर्गा दशधा परिपठ्यते ॥ वरेण्या वरदा चैव वरिष्ठा वरवर्णिनी ॥ ९ ॥ गरिष्ठा च वराही च वरारोहा च सप्तमी ॥ नीलगङ्गा तथा सन्ध्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वदा भोगमोक्षदा ॥ १० ॥ भागीरथी मर्त्यलोके पाताले भोगवत्यपि ॥ त्रैलोक्यवाहिनी देवी स्थानत्रयनिवासिनी ॥ ११ ॥ भूर्लोकस्था त्वमेवासि धरित्री लोकधारिणी ॥ भुवो लोके वायुशक्तिः स्वर्लोके तेजसां निधिः ॥ १२ ॥ महर्लोके महासिद्धिर्जनलोकेऽजनेत्यपि ॥ तपस्विनी तपोलोके सत्यलोके तु सत्यवाक् ॥ १३ ॥ कमला विष्णुलोके च गायत्री ब्रह्मलोकगा ॥ रुद्रलोके स्थिता गौरी हरार्धाङ्गनिवासिनी ॥ १४ ॥ अहमो महतश्चैव प्रकृतिस्त्वं हि गीयसे ॥ साम्यावस्थात्मिका त्वं हि शबलब्रह्मरूपिणी ॥ १५ ॥ ततः परा पराशक्तिः परमा त्वं हि गीयसे ॥ इच्छाशक्तिः क्रियाशक्तिर्ज्ञानशक्तिस्त्रिशक्तिदा ॥ १६ ॥ गङ्गा च यमुना चैव विपाशा च सरस्वती ॥ सरयू देविका सिन्धुर्नर्मदैरावती तथा ॥ १७ ॥ गोदावरी शतद्रुश्च कावेरी देवलोकगा ॥ कौशिकी चन्द्रभागा च वितस्ता च सरस्वती ॥ १८ ॥ गण्डकी तापिनी तोया गोमती वेत्रवत्यपि ॥ इडा च पिङ्गला चैव सुषुम्ना च तृतीयका ॥ १९ ॥ गान्धारी हस्तजिह्वा च पूषाऽपूषा तथैव च ॥ अलम्बुषाः कुहूश्चैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शङ्खिनी प्राणवाहिनी ॥ २० ॥ नाडी च त्वं शरीरस्था गीयसे प्राक्तनैर्बुधैः ॥ हृत्पद्मस्था प्राणशक्तिः कण्ठस्था स्वप्ननायिका ॥ २१ ॥ तालुस्था त्वं सदाधारा बिन्दुस्था बिन्दुमालिनी ॥ मूले तु कुण्डलीशक्तिर्व्यापिनी केशमूलगा ॥ २२ ॥ शिखामध्यासना त्वं हि शिखाग्रे तु मनोन्मनी ॥ किमन्यद्बहुनोक्तेन यत्किञ्चिज्जगतीतले ॥ २३ ॥ तत्सर्वं त्वं महादेवि श्रिये सन्ध्ये नमोऽस्तु ते ॥ इतीदं कीर्तिदं स्तोत्रं सन्ध्यायां बहुपुण्यदम् ॥ २४ ॥ महापापप्रशमनं महासिद्धिविधायकम् ॥ य इदं कीर्तयेत्स्तोत्रं सन्ध्याकाले समाहितः ॥ २५ ॥ अपुत्रः प्राप्नुयात्पुत्रं धनार्थी धनमाप्नुयात् ॥ सर्वतीर्थतपोदानयज्ञयोगफलं लभेत् ॥ २६ ॥ भोगान्भुक्त्वा चिरं कालमन्ते मोक्षमवाप्नुयात् ॥ तपस्विभिः कृतं स्तोत्रं स्नानकाले तु यः पठेत् ॥ २७ ॥ यत्र कुत्र जले मग्नः सन्ध्यामज्जनजं फलम् ॥ लभते नात्र संदेहः सत्यं सत्यं तु नारद ॥ २८ ॥ शृणुयाद्योऽपि तद्भक्त्या स तु पापात्प्रमुच्यते ॥ पीयूषसदृशं वाक्यं सन्ध्योक्तं नारदेरितम् ॥ २९ ॥

इति श्रीगायत्रीस्तोत्रं सम्पूर्णम् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८० सरस्वतीस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ॐ अस्य श्रीसरस्वतीस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । श्रीसरस्वती देवता । धर्मार्थकाममोक्षार्थे जपे विनियोगः ॥ आरूढा श्वेतहंसे भ्रमति च गगने दक्षिणे चाक्षसूत्रं वामे हस्ते च दिव्याम्बरकनकमयं पुस्तकं ज्ञानगम्या ॥ सा वीणां वादयन्ती स्वकरकरजपैः शास्त्रविज्ञानशब्दैः क्रीडन्ती दिव्यरूपा करकमलधरा भारती सुप्रसन्ना ॥ १ ॥ श्वेतपद्मासना देवी श्वेतगन्धानुलेपना ॥ अर्चिता मुनिभिः सर्वैर्ऋषिभिः स्तूयते सदा ॥ एवं ध्यात्वा सदा देवीं वाञ्छितं लभते नरः ॥ २ ॥ शुक्लां ब्रह्मविचारसारपरमाद्यां जगद्व्यापिनीं वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ॥ हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥ ३ ॥ या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ॥ या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥४॥ ह्रीं-ह्रीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्रीं-हृद्यैकबीजे शशिरुचिकमले कल्पविस्पष्टशोभे भव्ये भव्यानुकूले कुमतिवनदवे विश्वविन्द्यांघ्रिपद्मे पद्मे पद्मोपविष्टे प्रणतजनमनोमोदसंपादयित्री प्रोत्फुल्लज्ञानकूटे हरिनिजदयिते देवि संसारसारे ॥ ५ ॥ ऐं ऐं ऐं दृष्टमन्त्रे कमलभवमुखाम्भोजभूते स्वरूपे रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे ॥ न स्थूले नैव सूक्ष्मेऽप्यविदितविभवे नापि विज्ञानतत्त्वे विश्वे विश्वान्तरात्मे सुरवरनमिते निष्कले नित्यशुद्धे ॥ ६ ॥ ह्रीं-ह्रीं-ह्रीं जाप्यतुष्टे हिमरुचिमुकुटे वल्लकीव्यग्रहस्ते मातर्मातर्नमस्ते दह दह जडतां देहि बुद्धिं प्रशस्ताम् ॥ विद्ये वेदान्तवेद्ये परिणतपठिते मोक्षदे मुक्तिमार्गे मार्गातीतस्वरूपे भव मम वरदा शारदे शुभ्रहारे ॥ ७ ॥ धीं-धीं-धीं धारणाख्ये धृतिमतिनतिभिर्नामभिः कीर्तनीये नित्येऽनित्ये निमित्ते मुनिगणनमिते नूतने वै पुराणे ॥ पुण्ये पुण्यप्रवाहे हरिहरनमिते नित्यशुद्धे सुवर्णे मातर्मात्रार्धतत्त्वे मतिमतिमतिदे माधवप्रीतिमोदे ॥ ८ ॥ ह्रूं ह्रूं ह्रूं स्वस्वरूपे दह दह दुरितं पुस्तकव्यग्रहस्ते सन्तुष्टाकारचित्ते स्मितमुखि सुभगे जृम्भिणि स्तम्भविद्ये ॥ मोहे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुग्धप्रवाहे कुरु मम विमतिध्वान्तविध्वंसमीडे गीर्गौर्वाग्भारति त्वं कविवररसनासिद्धिदे सिद्धिसाध्ये ॥ ९ ॥ स्तौमि त्वां त्वां च वन्दे मम खलु रसनां नो कदाचित्त्यजेथा मा मे बुद्धिर्विरुद्धा भवतु न च मनो देवि मे यातु पापम् ॥ मा मे दुःखं कदाचित्क्वचिदपि विषयेऽप्यस्तु मे नाकुलत्वं शास्त्रे वादे कवित्वे प्रसरतु मम धीर्माऽस्तु कुण्ठा कदापि ॥ १० ॥ इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो वाणीं वाचस्पतेरप्यविदितविभवो वाक्पटुर्मृष्टकण्ठः ॥ स स्यादिष्टार्थलाभी सुतमिव सततं पाति तं सा च देवी सौभाग्यं तस्य लोके प्रभवति कविता विघ्नमस्तं प्रयाति ॥ ११ ॥ निर्विघ्नं तस्य विद्या प्रभवति सततं चाश्रुतग्रन्थबोधः कीर्तिस्त्रैलोक्यमध्ये निवसति वदने शारदा तस्य साक्षात् ॥ १२ ॥ दीर्घायुर्लोकपूज्यः सकलगुणनिधिः सन्ततं राजमान्यो वाग्देव्याः संप्रसादात् त्रिजगति विजयी जायते सत्सभासु ॥ १३ ॥ ब्रह्मचारी व्रती मौनी त्रयोदश्यां निरामिषः ॥ सारस्वतो जनः पाठात्सकृदिष्टार्थलाभवान् ॥ १४ ॥ पक्षद्वये त्रयोदश्यामेकविंशतिसंख्यया ॥ अविच्छिन्नः पठे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्धीमान् ध्यात्वा देवीं सरस्वतीम् ॥ १५ ॥ सर्व-पापविनिर्मुक्तः सुभगो लोकविश्रुतः ॥ वाञ्छितं फलमाप्नोति लोकेऽस्मिन्नात्र संशयः ॥ १६ ॥ ब्रह्मणेति स्वयं प्रोक्तं सरस्वत्या स्तवं शुभम् ॥ प्रयत्नेन पठेन्नित्यं सोऽमृतत्वाय कल्पते ॥ १७ ॥

इति श्रीमद्ब्रह्मणा विरचितं सरस्वती-
स्तोत्रं सम्पूर्णम् ॥ २१ ॥

---

८१ नीलसरस्वतीस्तोत्रम्

श्रीगणेशाय नमः ॥ घोररूपे महारावे सर्वशत्रु-भयङ्करि ॥ भक्तेभ्यो वरदे देवि त्राहि मां शरणा-गतम् ॥ १ ॥ सुरासुरार्चिते देवि सिद्धगन्धर्व-सेविते ॥ जाड्यपापहरे देवि त्रा० ॥ २ ॥ जटा-जूटसमायुक्ते लोलजिह्वान्तकारिणि ॥ द्रुतबुद्धिकरे देवि त्रा० ॥ ३ ॥ सौम्यक्रोधधरे रूपे चण्डरूपे नमोऽस्तु ते ॥ सृष्टिरूपे नमस्तुभ्यं त्रा० ॥ ४ ॥ जडानां जडतां हन्ति भक्तानां भक्तवत्सला ॥ मूढतां हर मे देवि त्रा० ॥ ५ ॥ ह्रूं ह्रूंकारमये देवि बलिहोमप्रिये नमः ॥ उग्रतारे नमो नित्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रा० ॥ ६ ॥ बुद्धिं देहि यशो देहि कवित्वं देहि देहि मे ॥ मूढत्वं हर मे देवि त्रा० ॥ ७ ॥ इन्द्रादिविलसद्द्वन्द्ववन्दिते करुणामयि ॥ तारे ताराधिनाथास्ये त्रा० ॥ ८ ॥ अष्टम्यां च चतुर्दश्यां नवम्यां यः पठेन्नरः ॥ षण्मासैः सिद्धिमाप्नोति नात्र कार्या विचारणा ॥ ९ ॥ मोक्षार्थी लभते मोक्षं धनार्थी लभते धनम् ॥ विद्यार्थी लभते विद्यां तर्कव्याकरणादिकम् ॥ १० ॥ इदं स्तोत्रं पठेद्यस्तु सततं श्रद्धयाऽन्वितः ॥ तस्य शत्रुः क्षयं याति महाप्रज्ञा प्रजायते ॥ ११ ॥ पीडायां वापि संग्रामे जाड्ये दाने तथा भये ॥ य इदं पठति स्तोत्रं शुभं तस्य न संशयः ॥ इति प्रणम्य स्तुत्वा च योनिमुद्रां प्रदर्शयेत् ॥ १२ ॥

इति नीलसरस्वतीस्तोत्रं सम्पूर्णम् ॥ २२ ॥

---

८२ दशमहाविद्यास्तोत्रम् ।

श्रीगणेशाय नमः ॥ बालार्ककिरणभासं त्रयनयनां चतुर्भुजां जगज्जननीम् ॥ कामेश्वरशिवसहितां श्रीबालां त्रिपुरसुन्दरीं वन्दे ॥ १ ॥ शुष्क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कठोरशरीरां मदजलपां विघूर्णितां ललज्जिह्वाम् ॥
चर्वितपशुजनदेहां श्रीश्यामां दक्षिणकालिकां वन्दे ॥२॥
करकमलकलितवीणां नीलवसनमण्डितां सुनीलाङ्गीम् ॥ एकजटां शशिवदनां श्रीतारां नीलसरस्वतीं वन्दे ॥ ३ ॥ कनकालङ्काररुचिरां कौशेयाम्बरभूषितां सुगौराङ्गीम् ॥ ईश्वरशम्भुसमेतां वरदां भुवनेश्वरीं वन्दे ॥ ४ ॥ चरणोपासकसुखदां रत्नाभरणभूषितां विशालाक्षीम् ॥ करकमलां पदकमलां श्रीकमलां कमलाननां वन्दे ॥ ५ ॥ काञ्चनपीठनिविष्टां मुनिवरसादरवर्णितप्रभावाम् ॥ करुणापूरितनयनां श्रीबगलां पीताम्बरां वन्दे ॥ ६ ॥
प्रलयानलधूलिधूम्रां धूसरवसनां भयङ्करीं पशूनाम् ॥
अरिजनशाम्भवसुखदां विद्यां धूमावतीं वन्दे ॥७॥
नीलाम्बरपरिवीतां विगलितचिकुरां सुबिम्बोष्ठीम् ॥
यावकरञ्जितचरणां श्रीसुमुखीं मातङ्गिनीं वन्दे ॥ ८ ॥ प्रलयघनघोरनादां धवलचिताधूलिधूसरां चण्डीम् ॥ उरसि धृतमुण्डमालां कर्णकपालाञ्च भैरवीं वन्दे ॥ ९ ॥ ब्रह्मानन्दनिमग्नां श्रीदेवीं छिन्नमस्तकां वन्दे ॥ १० ॥ दक्षिणकरधृतखड्गां निजमुण्डधारिणीं दुर्गाम् ॥ नवनिधिवर्णितममलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तवनमिह श्रीदशमहाविद्यानाम् ॥ पठति नरो यदि भक्त्या स तु वल्लभतां प्रयाति जगदम्बाम् ॥ ११ ॥

इत्यस्मत्पूर्वजमिश्रनवनिधिरामकृतं
दशमहाविद्यास्तोत्रम् ॥ २३ ॥
इति देवीस्तोत्राणि ।

—:-:—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ गंगादितीर्थस्तोत्राणि ।

८३ गङ्गाष्टकम् (१)

श्रीगणेशाय नमः ॥ भगवति तव तीरे नीरमात्राशनोऽहं विगतविषयतृष्णः कृष्णमाराधयामि ॥ सकलकलुषभङ्गे स्वर्गसोपानसङ्गे तरलतरतरङ्गे देवि गङ्गे प्रसीद ॥१॥ भगवति भवलीलामौलिमाले तवाम्भःकणमणुपरिमाणं प्राणिनो ये स्पृशन्ति ॥ अमरनगरनारीचामरग्राहिणीनां विगतकलिकलङ्कातङ्कसङ्के लुठन्ति ॥१॥ ब्रह्माण्डं खण्डयन्ती हरशिरसि जटावल्लिमुल्लासयन्ती स्वर्लोकादापतन्ती कनकगिरिगुहागण्डशैलात्स्खलन्ती ॥ क्षोणीपृष्ठे लुठन्ती दुरितचयचमूर्निर्भरं भर्त्सयन्ती पाथोधिं पूरयन्ती सुरनगरसरित्पावनी नः पुनातु ॥ ३ ॥ मज्जन्मातङ्गकुम्भच्युतमदमदिरामोदमत्तालिजालं स्नानैः सिद्धाङ्गनानां कुचयुगविगलत्कुङ्कुमासङ्गपिङ्गम् ॥ सायं प्रातर्मुनीनां कुशकुसुमचयैश्छन्नतीरस्थनीरं पायान्नो गाङ्गमम्भः करिकलभकराक्रान्तरं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हस्तरङ्गम् ॥ ४ ॥ आदावादिपितामहस्य नियम-व्यापारपात्रे जलं पश्चात् पन्नगशायिनो भगवतः पादोदकं पावनम् ॥ भूयः शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्याकल्मषनाशिनी भगवती भागीरथी दृश्यते ॥५॥ शैलेन्द्रादवतारिणी निजजले मज्जज्जनोत्तारिणी पारावारविहारिणी भवभयश्रेणीसमुत्सारिणी ॥ शेषाङ्गैरनुकारिणी हरशिरोवल्लीदलाकारिणी काशीप्रान्तविहारिणी विजयते गङ्गा मनोहारिणी ॥ ६ ॥ कुतो वीचिर्वीचिस्तव यदि गता लोचनपथं त्वमापीता पीताम्बरपुरनिवासं वितरसि ॥ त्वदुत्सङ्गे गङ्ग पतति यदि कायस्तनुभृतां तदा मातः शातक्रतवपदलाभोऽप्यतिलघुः ॥ ७ ॥ गङ्गे त्रैलोक्यसारे सकलसुरवधूधौतविस्तीर्णतोये पूर्णब्रह्मस्वरूपे हरिचरणरजोहारिणि स्वर्गमार्गे ॥ प्रायश्चित्तं यदि स्यात्तव जलकणिकाब्रह्महत्यादिपापे कस्त्वां स्तोतुं समर्थस्त्रिजगदघहरे देवि गङ्गे प्रसीद ॥ ८ ॥ मातः शाम्भवि शम्भुसङ्गमिलिते मौलौ निधायाञ्जलिं त्वत्तीरे वपुषोऽवसानसमये नारायणांघ्रिद्वयम् ॥ सानन्दं स्मरतो भविष्यति मम प्राण-

१ 'भूतले' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रयाणोत्सवो भूयाद्भक्तिरविच्युता हरिहराद्वैतात्मिका शाश्वती ॥९॥ गङ्गाष्टकमिदं पुण्यं यः पठेत्प्रयतो नरः ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ १० ॥

इति श्रीमच्छङ्कराचार्यविरचितं गङ्गाष्टकं सम्पूर्णम् ॥ १ ॥

---

८४ गङ्गाष्टकम् (२)

श्रीगणेशाय नमः ॥ मातः शैलसुतासपत्नि वसुधाशृङ्गारहारावलि स्वर्गारोहणवैजयन्ति भवतीं भागीरथीं प्रार्थये ॥ त्वत्तीरे वसतस्त्वदम्बु पिबतस्त्वद्वीचिषु प्रेङ्खतस्त्वन्नाम स्मरतस्त्वदर्पितदृशः स्यान्मे शरीरव्ययः ॥ १ ॥ त्वत्तीरे तरुकोटरान्तरगतो गङ्गे विहङ्गो वरं त्वन्नीरे नरकान्तकारिणि वरं मत्स्योऽथवा कच्छपः ॥ नैवान्यत्र मदान्धसिन्धुरघटासङ्घट्टघण्टारणत्कारत्रस्तसमस्तवैरिवनितालब्धस्तुतिर्भूपतिः ॥ २ ॥ उक्षा पक्षी तुरग उरगः कोऽपि वा वारणो वा वाराणस्यां जननमरण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्लेशदुःखासहिष्णुः ॥ न त्वन्यत्र प्रविरलरणत्कङ्कण-क्वाणमिश्रं वारस्त्रीभिश्चमरमरुता वीजितो भूमिपालः ॥ ३ ॥ काकैर्निष्कुषितं श्वभिः कवलितं गोमायुभिर्लुण्ठितं स्रोतोभिश्चलितं तटाम्बुलुलितं वीचीभिरान्दोलितम् ॥ दिव्यस्त्रीकरचारुचामर-मरुत्संवीज्यमानः कदा द्रक्ष्येऽहं परमेश्वरि त्रिपथगे भागीरथि स्वं वपुः ॥ ४ ॥ अभिनवबिसवल्ली पाद-पद्मस्य विष्णोर्मदनमथनमौलेर्मालतीपुष्पमाला ॥ जयति जयपताका काऽप्यसौ मोक्षलक्ष्म्याः क्षपित-कलिकलङ्का जाह्नवी नः पुनातु ॥५॥ एतत्तालत-मालसालसरलव्यालोलवल्लीलताच्छन्नं सूर्यकर प्रतापरहितं शङ्खेन्दुकुन्दोज्ज्वलम् ॥ गन्धर्वामर-सिद्धकिन्नरवधूतुङ्गस्तनास्फालितं स्नानाय प्रतिवा-सरं भवतु मे गाङ्गं जलं निर्मलम् ॥६॥ गाङ्गं वारि मनोहारि मुरारिचरणच्युतम् ॥ त्रिपुरारिशिरश्चारि पापहारि पुनातु माम् ॥ ७ ॥ पापापहारि दुरितारि-तरङ्गधारि शैलप्रचारि गिरिराजगुहाविदारि ॥ झङ्कारकारि हरिपादरजोपहारि गाङ्गं पुनातु सततं शुभकारि वारि ॥ ८ ॥ गङ्गाष्टकं पठति यः प्रयतः प्रभाते वाल्मीकिना विरचितं शुभदं मनुष्यः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रक्षाल्य गात्रकलिकल्मषपङ्कमाशु मोक्षं लभेत्पतति नैव नरो भवाब्धौ ॥ ६ ॥

इति श्रीवाल्मीकिविरचितं गङ्गाष्टकं सम्पूर्णम् ॥ २ ॥

८५ गङ्गास्तवः ।

श्रीगणेशाय नमः ॥ सूत उवाच ॥ शृणुध्वं मुनयः सर्वे गङ्गास्तवनमुत्तमम् ॥ शोकमोहहरं पुंसामृषिभिः परिकीर्तितम् ॥ १ ॥ ऋषय ऊचुः ॥ इयं सुरतरङ्गिणी भुवनवारिधेस्तारिणी स्तुता हरिपदाम्बुजादुपगता जगत्संसदः ॥ सुमेरुशिखरामरप्रियजलामलक्षालिनी प्रसन्नवदना शुभा भव भयस्य विद्राविणी ॥ २ ॥ भगीरथरथानुगा सुरकरीन्द्रदर्पापहा महेशमुकुटप्रभा गिरिशिरःपताका सिता ॥ सुरासुरनरोरगैरजभवाच्युतैः संस्तुता विमुक्तिफलशालिनी कलुषनाशिनी राजते ॥ ३ ॥ पितामहकमण्डलुप्रभवमुक्तिबीजा लता श्रुतिस्मृतिगणस्तुतद्विजकुलालवालावृता ॥ सुमेरुशिखराभिदा निपतिता त्रिलोकावृता सुधर्मफलशालिनी सुखपलाशिनी राजते ॥ ४ ॥ चरद्विहगमालिनी सगरवंशमुक्तिप्रदा मुनीन्द्रवरनन्दिनी दिवि मता च मन्दा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किनी ॥ सदा दुरितनाशिनी विमलवारिसन्दर्शनप्रणामगुणकीर्तनादिषु जगत्सु संराजते ॥ ५ ॥ महाभिषसुताङ्गना हिमगिरीशकूटस्तना सफेनजलहासिनी सितमरालसञ्चारिणी ॥ चलल्लहरिसत्करा वरसरोजमालाधरा रसोल्लसितगामिनी जलधिकामिनी राजते ॥ ६ ॥ क्वचिन्मुनिगणैः स्तुता क्वचिदनङ्गसम्पूजिताः क्वचित्कलकलस्वना क्वचिदधीरयादोगणा ॥ क्वचिद्रविकरोज्ज्वला क्वचिदुदग्रपाताकुला क्वचिज्जनविगाहिता जयति भीष्ममाता सती ॥ ७ ॥ स तत्र कुशली जनः प्रणमतीह भागीरथीं स एव तपसां निधिर्जपति जाह्नवीमादरात् ॥ स एव पुरुषोत्तमः स्मरति साधु मन्दाकिनीं स एव विजयी प्रभुः सुरतरङ्गिणीं सेवते ॥ ८ ॥ तवामलजलाचितं खगशृगालमीनक्षतं चलल्लहरिलोलितं रुचिरतीरजम्बालितम् ॥ कदा निजवपुर्मुदा सुरनरोरगैः संस्तुतोऽप्यहं त्रिपथगामिनीं प्रियमतीव पश्याम्यहो ॥९॥ त्वत्तीरे वसतिस्तवामलजलस्नानं तव प्रेक्षणं त्वन्नामस्मरणं तत्रोदयकथासंल्लापनं पावनम् ॥ गङ्गे मे तव सेवनैकनिपुणोऽप्यानन्दितश्चादृतः स्तुत्वा चोद्गतपातको भुवि कदा शान्तश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रिष्याम्यहम् ॥ १० ॥ इत्येतदृषिभिः प्रोक्तं गङ्गास्तवमनुत्तमम् ॥ स्वर्ग्यं यशस्यमारोग्यं पठनाच्छ्रवणादपि ॥११॥ सर्वपापहरं पुंसां बलमायुर्विवर्धनम् ॥ प्रातर्मध्याह्नसायाह्ने गङ्गासान्निध्यता भवेत् ॥१२॥ इत्येतद्भार्गवाख्यानं शुकदेवान्मया श्रुतम् ॥ पठितं श्रावितं चात्र पुण्यं धन्यं यशस्करम् ॥ १३ ॥ अवतारं महाविष्णोः कल्केः परमसद्भुतम् ॥ पठतां शृण्वतां भक्त्या सर्वाशुभविनाशनम् ॥ १४ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे ऋषिकृतो गङ्गास्तवः सम्पूर्णः ॥ ३ ॥

—❀—❀—

८६ गङ्गास्तुतिः ।

श्रीगणेशाय नमः ॥ ब्रह्मोवाच ॥ नमः शिवायै गङ्गायै शिवदायै नमो नमः ॥ नमस्ते रुद्ररूपिण्यै शाङ्कर्यै ते नमो नमः ॥ १ ॥ नमस्ते विश्वरूपिण्यै ब्रह्ममूर्त्यै नमो नमः ॥ सर्वदेवस्वरूपिण्यै नमो भेषजमूर्त्तये ॥ २ ॥ सर्वस्य सर्वव्याधीनां भिषक्श्रेष्ठ्यै नमोऽस्तु ते ॥ स्थाणुजङ्गमसंभूतविषहन्त्र्य नमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमः ॥ ३ ॥ भोगोपभोगदायिन्यै भोगवत्यै नमो नमः ॥ मन्दाकिन्यै नमस्तेऽस्तु स्वर्गदायै नमो नमः ॥ ४ ॥ नमस्त्रैलोक्यभूषायै जगद्धात्र्यै नमो नमः ॥ नमस्त्रिशुक्लसंस्थायै तेजोवत्यै नमो नमः ॥ ५ ॥ नन्दायै लिङ्गधारिण्यै नारायण्यै नमो नमः ॥ नमस्ते विश्वमुख्यायै रेवत्यै ते नमो नमः ॥ ६ ॥ वृहत्यै ते नमस्तऽस्तु लोकधात्र्यै नमो नमः ॥ नमस्ते विश्वमित्रायै नान्दन्यै ते नमो नमः ॥७॥ पृथ्व्यै शिवामृतायै च सुवृषायै नमो नमः ॥ शान्तायै च वरिष्ठायै वरदायै नमो नमः ॥ ८ ॥ उस्रायै सुखदोग्ध्र्यै च सञ्जीविन्यै नमो नमः ॥ ब्रह्मिष्ठायै ब्रह्मदायै दुरितघ्न्यै नमो नमः ॥ ९ ॥ प्रणतार्तिप्रभञ्जिन्यै जगन्मात्रे नमोऽस्तु ते ॥ सर्वापत्प्रतिपक्षायै मङ्गलायै नमो नमः ॥ १० ॥ शरणागतदीनार्तपरित्राणपरायणे । सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥ ११ ॥ निर्लेपायै दुर्गहन्त्र्यै दक्षायै ते नमो नमः ॥ परात्परतरे तुभ्यं नमस्ते मोक्षदे सदा ॥ १२ ॥ गङ्गे ममाग्रतो भूया गङ्गे मे देवि पृष्ठतः । गङ्गे मे पार्श्वयोरेहि त्वयि गंगेऽस्तु मे स्थितिः ॥ १३ ॥ आदौ त्वमन्ते मध्ये च सर्वं त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गांगते शिवे ॥ त्वमेव मूलप्रकृतिस्त्वं हि नारायणः
परः ॥ १४ ॥ गंगे त्वं परमात्मा च शिवस्तुभ्यं
नमः शिवे ॥ य इदं पठते स्तोत्रं भक्त्या नित्यं नरोऽ
पि यः ॥ १५ ॥ शृणुयाच्छ्रद्धया युक्तः काय-
वाक्चित्तसंभवैः ॥ दशधा संस्थितैर्दोषैः सर्वैरेव
प्रमुच्यते ॥१६॥ सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि
लीयते ॥ ज्येष्ठे मासि सिते पक्षे दशमीहस्तसंयुता
॥ १७ ॥ तस्यां दशम्यामेतच्च स्तोत्रं गंगाजले
स्थितः ॥ यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः
॥ १८ ॥ सोऽपि तत्फलमाप्नोति गंगां सम्पूज्य यत्न-
तः ॥ अदत्तानामुपादानं हिंसा चैवाविधानतः ॥
॥१९॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥
पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः ॥ २० ॥
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥ पर-
द्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ॥ २१ ॥
वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् ॥ एतानि
दश पापानि हर त्वं मम जाह्नवि ॥ २२ ॥ दशपाप-
हरा यस्मात्तस्माद्दशहरा स्मृता । त्रयस्त्रिंशच्छतं
पूर्वान् पितॄनथ पितामहान् ॥ २३ ॥ उद्धरत्येव
संसारान्मन्त्रेणानेन पूजिता ॥ २४ ॥ नमो भग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वत्य दशपापहरायै गंगाय नारायण्यै रेवत्यै शिवायै दक्षायै अमृतायै विश्वरूपिण्यै नन्दिन्य ते नमो नमः ॥ २५ ॥ सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां करधृतकलशोद्यत्सोत्पलामत्यभीष्टाम् ॥ विधिहरिहररूपां सेन्दुकोटीरजुष्टां कलितसितदुकूलां जाह्नवीं तां नमामि ॥ २६ ॥ आदावादिपितामहस्य निगमव्यापारपात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् ॥ भूयः शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥ २७ ॥ गङ्गा गङ्गेति यो ब्रूयाद्योजनानां शतैरपि ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ २८ ॥

इति धर्माब्धिस्था दशहरा गङ्गास्तुतिः सम्पूर्णा ॥ ४ ॥

---

८७ नर्मदाष्टकम् ।

श्रीगणेशाय नमः ॥ सबिन्दुसिन्धुसुस्खलत्तरङ्गरञ्जितं द्विषत्सु पापजातजातकारिवारिसंयुतम् ॥ कृतान्तदूतकालभूतभीतिहारिवर्मदे त्वदीयपादपङ्कजं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमामि देवि नर्मदे ॥ १ ॥ त्वदम्बुलीनदीनमीन-
दिव्यसम्प्रदायकं मलौ मलौघभारहारि सर्वतीर्थ-
नायकम् ॥ सुमत्स्यकच्छनक्रचक्रचक्रवाकशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ २ ॥ महा-
गभीरनीरपूरपापधूतभूतलं ध्वनत्समस्तपातकारि-
दारितापदाजलम् ॥ जगल्लये महाभये मृकण्डुसूनु-
हर्म्यदे त्वदीयपादपं० ॥ ३ ॥ गतं तदैव मे भयं
त्वदम्बुवीक्षितं यदा मृकण्डुसूनुशौनकासुरारिसेवि
सर्वदा ॥ पुनर्भवाब्धिजन्मजं भवाब्धिदुःखवर्मदे
त्वदीयपादपङ्कजं० ॥ ४ ॥ अलक्षलक्षकिन्नरामरासु-
रादिपूजितं सुलक्षनीरतीरधीरपक्षिलक्षकूजितम् ॥
वसिष्ठशिष्टपिप्पलादिकर्दमादिशर्मदे त्वदीयपाद०
॥ ५ ॥ सनत्कुमारनाचिकेतकश्यपादिषट्पदैर्धृतं
स्वकीयमानसेषु नारदादिषट्पदैः ॥ रवीन्दुरन्ति-
देवदेवराजकर्मशर्मदे त्वदीयपाद० ॥ ६ ॥ अलक्ष-
लक्षलक्षपापलक्षसारसायुधं ततस्तु जीवजन्तुतन्तु-
भुक्तिमुक्तिदायकम् ॥ विरञ्चिविष्णुशङ्करस्वकीय-
धामवर्मदे त्वदीयपाद० ॥ ७ ॥ अहो मृतं स्वनं श्रुतं
महेशकेशजाततटे किरातसूतवाडवेषु पण्डिते शठे
नटे ॥ दुरन्तपापतापहारि सर्वजन्तुशर्मदे त्वदीय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाद० ॥ ८ ॥ इदं तु नर्मदाष्टकं त्रिकालमेव ये सदा पठन्ति ते निरन्तरं न यान्ति दुर्गतिं कदा ॥ सुलभ्यदेहदुर्लभं महेशधामगौरवं पुनर्भवा नरा न वै विलोकयन्ति रौरवम् ॥ ९ ॥

इति श्रीमच्छङ्कराचार्यविरचितं नर्मदाष्टकं संपूर्णम् ॥ ५ ॥

---

८८ यमुनाष्टकम् ।

श्रीगणेशाय नमः ॥ कृपापारावारां तपनतनयां पापशमनीं मुरारिप्रेयस्यां भवभयदवां भक्तिवरदाम् ॥ विपज्जालोन्मुक्तां श्रियमपि सुखाप्तेः प्रतिदिनं सदा धीरो नूनं भजति यमुनां नित्यफलदाम् ॥ १ ॥ मधुवनचारिणि भास्करवाहिनि जाह्नविसङ्गिनि सिन्धुसुते मधुरिपुभूषिणि माधवतोषिणि गोकुलभीतिविनाशकृते ॥ जगदघमोचनि मानसदायिनि केशवकेलिनि दानगते जय यमुने जय भीतिनिवारिणि संकटनाशिनि पावय माम् ॥ २ ॥ अयि मधुरे मधुमोदविलासिनि शैलविदारिणि वेगभरे परिजनपालिनि दुष्टनिषूदिनि वाञ्छि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तकामविलासधरे ॥ व्रजपुरवासिजनार्जितपातं-
कहारिणि विश्वजनोद्धरके जय यमुने जय० ॥ ३ ॥
अतिविपदम्बुधिमग्नजनं भवतापशताकुलमानसकं
गतिमतिहीनमशेषभयाकुलमारुतपादसरोजयुगम् ॥
ऋणभयभीतिर्मानिष्कृतिपातककोटिशतायुतपुञ्जतरं
जय यमु० ॥ ४ ॥ नवजलदद्युतिकोटिलसत्तनुहेमम-
याभररञ्जितके तडिदवहेतिपदाञ्चलचञ्चलशोभित-
पीतसुचैलधरे ॥ मणिमयभूषणचित्रपटासनरञ्जितग-
ञ्जितभानुकरे जय यमु०॥५॥ शुभपुलिने मधुमत्तयदू-
द्भवरासमहोत्सवकेलिभरे उच्चकुलाचलराजितमौ-
क्तिकहारमयाभररोदसिके ॥ नवमणिकोटिक-
भास्करकञ्चुकिशोभिततारकहारयुते जय यमु० ॥६॥
करिवरमौक्तिकनासिकभूषणवातचमत्कृतचञ्चलके
मुखकमलामलसौरभचञ्चलमत्तमधुव्रतलोचनिके ॥
मणिगणकुण्डललोलपरिस्फुरदाकुलगण्डयुगामलके
जय यमु० ॥ ७ ॥ कलरवनूपुरहेममयाचितपादस-
रोरुहसारुणिके धिमिधिमिधिमिधिमितामविनोदि-
तमानसमञ्जुलपादगते ॥ तव पदपङ्कजलाश्रितमा-
नवचित्तसदाखिलतापहरे जय यमु० ॥ ८ ॥ भवो-
त्तापाम्भोधौनिपतितजनो दुर्गतियुतो यदि स्तौति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रातः प्रतिदिनमनन्याश्रयतया ॥ हयाह्रेषैः कामं करकुसुमपुञ्जैरविरतां सदा भोक्ता भोगान्मरणसमये याति हरिताम् ॥ ९ ॥

इति श्रीमत्प० श्रीमच्छङ्कराचार्यविरचितं यमुनाष्टकं सम्पूर्णम् ॥ ६ ॥

---

८९ पुष्कराष्टकम् ।

श्रीगणेशाय नमः ॥ श्रिया युतं त्रिदेहतापपापराशिनाशकं मुनीन्द्रसिद्धसाध्यदेवदानवैरभिष्टुतम् ॥ तटेऽस्ति यज्ञपर्वतस्य मुक्तिदं सुखाकरं नमामि ब्रह्मपुष्करं सवैष्णवं सशङ्करम् ॥ १ ॥ सदार्यमासशुष्कपञ्चवासरे वरागतं तदन्यथान्तरिक्षगं सुतन्त्रभावनानुगम् ॥ तदम्बुपानमज्जनं दृशां सदामृताकरं नमामि० ॥ २ ॥ त्रिपुष्कर-त्रिपुष्कर-त्रिपुष्करेति संस्मरेत्स दूरदेशगोऽपि यस्तदङ्गपापनाशनम् ॥ प्रपन्नदुःखभञ्जनं सुरञ्जनं सुधाकरं नमामि० ॥ ३ ॥ मृकण्डुमङ्कणौ पुलस्त्यकण्वपर्वतासिता अगस्त्यभार्गवौ दधीचिनारदौ शुकादयः ॥ सपद्मतीर्थपावनैकदृष्टयो दयाकरं नमा० ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सदा पितामहेक्षितं वराहविष्णुनेक्षितं तथाऽमरेश्वरेक्षितं सुरासुरैः समीक्षितम् ॥ इहैव भुक्तिमुक्तिदं प्रजाकरं धनाकरं नमा० ॥ ५ ॥ त्रिदण्डदण्डिब्रह्मचारितापसैः सुसेवितं पुरार्धचन्द्रप्राप्तदेवनन्दिकेश्वराभिधैः ॥ सवैद्यनाथनीलकण्ठसेवितं सुधाकरं नमामि० ॥ ६ ॥ सुपञ्चधा सरस्वती विराजते यदन्तरे तथैकयोजनायतं विभाति तीर्थनायकम् ॥ अनेकदैवपैत्रतीर्थसागरं रसाकरं नमामि० ॥ ७ ॥ यमादिसंयुतो नरस्त्रिपुष्करं विमज्जति पितामहश्च माधवोऽप्युमाधवः प्रसन्नताम् ॥ प्रयाति तत्पदं ददात्ययत्नतो गुणाकरं नमा० ॥ ८ ॥ इदं हि पुष्कराष्टकं सुनीतिनीरजाश्रितं स्थितं मदीयमानसे कदापि माऽपगच्छतु ॥ त्रिसन्ध्यमापठन्ति ये त्रिपुष्कराष्टकं नराः प्रदीप्तदेहभूषणा भवन्ति मेशकिङ्कराः ॥ ९ ॥

इति श्रीपुष्कराष्टकं सम्पूर्णम् ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६० श्रीमणिकर्णिकाष्टकम् ।

श्रीगणेशाय नमः ॥ त्वत्तीरे मणिकर्णिके हरिहरौ सायुज्यमुक्तिप्रदौ वादं तौ कुरुतः परस्परमुभौ जन्तोः प्रयाणोत्सवे ॥ मद्रूपो मनुजोऽयमस्तु हरिणा प्रोक्तः शिवस्तत्क्षणात्तन्मध्याद्भृगुलाञ्छनो गरुडगः पीताम्बरो निर्गतः ॥ १ ॥ इन्द्राद्यास्त्रिदशाः पतन्ति नियतं भोगक्षये ते पुनर्जायन्ते मनुजास्ततोऽपि पशवः कीटाः पतङ्गादयः ॥ ये मातर्मणिकर्णिके तव जले मज्जन्ति निष्कल्मषाः सायुज्येऽपि किरीटकौस्तुभधरा नारायणाः स्युर्नराः ॥ २ ॥ काशी धन्यतमा विमुक्तिनगरी सालङ्कृता गङ्गया तत्रेयं मणिकर्णिका सुखकरी मुक्तिर्हि तत्किङ्करी ॥ स्वर्लोकस्तुलितः सहैव विबुधैः काश्या समं ब्रह्मणा काशी क्षोणितले स्थिता गुरुतरा स्वर्गो लघुः खे गतः ॥ ३ ॥ गङ्गातीरमनुत्तमं हि सकलं तत्रापि काश्युत्तमा तस्यां सा मणिकर्णिकोत्तमतमा यत्रेश्वरो मुक्तिदः ॥ देवानामपि दुर्लभं स्थलमिदं पापौघनाशक्षमं पूर्वोपार्जितपुण्यपुञ्जगमकं पुण्यैर्जनैः प्राप्यते ॥ ४ ॥ दुःखाम्भोनिधिमग्नजन्तुनिवहा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तेषां कथं निष्कृतिर्ज्ञात्वैतद्धि विरिञ्चिना विरचिता वाराणसी शर्मदा ॥ लोकाः स्वर्गमुखास्ततोऽपि लघवो भोगान्तपातप्रदाः काशी मुक्तिपुरी सदा शिवकरी धर्मार्थकामोत्तरा ॥ ५ ॥ एको वेणुधरो धराधरधरः श्रीवत्सभूषाधरो यो ह्येकः किल शङ्करो विषधरो गङ्गाधरो माधरः ॥ ये मातर्मणिकर्णिके तव जले मज्जन्ति ते मानवा रुद्रा वा हरयो भवन्ति बहवस्तेषां बहुत्वं कथम् ॥ ६ ॥ त्वत्तीरे मरणं तु मंगलकरं देवैरपि श्लाघ्यते शक्रस्तं मनुजं सहस्रनयनैर्द्रष्टुं सदा तत्परः ॥ आयान्तं सविता सहस्रकिरणैः प्रत्युद्गतोऽभूत्सदा पुण्योऽसौ वृषगोऽथ वा गरुडगः किं मन्दिरं यास्यति ॥ ७ ॥ मध्याह्ने मणिकर्णिकास्नपनजं पुण्यं न वक्तुं क्षमः स्वीयैरब्दशतैश्चतुर्मुखसुरो वेदार्थदीक्षागुरुः ॥ योगाभ्यासबलेन चन्द्रशिखरस्तत्पुण्यपारं गतस्त्वत्तीरे प्रकरोति सुप्तपुरुषं नारायणं वा शिवम् ॥ ८ ॥ कृच्छ्रैः कोटिशतैः स्वपापनिधनं यच्चाश्वमेधैः फलं तत्सर्वं मणिकर्णिकास्नपनजे पुण्ये प्रविष्टं भवेत् ॥ स्नात्वा स्तोत्रमिदं नरः पठति चेत्संसारपाथोनिधिं तीर्त्वा पल्वलवत्प्रयाति सदनं तेजोमयं ब्रह्मणः ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रीमच्छङ्कराचार्यविरचितं मणिकर्णिकाष्टकं सम्पूर्णम् ॥८॥

—❀—❀—

९१ प्रयागाष्टकम् ।

श्रीगणेशाय नमः ॥ मुनय ऊचुः ॥ सुरमुनिदितिजेन्द्रैः सेव्यते योऽस्ततन्द्रैर्गुरुतरदुरितानां का कथा मानवानाम् ॥ स भुवि सुकृतकर्तुर्वाञ्छितावाप्तिहेतुर्जयति विजितयागस्तीर्थराजः प्रयागः ॥१॥ श्रुतिः प्रमाणं स्मृतयः प्रमाणं पुराणमप्यत्र परं प्रमाणम् ॥ यत्रास्ति गङ्गा यमुना प्रमाणं स तीर्थराजो जयति प्रयागः ॥ २ ॥ न यत्र योगाचरणप्रतीक्षा न यत्र यज्ञेष्टिविशिष्टदीक्षा ॥ न तारकज्ञानगुरोरपेक्षा स तीर्थराजो जयति प्रयागः ॥३॥ चिरं निवासं न समीक्षते यो ह्युदारचित्तः प्रददाति च क्रमात् ॥ यः कल्पितार्थांश्च ददाति पुंसः स तीर्थरा० ॥४॥ यत्राप्लुतानां न यमो नियन्ता यत्र स्थितानां सुगतिप्रदाता ॥ यत्राश्रितानाममृतप्रदाता स तीर्थराजो० ॥५॥ पुर्यः सप्त प्रसिद्धाः प्रतिवचनकरीस्तीर्थराजस्य नार्यो नैकस्यान्मुक्तिदाने प्रभवति सुगुणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काश्यते ब्रह्म यस्याम् ॥ सेयं राज्ञी प्रधाना प्रियवचनकरी मुक्तिदानेन युक्ता येन ब्रह्माण्डमध्ये स जयति सुतरां तीर्थराजः प्रयागः ॥ ६ ॥ तीर्थावली यस्य तु कण्ठभागे दानावली वल्गति पादमूले ॥ व्रतावली दक्षिणपादमूले स तीर्थराजो जयति प्रयागः ॥ ७ ॥ आज्ञापि यज्ञाः प्रभवोऽपि यज्ञाः सप्तर्षिसिद्धाः सुकृतानभिज्ञाः ॥ विज्ञापयन्तः सततं हि काले स तीर्थरा० ॥ ८ ॥ सितासिते यत्र तरङ्गचामरे नद्यौ विभाते मुनिभानुकन्यके ॥ लीलातपत्रं वट एव साक्षात्स तीर्थराजो ज० ॥९॥ तीर्थराजप्रयागस्य माहात्म्यं कथयिष्यति ॥ शृण्वतः सततं भक्त्या वाञ्छितं फलमाप्नुयात् ॥१०॥

इति श्रीमत्स्यपुराणे प्रयागराजमाहात्म्याष्टकं सम्पूर्णम् ॥१॥

---

९२ काशीपञ्चकम् ।

श्रीगणेशाय नमः ॥ मनोनिवृत्तिः परमोपशान्तिः सा तीर्थवर्या मणिकर्णिका च ॥ ज्ञानप्रवाहा विमलादिगङ्गा सा काशिकाऽहं निजबोध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपा ॥ १ ॥ यस्यामिदं कल्पितमिन्द्रजालं चराचरं भाति मनोविलासम् ॥ सच्चित्सुखैका परमात्मरूपा सा का० ॥ २ ॥ कोशेषु पञ्चस्वधिराजमाना बुद्धिर्भवानी प्रतिदेहगेहम् ॥ साक्षी शिवः सर्वगतोऽन्तरात्मा सा का० ॥ ३ ॥ काश्यां हि काशते काशी काशी सर्वप्रकाशिका ॥ सा काशी विदिता येन तेन प्राप्ताहि काशिका ॥ ४ ॥ काशी क्षेत्रं शरीरं त्रिभुवनजननी व्यापिनी ज्ञानगङ्गा भक्तिः श्रद्धा गयेयं निजगुरुचरणध्यानयोगः प्रयागः ॥ विश्वेशोऽयं तुरीयः सकलजनमनःसाक्षिभूतोऽन्तरात्मा देहे सर्वं मदीये यदि वसति पुनस्तीर्थमन्यत्किमस्ति ॥ ५ ॥

इति श्रीमच्छङ्कराचार्यविरचितं काशीपञ्चकं संपूर्णम् ॥ १० ॥

---

९३ त्रिवेणीदशकस्तोत्रम् ।

श्रीगणेशाय नमः ॥ मुक्तामयालङ्कृतमुद्रवेणी भक्ताभयत्राणसुबद्धवेणी ॥ मत्तालिगुञ्जन्मकरन्दवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥ १ ॥ लोकत्रयैश्वर्यनिदानवेणी तापत्रयोच्चाटनबद्धवेणी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्मार्थकामाकलनैकवेणी श्रीमत्प्र० ॥ २ ॥ मुक्ता-
ङ्गनामोहनसिद्धवेणी भक्तान्तरानन्दसुबोधवेणी ॥
वृत्त्यन्तरोद्वेगविवेकवेणी श्रीमत्प्र० ॥ ३ ॥ दुग्धोद-
धिस्फूर्जसुभद्रवेणी नीलाभ्रशोभाललिता च वेणी ॥
स्वर्णप्रभाभासुरमध्यवेणी श्रीमत्प्र० ॥ ४ ॥ विश्वे-
श्वरोत्तङ्गकपर्दिवेणी विरिञ्चिविष्णुप्रणतैकवेणी ॥
त्रयी पुराणा सुरसार्धवेणी श्रीमत्प्र० ॥ ५ ॥ माङ्ग-
ल्यसम्पत्तिसमृद्धवेणी मात्रान्तरन्यस्तनिदानवेणी ॥
परम्परापातकहारिवेणी श्रीमत्प्र० ॥ ६ ॥ निमज्ज-
दुन्मज्जमनुष्यवेणी त्रयोदयाभाग्यविवेकवेणी विमु-
क्तजन्माविभवैकवेणी श्रीमत्प्र० ॥ ७ ॥ सौन्दर्य-
वेणी सुरसार्द्धवेणी माधुर्यवेणी महनीयवेणी ॥
रत्नैकवेणी रमणीयवेणी श्रीमत्प्र० ॥ ८ ॥ सारस्व-
ताकारविघातवेणी कलिन्दकन्यामयलक्ष्यवेणी ॥
भागीरथीरूपमहेशवेणी श्रीमत्प्र० ॥ ९ ॥ श्रीमद्भ-
वानीभवनैकवेणी लक्ष्मीसरस्वत्यभिमानवेणी ॥
माता त्रिवेणीत्रयिरत्नवेणी श्रीमत्प्र० ॥ १० ॥
त्रिवेणीदशकं स्तोत्रं प्रातर्नित्यं पठेन्नरः ॥ तस्य
वेणी प्रसन्ना स्याद्विष्णुलोकं स गच्छति ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमत्प० श्रीमच्छङ्कराचार्यविरचितं
त्रिवेणीदशकस्तोत्रं सम्पू-
र्णम् ॥ ११ ॥

॥ इति गङ्गादितीर्थस्तोत्राणि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीरामावतारस्तोत्राणि ।

—:॰:—

९४ रामगीता

श्रीगणेशाय नमः ॥ श्रीमहादेव उवाच ॥ ततो जगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥ चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्यैरभिसेवितं यथा ॥ १ ॥ सौमित्रिणा पृष्ट उदारबुद्धिना रामः कथाः प्राह पुरातनीः शुभाः ॥ राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः ॥ २ ॥ कदाचिदेकान्त उपस्थितं प्रभुं रामं रमालालितपादपङ्कजम् ॥ सौमित्रिरासादितशुद्धभावनः प्रणम्य भक्त्या विनयान्वितोऽब्रवीत् ॥ ३ ॥ सौमित्रिरुवाच ॥ त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निराकृतिः स्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गा हितसङ्गसंगिनाम् ॥ ४ ॥ अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पवर्गं तव योगिभावितम् ॥ यथाञ्जसाऽज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥ श्रुत्वाऽथ सौमित्रिवचोऽखिलं तदा प्राह प्रपन्नार्तिहरः प्रपन्नधीः ॥ विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥ श्रीराम उवाच ॥ आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः ॥ समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये ॥७॥ क्रिया शरीरोद्भवहेतुरादृता प्रियाप्रियौ तौ भवतः सुरागिणः ॥ धर्मेतरौ तत्र पुनः शरीरकं पुनः क्रिया चक्रवदीर्यते भवः ॥ ८ ॥ अज्ञानमेवास्य हि मूलकारणं तद्धानमेवात्र विधौ विधीयते ॥ विद्यैव तन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितम् ॥ ९ ॥ नाज्ञानहानिर्न च रागसंक्षयो भवेत्ततः कर्म सदोषमुद्भवेत् ॥ ततः पुनः संसृतिरप्यवारिता तस्माद्बुधो ज्ञानविचारवान् भवेत् ॥ १० ॥ ननु क्रिया वेदमुखेन चोदिता यथैव विद्या पुरुषार्थसाधनम् ॥ कर्तव्यता प्राणभृतः प्रचोदिता विद्या सहायत्वमुपैति सा पुनः ॥ १ ॥ कर्माकृतौ दोषमपि श्रुतिर्जगौ तस्मात्सदा कार्यमिदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुमुक्षुणा ॥ ननु स्वतन्त्रा ध्रुवकार्यकारिणी विद्या न किञ्चिन्मनसाऽप्यपेक्षते ॥१२॥ न सत्यकार्योऽपि हि यद्वदध्वरः प्रकांक्षतेऽन्यानपि कारकादिकान् ॥ तथैव विद्या विधितः प्रकाशितैर्विशिष्यते कर्मभिरेव मुक्तये ॥ १३ ॥ केचिद्वदन्तीति वितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥ देहाभिमानादभिवर्धते क्रिया विद्या गताहंकृतितः प्रसिद्ध्यति ॥ १४ ॥ विशुद्धविज्ञानविरोचनोञ्चिता विद्यात्मवृत्तिश्चरमेति भण्यते ॥ उदेति कर्माऽखिलकारकादिभिर्निहन्ति विद्याऽखिलकारकादिकम् ॥१५॥ तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्न समुच्चयो भवेत् ॥ आत्मानुसन्धानपरायणः सदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः ॥ १६ ॥ यावच्छरीरादिषु माययाऽऽत्मधीस्तावद्विधेयो विधिवादकर्मणाम् ॥ नेतीति वाक्यैरखिलं निषिध्य यज्ज्ञात्वा परात्मानमथ त्यजेत्क्रियाः ॥ १७ ॥ यदा परात्मात्मविभेदभेदकं विज्ञानमात्मन्यवभाति भास्वरम् ॥ तदैवमाया प्रविलीयतेऽञ्जसा सकारका कारणमात्मसंसृतेः ॥ १८ ॥ श्रुतिप्रमाणाभिविनाशिता च सा कथं भविष्यत्यपि कार्यकारिणी ॥ विज्ञान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मात्रादमलाद्द्वितीयतस्तस्मादविद्या न पुनर्भविष्यति ॥ १९ ॥ यदि स्म नष्टा न पुनः प्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥ तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्याविमोक्षाय विभाति केवला ॥ २० ॥ सा तैत्तिरीयश्रुतिराह सादरं न्यासं प्रशस्ताखिलकर्मणां स्फुटम् ॥ एतावदित्याह च वाजिनां श्रुतिर्ज्ञानं विमोक्षाय न कर्म साधनम् ॥ २१ ॥ विद्यासमत्वेन तु दर्शितस्त्वया क्रतुर्न दृष्टान्त उदाहृतः समः ॥ फलैः पृथक्त्वाद्बहुकारकैः क्रतुः संसाध्यते ज्ञानमतो विपर्ययम् ॥ ॥ २२ ॥ स प्रत्यवायो ह्यहमित्यनात्मधीरज्ञप्रसिद्धा न तु तत्त्वदर्शिनः ॥ तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतः कर्मविधिप्रकाशितम् ॥ २३ ॥ श्रद्धान्वितस्तत्त्वमसीति वाक्यतो गुरोः प्रसादादपि शुद्धमानसः ॥ विज्ञाय चैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः ॥ २४ ॥ आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः ॥ तत्त्वम्पदार्थौ परमात्मजीवकावसीति चैकात्म्यमथानयो भवेत् ॥ २५ ॥ प्रत्यक्परोक्षादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत् ॥ २६ ॥ एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः ॥ सोऽयं पदार्थाविव भागलक्षणा युज्येत तत्त्वम्पदयोरदोषतः ॥ २७ ॥ रसादिपञ्चीकृतभूतसम्भवं भोगालयं दुःखसुखादिकर्मणाम् ॥ शरीरमाद्यं त्वदनादिकर्मजं मायामयं स्थूलमुपाधिमात्मनः ॥ २८ ॥ सूक्ष्मं मनोबुद्धिदशेन्द्रियैर्युतं प्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः सुखादेरनुसाधनं भवेच्छरीरमन्यद्विदुरात्मनो बुधाः ॥ २९ ॥ अनाद्यनिर्वाच्यमपीह कारणं मायाप्रधानं तु परं शरीरकम् ॥ उपाधिभेदात्तु यतः पृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥३०॥ कोशेषु पञ्चस्वपि तत्तदाकृतिर्विभाति सङ्गात्स्फटिकोपलो यथा ॥ असङ्गरूपोऽयमजो यतोऽद्वयो विज्ञायतेऽस्मिन्परितो विचारिते ॥ ३१ ॥ बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादिभेदेन गुणत्रयात्मनः ॥ अन्योन्यतोऽस्मिन् व्यभिचारतो मृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥ देहेन्द्रियप्राणमनश्चिदात्मनां संघादजस्रं परिवर्तते धियः ॥ वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवोद्भवः ॥ ३३ ॥ नेतिप्रमाणेन निराकृताखिलो हृदा समास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥ कदाचिदात्मा न मृतो न जायते न क्षीयते नापि विवर्धते नवः ॥ निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ॥ ३५ ॥ एवंविधे ज्ञानमये सुखात्मके कथं भवो दुःखमयः प्रतीयते ॥ अज्ञानतोऽध्यासवशात्प्रकाशते ज्ञाने विलीयेत विरोधतः क्षणात् ॥ ३६ ॥ यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः ॥ असर्पभूतेऽहिविभावनं यथा रज्ज्वादिकं तद्वदपीश्वरे जगत् ॥ ३७ ॥ विकल्पमायारहिते चिदात्मकेऽहङ्कार एष प्रथमः प्रकल्पितः ॥ अध्यास एवात्मनि सर्वकारणे निरामये ब्रह्मणि केवले परे ॥ ३८ ॥ इच्छादिरागादिसुखादिधर्मिकाः सदा धियः संसृतिहेतवः परे ॥ यस्मात्प्रसुप्तौ तदभावतः परः सुखस्वरूपेण विभाव्यते हि नः ॥ ३९ ॥ अनाद्यविद्योद्भवबुद्धिबिम्बितो जीवः प्रकाशोऽयमितीर्यते चितः ॥ आत्मा धियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः स एव हि ॥ ४० ॥ चिद्बि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वसाक्षात्मधियां प्रसङ्गतस्त्वेकत्र वासादनलाक्त-लोहवत् ॥ अन्योन्यमध्यासवशात्प्रतीयते जडाजडत्वं च चिदात्मचेतसोः ॥ ४१ ॥ गुरोः सकाशादपि वेदवाक्यतः सञ्जातविद्यानुभवो निरीक्ष्य तम् ॥ स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥ प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीव निर्मलः ॥ विशुद्धविज्ञानघनो निरामयः सम्पूर्ण आनन्दमयोऽहमक्रियः ॥ ४३ ॥ सदैव मुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः ॥ अनन्तपारोऽहमहर्निशं बुधैर्विभावितोऽहं हृदि वेदवादिभिः ॥ ४४ ॥ एवं सदाऽऽत्मानमखण्डितात्मना विचार्यमाणस्य विशुद्धभावना ॥ हन्यादविद्यामचिरेण कारकै रसायनं यद्वदुपासितं रुजः ॥ ४५ ॥ विविक्त आसीन उपारतेन्द्रियो विनिर्जितात्मा विमलान्तराशयः ॥ विभावयेदेकमनन्यसाधनो विज्ञानदृक्केवल आत्मसंस्थितः ॥ ४६ ॥ विश्वं यदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥ पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदन्तरम् ॥ ४७ ॥ पूर्वं समाधेरखिलं विचिन्तयेदोङ्कारमात्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सचराचरं जगत् ॥ तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बोधतः ॥ ४८ ॥ अकारसंज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात् ॥ प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधिपूर्वं न तु तत्त्वतो भवेत् ॥ ४९ ॥ विश्वं त्वकारं पुरुषं विलापयेदुकारमध्ये बहुधा व्यवस्थितम् ॥ ततो मकारे प्रविलाप्य तैजसं द्वितीयवर्णं प्रणवस्य चान्तिमम् ॥ ५० ॥ मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ॥ सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥ एवं सदा जातपरात्मभावनः स्वानन्दतुष्टः परिविस्मृताखिलः ॥ आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसिन्धुवत् ॥ ५२ ॥ एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहं सदा दृश्यो भवेयं जितषड्गुणात्मनः ॥ ५३ ॥ ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥ प्रारब्धमश्नन्नभिमानवर्जितो मय्येव साक्षात्प्रविलीयते ततः ॥ ५४ ॥ आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोककारणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान-
मथाखिलात्मनाम् ॥ ५५ ॥ आत्मन्यभेदेन विभा-
वयन्निदं भवत्यभेदेन मयाऽत्मना तदा ॥ यथा
जलं वारिनिधौ यथा पयः क्षीरे वियद्व्योम्न्यनिले
यथाऽनिलः ॥ ५६ ॥ इत्थं यदीक्षेत हि लोक-
संस्थितो जगन्मृषैवेति विभावयन्मुनिः ॥ निराकृत-
तत्वाच्छ्रुतिमुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्र-
मादयः ॥ ५७ ॥ यावन्न पश्येदखिलं मदात्मकं
तावन्मदाराधनतत्परो भवेत् ॥ श्रद्धालुरत्यूर्जित-
भक्तिलक्षणां यस्तस्य दृश्योऽहमहर्निशं हृदि
॥ ५८ ॥ रहस्यमतेच्छ्रुतिसारसंग्रहं मया विनि-
श्चित्य तवोदितं प्रियम् ॥ यस्त्वेतदालोचयतीह
बुद्धिमान् स मुच्यते पातकराशिभिः क्षणात् ॥ ५९॥
भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य
चेतसां ॥ मद्भावनाभावितशुद्धमानसः सुखी भवा-
नन्दमयो निरामयः ॥ ६० ॥ यः सेवते मामगुणं
गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥
सोऽहं स्वपादाञ्चितरेणुभिः स्पृशन् पुनाति लोक-
त्रितयं यथा रविः ॥ ६१ ॥ विज्ञानमेतदखिलं श्रुति-
सारमेकं वेदान्तवेद्यचरणेन मयैव गीतम् ॥ यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषु भक्तिः ॥ ६२ ॥

इति अध्यात्मरा० उत्तरकाण्डान्तर्गता रामगीता सम्पूर्णा ॥ १ ॥

---

६५ रामरक्षास्तोत्रम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीरामरक्षास्तोत्रमन्त्रस्य ॥ बुधकौशिक ऋषिः ॥ श्रीसीतारामचन्द्रो देवता ॥ अनुष्टुपछन्दः ॥ सीता शक्तिः ॥ श्रीमद्धनुमान् कीलकम् ॥ श्रीरामचन्द्रप्रीत्यर्थे रामरक्षास्तोत्रजपे विनियोगः ॥ अथ ध्यानम् ॥ ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीत वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढसीतामुखकमलमिलल्लोचनं नीरदाभं नानाऽलङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ इति ध्यानम् ॥ चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ॥ एकैकमक्षरं पुंसां महापातकनाशनम् ॥१॥ ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम् ॥ जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सासितूणधनुर्बाणपाणिं नक्तञ्चरान्तकम् ॥ [illegible]
लया जगत्त्रातुमाविर्भूतमजं विभुम् ॥ ३ ॥
रक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम् [illegible]
राघवः पातु भालं दशरथात्मजः [illegible] ॥ ततो
ल्येयो दृशौ पातु विश्वामित्रप्रियः [illegible]
मखत्राता मुखं सौमित्रिवत्सलः ॥ ५ [illegible]
विद्यानिधिः पातु कण्ठं भरतवन्दितः ॥ स्कन्धौ
दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः ॥ ६ ॥ करौ
सीतापतिः पातु हृदयं जामदग्न्यजित् ॥ मध्यं पातु
खरध्वंसी नाभिं जाम्बवदाश्रयः ॥ ७ ॥ सुग्रीवेशः
कटी पातु सक्थिनी हनुमत्प्रभुः ॥ ऊरू रघूत्तमः
पातु रक्षःकुलविनाशकृत् ॥ ८ ॥ जानुनी सेतु-
कृत् पातु जंघे दशमुखान्तकः ॥ पादौ विभीष-
णश्रीदः पातु रामोऽखिलं वपुः ॥ ९ ॥ एतां राम-
बलोपेतां रक्षां यः सुकृती पठेत् ॥ स चिरायुः सुखी
पुत्री विजयी विनयी भवेत् ॥ १० ॥ पातालभूत-
लव्योमचारिणश्छद्मचारिणः ॥ न द्रष्टुमपि शक्ता-
स्ते रक्षितं रामनामभिः ॥ ११ ॥ रामेति रामभद्रेति
रामचन्द्रेति वा स्मरन् ॥ नरो न लिप्यते पापैर्भुक्तिं
मुक्तिं च विन्दति ॥ १२ ॥ जगज्जैत्रैकमन्त्रेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्र... मनाम्नाऽभिरक्षितम् ॥ यः कण्ठे धारयेत्तस्य मद्वचनेषु ... सर्वसिद्धयः ॥ १३ ॥ वज्रपञ्जरनामेदं इति ... त्वं स्मरत् ॥ अव्याहताज्ञः सर्वत्र लभते रा ... १४ ॥ आदिष्टवान् यथा स्वप्ने राम- .. हरः ॥ तथा लिखितवान् प्रातः प्रबुद्धो बुधकौशिकः ॥१५॥ आरामः कल्पवृक्षाणां विरामः सकलापदाम् ॥ अभिरामस्त्रिलोकानां रामः श्रीमान् स नः प्रभु ॥ १६ ॥ तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ ॥ पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥ १७ ॥ फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ ॥ पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥ १८ ॥ शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम् ॥ रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ॥ १९ ॥ आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषङ्गसङ्गिनौ ॥ रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम् ॥ २० ॥ सन्नद्धः कवची खड्गी चापबाणधरो युवा ॥ गच्छन्मनोरथोऽस्माकं रामः पातु सलक्ष्मणः ॥ २१ ॥ रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ॥ काकुत्स्थः पुरुषः पूर्णः कौशल्येयो रघूत्तमः ॥ २२ ॥ वेदान्तवेद्यो यज्ञेशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुराणपुरुषोत्तमः जानकीवल्लभः श्रीमान[illegible]
राक्रमः ॥ २३ ॥ इत्येतानि जपन्नित्यं मद्भ[illegible]
याऽन्वितः ॥ अश्वमेधायुतं पुण्यं संप्रा[illegible]
संशयः ॥ २४ ॥ रामं दूर्वादलश्यामं [illegible] ॥ ततो
व्रासमम् ॥ स्तुवन्ति नामभिर्दिव्यैः [illegible]वं
नराः ॥ २५ ॥ रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं
सुन्दरं काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं
धार्मिकम् ॥ राजेन्द्रं सत्यसन्धं दशरथतनयं श्या-
मलं शान्तमूर्तिं वन्दे लोकाभिरामं रघुकुलतिलकं
राघवं रावणारिम् ॥ २६ ॥ रामाय रामभद्राय
रामचन्द्राय वेधसे ॥ रघुनाथाय नाथाय सीतायाः
पतये नमः ॥ २७ ॥ श्रीराम राम रघुनन्दन राम
राम श्रीराम राम भरताग्रज राम राम ॥ श्रीराम
राम रणकर्कश राम राम श्रीराम राम शरणं भव
राम राम ॥ २८ ॥ श्रीरामचन्द्रचरणौ मनसा
स्मरामि श्रीरामचन्द्रचरणौ वचसा गृणामि ॥
श्रीरामचन्द्रचरणौ शिरसा नमामि श्रीरामचन्द्र-
चरणौ शरणं प्रपद्ये ॥ २९ ॥ माता रामो मत्पिता
रामचन्द्रः स्वामी रामो मत्सखा रामचन्द्रः ॥
सर्वस्वं मे रामचन्द्रो दयालुर्नान्यं जाने नैव जाने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जाने ॥ ३० ॥ दक्षिणे लक्ष्मणो यस्य वामे तु जनकात्मजा ॥ पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम् ॥ ३१ ॥ लोकाभिरामं रणरङ्गधीरं राजीवनेत्रं रघुवंशनाथम् ॥ कारुण्यरूपं करुणाकरं तं श्रीरामचन्द्रं शरणं प्रपद्ये ॥ ३२ ॥ मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ॥ वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥ ३३ ॥ कूजन्तं रामरामेति मधुरं मधुराक्षरम् ॥ आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ ३४ ॥ आपदामपहर्तारं दातारं सर्वसम्पदाम् ॥ लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ ३५ ॥ भर्जनं भवबीजानामर्जनं सुखसम्पदाम् ॥ तर्जनं यमदूतानां रामरामेति गर्जनम् ॥ ३६ ॥ रामो राजमणिः सदा विजयते रामं रमेशं भजे रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ॥ रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥ ३७ ॥ राम रामेति रामेति रमे रामे मनोरमे ॥ सहस्रनाम तत्तुल्यं रामनाम वरानने ॥ ३८ ॥ धन्याऽयोध्या दशरथनृपः सा च माता च धन्या धन्यो वंशो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रघुपतिभवो यत्र रामावतारः ॥ धन्या वाणी का-
वरमुखे रामनामप्रपन्ना धन्यो लोकः प्रतिदिनम्
रामवृत्तं शृणोति ॥ ३६ ॥

इति श्रीबुधकौशिकविरचितं श्रीरामस... ॥ ततो
स्तोत्रं सम्पूर्णम् ॥ २ ॥

---

६६ ब्रह्मदेवकृता रामस्तुतिः ।

श्रीगणेशाय नमः ॥ ब्रह्मोवाच ॥ वन्दे देवं
विष्णुमशेषस्थितिहेतुं त्वामध्यात्मज्ञानिभिरन्तर्हृदि
भाव्यम् ॥ हेयाहेयद्वन्द्वविहीनं परमेकं सत्तामात्रं
सर्वहृदिस्थं दृशिरूपम् ॥ १ ॥ प्राणापानौ निश्चय-
बुद्ध्या हृदि रुद्ध्वा छित्त्वा सर्वं संशयबन्धं विष-
यौघान् ॥ पश्यन्तीशं यं गतमोहा यतयस्तं वन्दे
रामं रत्नकिरीटं रविभासम् ॥ २ ॥ मायातीतं
माधवमाद्यं जगदादिं मानातीतं मोहविनाशं मुनि-
वन्द्यम् ॥ योगिध्येयं योगनिधानं परिपूर्णं वन्दे
रामं रञ्जितलोकं रमणीयम् ॥ ३ ॥ भावाभावप्रत्य-
यहीनं भवमुख्यैर्भोगासक्तैरर्चितपादाम्बुजयुग्मम् ॥
नित्यं शुद्धं बुद्धमनन्तं प्रणवाख्यं वन्दे रामं वीर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मशेषासुरदावम् ॥ ४ ॥ त्वं मे नाथो नाथितकार्या-
मद्वचने [illegible]कारी मायातीतो माधवरूपोऽखिलधारी ॥
[illegible] गम्यो भावितरूपो भवहारी योगाभ्यासैर्भा-
[illegible]हचारी । ५ ॥ त्वामाद्यन्तं लोकततीनां
[illegible] लोकानां नो लौकिकमानैरधिगम्यम् ॥
[illegible]श्रद्धाभावसमेतैर्भजनीयं वन्दे रामं सुन्दरमि-
न्दीवरनीलम् ॥ ६ ॥ को वा ज्ञातुं त्वामतिमानं
गतमानं मानासक्तो माधव शक्तो मुनिमान्यम् ॥
वृन्दारण्ये वन्दितवृन्दारकवृन्दं वन्दे रामं भवमुख-
वन्द्यं सुखकन्दम् ॥ ७ ॥ नानाशास्त्रैर्वेदकदम्बैः
प्रतिपाद्यं नित्यानन्दं निर्विषयज्ञानमनादिम् ॥ मत्से-
वार्थं मानुषभावं प्रतिपन्नं वन्दे रामं मरकतवर्णं
मथुरेशम् ॥ ८ ॥ श्रद्धायुक्तो यः पठतीमं स्तवमाद्यं
ब्राह्मं ब्रह्मज्ञानविधानं भुवि मर्त्यः ॥ रामं श्यामं
कामितकामप्रदमीशं ध्यात्वा ध्याता पातकजालैर्वि-
गतः स्यात् ॥ ९ ॥

इति श्रीमदध्यात्मरामायणान्तर्गतं ब्रह्मदेवकृतं
रामस्तोत्रम् ॥ ३ ॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६७ श्रीरामहृदयम् ।

श्रीगणेशाय नमः ॥ श्रीमहादेव उवाच ॥ ततो रामः स्वयं प्राह हनूमन्तमुपस्थितम् ॥ शृणु तत्त्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनाम् ॥ १ ॥ आकाशस्य यथा भेदस्त्रिविधो दृश्यते महान् ॥ जलाशये महाकाशस्तदवच्छिन्न एव हि ॥ प्रतिबिम्बाख्यमपरं दृश्यते त्रिविधं नभः ॥२॥ बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णमथापरम् ॥ आभासस्त्वपरं बिम्बभूतमेवं त्रिधा चितिः ॥ ३ ॥ साभासबुद्धेः कर्तृत्वमविछिन्नेऽविकारिणि ॥ साक्षिण्यारोप्यते भ्रान्त्या जीवत्वं च तथाऽबुधैः ॥ ४ ॥ आभासस्तु मृषाबुद्धिरविद्याकार्यमुच्यते ॥ अविच्छिन्नं तु यद्ब्रह्म विच्छेदस्तु विकल्पितः ॥ ५ ॥ अविच्छिन्नस्य पूर्णेन एकत्वं प्रतिपाद्यते ॥ तत्त्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा ॥ ६ ॥ ऐक्यज्ञानं यदोत्पन्नं महावाक्येन चात्मनोः ॥ तदाऽविद्या स्वकार्यैश्च नश्यत्येव न संशयः ॥७॥ एतद्विज्ञाय मद्भक्तो मद्भावायोपपद्यते ॥ मद्भक्तिविमुखानां हि शास्त्रगर्तेषु मुह्यताम् ॥ न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपि ॥८॥ इदं रहस्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हृदयं ममात्मनो मयैव साक्षात्कथितं तवानघ ॥ मद्भक्तिहीनाय शठाय न त्वया दातव्यमैन्द्राद्पि राज्यतोऽधिकम् ॥ ६ ॥

इति श्रीमदध्यात्मरामायणे श्रीरामहृदयं सम्पूर्णम् ॥ ४ ॥

—❀—❀—

६८ जटायुकृतं रामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जटायुरुवाच ॥ अगणित-गुणमप्रमेयमाद्यं सकलजगत्स्थितिसंयमादिहेतुम् । उपरमपरमं परात्मभूतं सततमहं प्रणतोऽस्मि राम-चन्द्रम् ॥ १ ॥ निरवधिसुखमिन्दिराकटाक्षं क्षपितसुरेन्द्रचतुर्मुखादिदुःखम् ॥ नरवरमनिशं नतोऽस्मि रामं वरदमहं वरचापबाणहस्तम् ॥ २ ॥ त्रिभुवनकमनीयरूपमीड्यं रविशतभासुरमीहित-प्रदानम् ॥ शरणदमनिशं सुरागमूले कृतनिलयं रघुनन्दनं प्रपद्ये ॥ ३ ॥ भवविपिनदवाग्निनामधेयं भवमुखदैवत-दैवतं दयालुम् ॥ दनुजपतिसहस्रकोटि-नाशं रवितनयासदृशं हरिं प्रपद्ये ॥ ४ ॥ अविरत-भवभावनातिदूरं भवविमुखैर्मुनिभिः सदैव दृश्यम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवजलधिसुतारणाङ्घ्रिपोतं शरणमहं रघुनन्दनं प्रपद्ये ॥५॥ गिरिशगिरिसुतामनोनिवासं गिरिवरधारिणमीहिताभिरामम् ॥ सुरवरदनुजेन्द्रसेविताङ्घ्रिं सुरवरदं रघुनायकं प्रपद्ये ॥ ६ ॥ परधनपरदारवर्जितानां परगुणभूतिषु तुष्टमानसानाम् ॥ परहितनिरतात्मनां सुसेव्यं रघुवरमम्बुजलोचनं प्रपद्ये ॥ ७ ॥ स्मितरुचिरविकासिताननाब्जमतिसुलभं सुरराजनीलनीलम् ॥ सितजलरुहचारुनेत्रशोभं रघुपतिमीशगुरोर्गुरुं प्रपद्ये ॥८॥ हरिकमलजशम्भुरूपभेदात्त्वमिह विभासि गुणत्रयानुवृत्तः ॥ रविरिव जलपूरितोदपात्रेष्वमरपतिस्तुतिपात्रमीशमीडे ॥ ९ ॥ रतिपतिशतकोटिसुन्दराङ्गं शतपथगोचरभावनाविदूरम् ॥ यतिपतिहृदये सदा विभान्तं रघुपतिमार्तिहरं प्रभुं प्रपद्ये ॥ १० ॥ इत्येवं स्तुवतस्तस्य प्रसन्नोऽभूद्रघूत्तमः ॥ उवाच गच्छ भद्रं ते मम विष्णोः परं पदम् ॥११॥ शृणोति य इदं स्तोत्रं लिखेद्वा नियतः पठेत् ॥ स याति मम सारूप्यं मरणे मत्स्मृतिं लभेत् ॥ १२ ॥ इति राघवभाषितं तदा श्रुतवान् हर्षसमाकुलो द्विजः ॥ रघुनन्दनसौम्यमास्थितः प्रययौ ब्रह्मसुपूजित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदम् ॥ १३ ॥

इति श्रीमदध्यात्मरामायणान्तर्गतं अरण्यकाण्डे
जटायुकृतं रामस्तोत्रम् ॥ ५ ॥

---

९९ श्रीमहादेवकृतरामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ श्रीमहादेव उवाच ॥
नमोऽस्तु रामाय सशक्तिकाय नीलोत्पलश्यामल-
कोमलाय ॥ किरीटहाराङ्गदभूषणाय सिंहासनस्थाय
महाप्रभाय ॥ १ ॥ त्वमादिमध्यान्तविहीन एकः
सृजस्यवस्यत्सि च लोकजातम् ॥ स्वमायया तेन न
लिप्यसे त्वं यत्स्वे सुखेऽजस्त्ररतोऽनवद्यः ॥ २ ॥
लीलां विधत्से गुणसंवृतस्त्वं प्रसन्नभक्तानुविधान-
हेतोः ॥ नानावतारैः सुरमानुषाद्यैः प्रतीयसे ज्ञानि-
भिरेव नित्यम् ॥ ३ ॥ स्वांशेन लोकं सकलं विधाय
तं बिभर्षि च त्वं तदधः फणीश्वरः ॥ उपर्यधो
भान्वनिलोडुपौषधीप्रवर्षरूपोऽवसि नैकधा जगत्
॥४॥ त्वमिह देहभृतां शिखिरूपकः पचसि भक्तम-
शेषमजस्त्रकम् ॥ पवनपञ्चकरूपसहायको जगद-
खण्डमनेन बिभर्षि च ॥ ५ ॥ चन्द्रसूर्यशिखिमध्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतं यत्तेज ईश चिदशेषतनूनाम् ॥ प्राभवत्तनुभृतामिह धैर्यं शौर्यमायुरखिलं तव सत्त्वम् ॥ ६ ॥ त्वं विरञ्चिशिवविष्णुविभेदात्कालकर्मशशिसूर्य-विभागात् ॥ वादिनां पृथगिवेश विभाति ब्रह्म निश्चितमनन्यदिहैकम् ॥ ७ ॥ मत्स्यादिरूपेण यथा त्वमेकः श्रुतौ पुराणेषु च लोकसिद्धः ॥ तथैव सर्वं सदसद्विभागस्त्वमेव नान्यद्भवतो विभाति ॥ ८ ॥ यद्यत्समुत्पन्नमनन्तसृष्टावुत्पत्स्यते यच्च भवेच्च यच्च ॥ न दृश्यते स्थावरजङ्गमादौ त्वया विनाऽतः परतः परस्त्वम् ॥ ९ ॥ तत्त्वं न जानन्ति परात्मनस्ते जनाः समस्तास्तव मायया॒ऽतः ॥ त्वद्भक्तसेवामलमानसानां विभाति तत्त्वं परमेकमैशम् ॥ १० ॥ ब्रह्मादयस्तेन विदुः स्वरूपं चिदात्मतत्त्वं बहिरर्थभावाः ॥ ततो बुधस्त्वामिदमेव रूपं भक्त्या भजन्मुक्तिमुपैत्यदुःखः ॥ ११ ॥ अहं भवन्नाम गृणन् कृतार्थो वसामि काश्यामनिशं भवान्या ॥ मुमूर्षमाणस्य विमुक्तयेऽहं दिशामि मन्त्रं तव रामनाम ॥१२॥ इमं स्तवं नित्यमनन्यभक्त्या शृण्वन्ति गायन्ति लिखन्ति ये वै ॥ ते सर्वसौख्यं परमं च लब्ध्वा भवत्पदं यान्तु भवत्प्रसादात् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रीमदध्यात्मरामायणे श्रीमहादेवकृतं रामस्तोत्रं सम्पूर्णम् ॥ ९ ॥

—❀—❀—

१०० अहल्याकृतं रामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ अहल्योवाच ॥ अहो ! कृतार्थाऽस्मि जगन्निवास ते पादाब्जसंलग्नरजः-कणादहम् ॥ स्पृशामि यत्पद्मजशङ्करादिभिर्विमृग्यते रञ्जितमानसैः सदा ॥ १ ॥ अहो विचित्रं तव राम चेष्टितं मनुष्यभावेन विमोहितं जगत् ॥ चलस्यजस्रं चरणादिवर्जितः सम्पूर्ण आनन्दमयोऽतिमायिकः ॥२॥ यत्पादपङ्कजपरागपवित्रगात्रा भागीरथी भवविरञ्चिमुखान्पुनाति ॥ साक्षात्स एव मम दृग्विषयो यदास्ते किं वर्ण्यते मम पुराकृतभागधेयम् ॥ ३ ॥ मर्त्यावतारे मनुजाकृतिं हरिं रामाभिधेयं रमणीयदेहिनम् ॥ धनुर्धरं पद्मविशाललोचनं भजामि नित्यं न परान् भजिष्ये ॥ ४ ॥ यत्पादपङ्कजरजःश्रुतिभिर्विमृग्यं यन्नाभिपङ्कजभवः कमलासनश्च ॥ यन्नामसाररसिको भगवान्पुरारिस्तं रामचन्द्रमनिशं हृदि भावयामि ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्यावतारचरितानि विरञ्चिलोके गायन्ति नारद-
मुखा भवपद्मजाद्याः ॥ आनन्दजाश्रुपरिषिक्तकुचा-
ग्रसीमा वागीश्वरी च तमहं शरणं प्रपद्ये ॥ ६ ॥
सोऽयं परात्मा पुरुषः पुराण एषः स्वयंज्योतिरनन्त
आद्यः ॥ मायातनुं लोक विमोहनीयां धत्ते परानु-
ग्रह एष रामः ॥ ७ ॥ अयं हि विश्वोद्भवसंयमा-
नामेकः स्वमायागुणबिम्बितो यः ॥ विरञ्चि-
विष्णवीश्वरनामभेदान् धत्ते स्वतन्त्रः परिपूर्ण
आत्मा ॥ ८ ॥ नमोऽस्तु ते राम तवाङ्घ्रिपङ्कजं
श्रिता धृतं वक्षसि लालितं प्रियात् ॥ आक्रान्तमेकेन
जगत्त्रयं पुरा ध्येयं मुनीन्द्रैरभिमानवर्जितैः ॥ ९ ॥
जगतामादिभूतस्त्वं जगत्त्वं जगदाश्रयः ॥ सर्व-
भूतेष्वसम्बद्धो भात्येको भगवान्परः ॥ १० ॥ ॐ
कारवाच्यस्त्वं राम वाचामविषयः पुमान् ॥ वाच्य-
वाचकभेदेन भवानेव जगन्मयः ॥ ११ ॥ कार्य-
कारणकर्तृत्वफलसाधनभेदतः ॥ एको विभासि राम
त्वं मायया बहुरूपया ॥ १२ ॥ त्वन्मायामोहितधि-
यस्त्वां न जानन्ति तत्त्वतः ॥ मानुषं त्वाभिमन्यन्ते
मायिनं परमेश्वरम् ॥ १३ ॥ आकाशवत्त्वं सर्वत्र
बहिरन्तर्गतोऽमलः ॥ असङ्गो ह्यचलो नित्यः शुद्धो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बुद्धः सदव्ययः ॥ १४ ॥ योषिन्मूढाऽहमज्ञा ते तत्त्वं जाने कथं विभो ॥ तस्मात्ते शतशो राम नमस्कुर्यामनन्यधीः ॥ १५ ॥ देव मे यत्र कुत्रापि स्थिताया अपि सर्वदा ॥ त्वत्पादकमले सक्ता भक्तिरेव सदाऽस्तु मे ॥ १६ ॥ नमस्ते पुरुषाध्यक्ष नमस्ते भक्तवत्सल ॥ नमस्तेऽस्तु हृषीकेश नारायण नमोऽस्तु ते ॥ १७ ॥ भवभयहरमेकं भानुकोटि-प्रकाशं करधृतशरचापं कालमेघावभासम् ॥ कनक-रुचिरवस्त्रं रत्नवत्कुण्डलाढ्यं कमलविशदनेत्रं सानुजं राममीडे ॥ १८ ॥ स्तुत्वैवं पुरुषं साक्षा-द्राघवं पुरतः स्थितम् ॥ परिक्रम्य प्रणम्याशु सानु-ज्ञाता ययौ पतिम् ॥ १९ ॥ अहल्यया कृतं स्तोत्रं यः पठेद्भक्तिसंयुतः ॥ स मुच्यतेऽखिलैः पापैः परं ब्रह्माधिगच्छति ॥ २० ॥ पुत्रार्थे यः पठेद्भक्त्या रामं हृदि निधाय च ॥ संवत्सरेण लभते वन्ध्या अपि सुपुत्रकम् ॥ २१ ॥ सर्वान्कामानवाप्नोति रामचन्द्रप्रसादतः ॥ २२ ॥ ब्रह्मघ्नो गुरुतल्पगोऽपि पुरुषः स्तेयी सुरापोऽपि वा मातृभ्रातृविहिंसकोऽपि सततं भोगैकबद्धादरः ॥ नित्यं स्तोत्रमिदं जपन् रघुपतिं भक्त्या हृदिस्थं स्मरन् ध्यायन्मुक्तिमुपैति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किं पुनरसौ स्वाचारयुक्तो नरः ॥ २३ ॥

इति श्रीमदध्यात्मरामायणे अहल्याविरचितं रामचन्द्रस्तोत्रं सम्पूर्णम् ॥ ७ ॥

—— —

१०१ इन्द्रकृतं रामस्तोत्रम्

श्रीगणेशाय: नमः ॥ इन्द्र उवाच ॥ भजेऽहं सदा राममिन्दीवराभं भवारण्यदावानलाभाभिधानम् ॥ भवानीहृदा भावितानन्दरूपं भवाभावहेतुं भवादिप्रपन्नम् ॥ १ ॥ सुरानीकदुःखौघनाशैकहेतुं नराकारदेहं निराकारमीड्यम् ॥ परेशं परानन्दरूपं वरेण्यं हरिं राममीशं भजे भारनाशम् ॥ २ ॥ प्रपन्नाखिलानन्ददोहं प्रपन्नं प्रपन्नार्तिनिःशेषनाशाभिधानम् ॥ तपोयोगयोगीशभावाभिभाव्यं कपीशादिमित्रं भजे राममित्रम् ॥ ३ ॥ सदा भोगभाजां सुदूरे विभातं सदा योगभाजामदूरे विभातम् ॥ चिदानन्दकन्दं सदा राघवेशं विदेहात्मजानन्दरूपं प्रपद्ये ॥ ४ ॥ महायोगमायाविशेषानुयुक्तो विभासीश लीलानराकारवृत्ति ॥ त्वदानन्दलीलाकथापूर्णकर्णाः सदानन्दरूपा भवन्तीह लोके ॥ ५ ॥ अहं मानपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाभिमत्तप्रमत्तो न वेदाखिलेशाभिमानाभिमानः ॥ इदानीं भवत्पादपद्मप्रसादात्त्रिलोकाधिपत्याभिमानो विनष्टः ॥ ६ ॥ स्फुरद्रत्नकेयूरहाराभिरामं धराभारभूता सुरानीकदावम् ॥ शरच्चन्द्रवक्त्रं लसत्पद्मनेत्रं दुरावारपारं भजे राघवेशम् ॥ ७ ॥ सुराधीशनीलाभ्रनीलाङ्गकान्तिं विराधादिरक्षोवधाल्लोकशान्तिम् ॥ किरीटादिशोभं पुरारातिलाभं भजे रामचन्द्रं रघूणामधीशम् ॥ ८ ॥ लसच्चन्द्रकोटिप्रकाशादिपीठे समासीनमेकं समाधाय सीताम् ॥ स्फुरद्धेमवर्णां तडित्पुञ्जभासां भजे रामचन्द्रं निवृत्तार्तितन्द्रम् ॥ ९ ॥

इत्यध्यात्मरामायणे युद्धकाण्डे इन्द्रकृतं रामस्तोत्रं सम्पूर्णं ॥ ८ ॥

---

१०२ श्रीरामचन्द्राष्टकम् ।

श्रीगणेशाय नमः ॥ ॐ चिदाकारो धाता परमसुखदः पावनतनुर्मुनीन्द्रैर्योगीन्द्रैर्यतिपतिसुरेन्द्रैर्हनुमता ॥ सदा सेव्यः पूर्णो जनकतनयाङ्गः सुरगुरू रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ १ ॥ मुकुन्दो गोविन्दो जनकतनयालालितपदः पदं प्राप्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्याधमकुलभवा चापि शबरी ॥ गिरातीतो गम्यो विमलधिषणैर्वेदवचसा रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ २ ॥ धराधीशोऽनीशः सुरनरवराणां रघुपतिः किरीटी केयूरी कनककपिशः शोभितवपुः ॥ समासीनः पीठे रविशतनिभे शान्तमनसो रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ३ ॥ वरेण्यः शारण्यः कपिपतिसखा चान्तविधुरो ललाटे काश्मीरो रुचिरगतिभंगः शशिमुखः ॥ नराकारो रामो यतिपतिनुतः संसृतिहरो रमानाथो रामो रमतु मम चित्ते तु सततम् ।४॥ विरूपाक्षः काश्यामुपदिशति यन्नाम शिवदं सहस्रं यन्नाम्नां पठति गिरिजा प्रत्युषसि वै ॥ कलौ ये गायन्तीश्वरविधिमुखा यस्य चरितं रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ५ ॥ परो धीरोऽधीरोऽसुरकुलभवश्चासुरहरः परात्मा सर्वज्ञो नरसुरगणैर्गीतसुयशाः ॥ अहल्याशापघ्नः शरकर अजः कौशिकसखा रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ६ ॥ हृषीकेशः शौरिर्धरणिधरशायी मधुरिपुरुपेन्द्रो वैकुण्ठो गजरिपुहरस्तुष्टमनसः ॥ बलिध्वंसी वीरो दशरथसुतो नीतिनिपुणो रमानाथो रामो रमतु मम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चित्ते तु सततम् ॥ ७ ॥ कविः सौमित्रीड्यः कपट-मृगघाती वनचरो रणश्लाघी दान्तो धरणिभरहर्ता सुरनुतः ॥ अमानी मानज्ञो निखिलजनपूज्यो हृदि-शयो रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ८ ॥ इदं रामस्तोत्रं वरममरदासेन रचितमुषः-काले भक्त्या यदि पठति यो भावसहितम् ॥ मनुष्यः स क्षिप्रं जनिमृतिभयं तापजनकं परित्यज्य श्रेष्ठं रघुपतिपदं याति शिवदम् ॥ ९ ॥

इति श्रीमदमरदासरचितं श्रीराम-
चन्द्राष्टकं सम्पूर्णम् ॥ १ ॥

१०१ श्रीसीतारामाष्टकम् ।

श्रीगणेशाय नमः ॥ ब्रह्ममहेन्द्रसुरेन्द्रमरुद्गणरुद्र-मुनीन्द्रगणैरतिरम्यं क्षीरसरित्पतितीरमुपेत्य नुतं हि सतामवितारमुदारम् ॥ भूमिभर प्रशमार्थमथ प्रथि-तप्रकटीकृतचिद्घनमूर्त्तिं त्वां भजतो रघुनन्दन देहि दयाघन मे स्वपदाम्बुजदास्यम् ॥ १ ॥ पद्मदलाय-तलोचन हे रघुवंशविभूषण देव दयालो निर्मलनीर-दनीलतनोऽखिललोकहृदम्बुजभासक भानो ॥ कोम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लगात्र पवित्रपदाब्दरजः कणपावितगौतमकान्तं त्वां भजतो० ॥ २ ॥ पूर्ण परात्पर पालय मामतिदीनमनाथमनन्त सुखाब्धे प्रावृडदभ्रतडित्सुमनोहरपीतवराम्बर राम नमस्ते ॥ कामविभञ्जन कान्ततरानन काञ्चनभूषणरत्नकिरीटं त्वां भजतो० ॥ ३ ॥ दिव्यशरच्छशिकान्तिहरोज्ज्वल मौक्तिकमाल विशालसुमौले कोटिरविप्रभ चारुचरित्र पवित्रविचित्रधनुःशरपाणे ॥ चण्डमहाभुजदण्डविखण्डितराक्षसराजमहागजदण्डं त्वां भजतो० ॥ ४ ॥ दोषविहिंस्रभुजङ्गसहस्रसुरोपमहानलकीलकलापे जन्मजरामरणोर्मिमनोमदमन्मथनक्रविचक्रभवाब्धौ ॥ दुःखनिधौ च चिरं पतित कृपयाऽद्य समुद्धर राम ततो मां त्वां भजतो० ॥ ५ ॥ संसृतिघोरमदोत्कटकुञ्जरतृट्क्षुदनीरदपिण्डिततुण्डं दण्डकरोन्मथितं च रजस्तम उन्मदमोहपदोज्झितवार्तम ॥ दीनमनन्यगतिं कृपणं शरणागतमाशु विमोचय मूढं त्वां भजतो० ॥ ६ ॥ जन्मशतार्जितपापसमन्वितहृत्कमले पतिते पशुकल्पे हे रघुवीर महारणधीर दयां कुरु मय्यतिमन्दमनीषे ॥ त्वं जननी भगिनी च पिता मम तावदसि त्ववितांऽपि कृपालो त्वां भजतो० ॥ ७ ॥ त्वां तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दयालुमकिञ्चनवत्सलमुत्पलहारमपारमुदारं राम विहाय कमन्यमनामयमीशजनं शरणं ननु यायाम् ॥ त्वत्पदपद्ममतः श्रितमेव मुदा खलु देव सदाऽव ससीतं त्वां भजतो० ॥ ८ ॥ यः करुणामृतसिन्धुर-नाथजनोत्तमबन्धुरजोत्तमकारी भक्तभयोर्मिभवाब्धितरी सरयूतटिनीतटचारुविहारी ॥ तस्य रघुप्रववरस्य निरन्तरमष्टकमेतदनिष्टहरं वै यस्तु पठेदमरः स नरो लभतेऽच्युतरामपदाम्बुजदास्यम् ॥ ९ ॥

इति अच्युतयतिविरचितं श्री सीतारामाष्टकं सम्पूर्णम् ॥ १० ॥

—:०:—

१०४ श्रीरामाष्टकम् ।

श्रीगणेशाय नमः ॥ भजे विशेषसुन्दरं समस्तपापखण्डनम् ॥ स्वभक्तचित्तरञ्जनं सदैव रामसद्वयम् ॥ १ ॥ जटाकलापशोभितं समस्तपापनाशकम् ॥ स्वभक्तभीतिभञ्जनं भजे ह राममद्वयम् ॥ २ ॥ निजस्वरूपबोधकं कृपाकरं भवापहम् ॥ समं शिवं निरञ्जनं भजे ह राममद्वयम् ॥ ३ ॥ सहप्रपञ्चकल्पितं ह्यनामरूपवास्तवम् ॥ निराकृतिं निरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नयं भज ह राममद्वयम् ॥ ४ ॥ निष्प्रपञ्चनिर्वि-
कल्पनिर्मलं निरामयम् ॥ चिदेकरूपसन्ततं भजे ह
राममद्वयम् ॥ ५ ॥ भवाब्धिपोतरूपकं ह्यशेषदेह-
कल्पितम् ॥ गुणाकरं कृपाकरं भजे ह राममद्वयम्
॥ ६ ॥ महासुवाक्यबोधकैर्विराजमानवाक्पदैः ॥
परं हि ब्रह्म व्यापकं भजे ह राममद्वयम् ॥ ७ ॥
शिवप्रदं सुखप्रदं भवच्छिदं भ्रमापहम् ॥ विराज-
मानदैशिकं भजे ह राममद्वयम् ॥ ८ ॥ रामाष्टकं
पठति यः सुकरं सुपुण्यं व्यासेन भाषितमिदं शृणुते
मनुष्यः ॥ विद्यां श्रियं विपुलसौख्यमनन्तकीर्त्तिं
सम्प्राप्य देहविलये लभते च मोक्षम् ॥ ९ ॥

इति श्रीव्यासविरचितं श्रीरामाष्टकं

सम्पूर्णम् ॥ ११ ॥

—:-०-:—

१०५ श्रीरामाष्टकम् (२) ।

श्रीगणेशायः नमः ॥ कृतार्तदेववन्दनं दिनेश-
वंशनन्दनम् ॥ सुशोभिभालचन्दनं नमामि राममी-
श्वरम् ॥ १ ॥ मुनीन्द्रयज्ञकारकं शिलाविपत्तिहा-
रकम् ॥ महाधनुर्विदारकं नमामि० ॥ ३ ॥ कुरङ्ग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुक्तसायकं जटायुमोक्षदायकम् ॥ प्रविद्धकीशनायकं नमामि० ॥ ४ ॥ सवङ्गसङ्गसम्मतिं निबद्धनिम्नगापतिम् ॥ दशास्यवंशसंक्षतिं नमामि० ॥ ५ ॥ विदीनदेवहर्षणं कपीप्सितार्थवर्षणम् ॥ स्वबन्धुशोककर्षणं नमामि० ॥ ६ ॥ गतारिराज्यरक्षणं प्रजाजनार्तिभक्षणम् ॥ कृतास्तमोहलक्षणं नमामि० ॥ ७ ॥ हृताखिलाचलाभरं स्वधामनीतनागरम् जगत्तमोदिवाकरं नमामि राममीश्वरम् ॥ ८ ॥ इदं समाहितात्मना नरो रघूत्तमाष्टकम् ॥ पठन्निरन्तरं भयं भवोद्भवं न विन्दते ॥ ९ ॥

इति श्रीपरमहंसब्रह्मानन्दविरचितं श्रीरामाष्टकं सम्पूर्णम् ॥ १२ ॥

—:-o-:—

१०६ श्रीरामाष्टकम् (३)

श्रीगणेशाय नमः ॥ यस्मादुदेति निखिलं स्थिरजङ्गमं यो वाचां धियां च विषयो न भवेत्सदैव ॥ यस्मिन् स्थितो न लभते पुनरेव जन्म तं राममद्वयमनन्तमनादिमीडे ॥ १ ॥ कोशान् विहाय सकलान्परिशेषमात्रं जानन्ति यं विमलबोधदृशा महान्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मेति वेदवचसा गुरुदेवभक्तास्तं राम० ॥ २ ॥ त्यक्त्वा तनुं यममलं प्रविशन्ति तज्ज्ञा ध्यायन्ति यं शिवविरञ्चिमुखाश्च देवाः ॥ पश्यन्ति योगनिरता विजितेन्द्रिया ये तं राम० ॥ ३ ॥ तत्त्वावलीकमपि सत्यतया विभात्यधिष्ठानमस्य विदितं न भवेद्धि यावत् ॥ बोधेन यस्य न विभाति यथा खनैल्यं तं राम० ॥ ४ ॥ भासार्कसोमचपलानलतारकाणि लोहादितप्तमनलेन यथा विभान्ति ॥ यस्यानुभानमुपयान्ति मनोवचांसि तं राम० ॥ ५ ॥ सूर्येन्दुरूपनयने चरणौ च भूमिः प्राणोऽथ यस्य पवनो हृदयं च विश्वम् ॥ मूर्धाऽनलो भवति वाग्विवृताश्च वेदास्तं राम० ॥ ६ ॥ सृष्ट्वा प्रविश्य तदनु स्वयमेव सच्च तच्चाभवच्च ऋषिभिः सततं विमृग्यः ॥ लब्ध्वा रसं यममलं सुखमाप्नुवन्ति तं राम० ॥ ७ ॥ यश्चेतनक्षितिमतामतिलोचनानां नित्यञ्च योगगणशब्दमखध्रुवाणाम् ॥ सत्ताप्रदो न तु सतामनुभूतिसिद्धस्तं राम० ॥ ८ ॥ ज्ञानात्पुमान् विमलधीर्विरतिं प्रयातो जन्यास्वकर्मफलतो ध्रुवनाशभाजः ॥ स्तोत्रं पठेद्य इह राघवभक्तियुक्तः पातुं न वै स लभते जन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुक्तसायकं जटायुमोक्षदायकम् ॥ प्रविद्धकीशनायकं नमामि० ॥ ४ ॥ प्लवङ्गसङ्गसम्मतिं निबद्धनिम्नगापतिम् ॥ दशास्यवंशसंक्षतिं नमामि० ॥ ५ ॥ विदीनदेवहर्षणं कपीप्सितार्थवर्षणम् ॥ स्वबन्धुशोककर्षणं नमामि० ॥ ६ ॥ गतारिराज्यरक्षणं प्रजाजनार्तिभक्षणम् ॥ कृतास्तमोहलक्षणं नमामि० ॥ ७ ॥ हृताखिलाचलाभरं स्वधामनीतनागरम् जगत्तमोदिवाकरं नमामि राममीश्वरम् ॥ ८ ॥ इदं समाहितात्मना नरो रघूत्तमाष्टकम् ॥ पठन्निरन्तरं भयं भवोद्भवं न विदन्ते ॥ ९ ॥

इति श्रीपरमहंसब्रह्मानन्दविरचितं श्रीरामाष्टकं सम्पूर्णम् ॥ १२ ॥

—:-०-:—

१०६ श्रीरामाष्टकम् (३)

श्रीगणेशाय नमः ॥ यस्मादुदेति निखिलं स्थिरजङ्गमं यो वाचां धियां च विषयो न भवेत्सदैव ॥ यस्मिन् स्थितो न लभते पुनरेव जन्म तं रामसद्वयमनन्तमनादिमीडे ॥ १ ॥ कोशान् विहाय सकलान्परिशेषमात्रं जानन्ति यं विमलबोधदृशा महान्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मेति वेदवचसा गुरुदेवभक्तास्तं राम० ॥ २ ॥ त्यक्त्वा तनुं यममलं प्रविशन्ति तज्ज्ञा ध्यायन्ति यं शिवविरञ्चिमुखाश्च देवाः ॥ पश्यन्ति योगनिरता विजितेन्द्रिया ये तं राम० ॥ ३ ॥ तत्त्वावलीकमपि सत्यतया विभात्यधिष्ठानमस्य विदितं न भवेद्धि यावत् ॥ बोधेन यस्य न विभाति यथा खनैल्यं तं राम० ॥ ४ ॥ भासार्कसोमचपलानलतारकाणि लोहादितप्तमनलेन यथा विभान्ति ॥ यस्यानुभानमुपयान्ति मनोवचांसि तं राम० ॥ ५ ॥ सूर्येन्दुरूपनयने चरणौ च भूमिः प्राणोऽथ यस्य पवनो हृदयं च विश्वम् ॥ मूर्घाऽनलो भवति वाग्विवृताश्च वेदास्तं राम० ॥ ६ ॥ सृष्ट्वा प्रविश्य तदनु स्वयमेव सच्च तच्चाभवच्च ऋषिभिः सततं विमृग्यः ॥ लब्ध्वा रसं यममलं सुखमाप्नुवन्ति तं राम० ॥ ७ ॥ यश्चेतनश्चितिमतामतिलोचनानां नित्यश्च योगगणशब्दमखध्रुवाणाम् ॥ सत्ताप्रदो न तु सतामनुभूतिसिद्धस्तं राम० ॥ ८ ॥ ज्ञानात्पुमान् विमलधीर्विरतिं प्रयातो जन्यास्वकर्मफलतो ध्रुवनाशभाजः ॥ स्तोत्रं पठेद्य इह राघवभक्तियुक्तः पातुं न वै स लभते जन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीपयांसि ॥ ६ ॥

इति श्रीमदुदासीनात्मस्वरूपेण विरचितं रामाष्टकं सम्पूर्णम् ॥ १३ ॥

—:-❀-:—

१०७ श्रीरघुनाथष्टकम् ।

श्रीगणेशाय नमः ॥ शुनासीराधीशैरवनितलज्ञप्तीडितगुणं प्रकृत्याऽजं जातं तपनकुलचण्डांशुभपरम् ॥ सिते वृद्धिं ताराधिपतिमिव यान्तं निजगृहे ससीतं सानन्दं प्रणतरघुनाथं सुरनुतम् ॥ १ ॥ निहन्तारं शैवं धनुरिव इवेष्टि नृपगणे पथि ज्याकृष्टेन प्रबलभृगुवर्यस्य शमनम् ॥ विहारं गार्हस्थ्यं तदनु भजमानं सुविमलं ससीतं० ॥ २ ॥ गुरोराज्ञां नीत्वा वनमनुगतं दारसहितं ससौमित्रिं त्यक्त्वेप्सितमपि सुराणां नृपसुखम् ॥ विरूपाद्राक्षस्याः प्रियविरहसन्तप्तमनसं ससीतं० ॥ ३ ॥ विराधं स्वर्नीत्वा तदनु च कबन्धं सुररिपुं गतं पम्पातीरे पवनसुतसम्मेलनसुखम् ॥ गतं किष्किन्धायां विदितगुणसुग्रीवसचिवं ससीतं० ॥ ४ ॥ प्रियापेक्षोत्कण्ठं जलनिधिगतं वानरयुतं जले सेतुं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बद्ध्वाऽसुरकुलनिहन्तारमनघम् ॥ विशुद्धामर्धाङ्गीं हुतभुजि समीक्षन्तमचलं ससीतं० ॥ ५ ॥ विमानं चारुह्यानुजजनकजासेवितपदमयोध्यायां गत्वा नृपपदमवाप्तारमजरम् ॥ सुयज्ञैस्तृप्तारं निजमुखसुरान् शान्तमनसं ससीतं० ॥ ६ ॥ प्रजासंस्थातारं विहितनिजधर्मे श्रुतिपथं सदाचारं वेदोदितमपि च कर्तारमखिलम् ॥ नृषु प्रमोद्रेकं निखिलमनुजानां हितकरं ससीतं० ॥ ७ ॥ तपःकीर्त्या शेषाः श्रवणगदनाभ्यां द्विजमुखास्तरिष्यन्ति ज्ञात्वा जगति खलु गन्तारमजनम् ॥ अतस्तां संस्थाप्य स्वपुरमनुनेतारमखिलं ससीतं० ॥ ८ ॥ रघुनाथाष्टकं हृद्यं रघुनाथेन निर्मितम् ॥ पठतां पापराशिघ्नं भुक्तिमुक्तिप्रदायकम् ॥ ९ ॥

इति श्रीरघुनाथाष्टकं समाप्तम् ॥ १४ ॥

---

१०८ रामषट्पदी ।

श्रीगणेशाय नमः ॥ तरणिकुलजलतरणे तरुणतरणितेजसा विभातरणे ॥ कृत्तविदशदशमुखतिमिरगणान्तस्तमो नुद मे ॥ १ ॥ शयविधृत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरशरासन निखिलखलोज्जासन प्रथितसुयशाः ॥ मथितहृदयान्तरालं दुष्कृतिजाल ममापनय ॥ २ ॥ सुरुचिरमरीचिनिचयांश्चरणनखेन्दुमुदीय मम हृदये ॥ हृदयेश विकलतापं स्वसकलतापं किलापहर ॥ ३ ॥ इन्दीवरदलसुन्दर वरदलसद्वामजानकीजाने ॥ जाने त्वामखिलेशं लेशलसल्लोकलोकेशम् ॥ ४ ॥ शं कुरु शङ्करवल्लभ यल्लभतामाश्रयं त्वदङ्घ्रियुगे ॥ अनुरक्तिदृढां भक्ति चिरस्य चिन्ताब्धिभवभक्तिम् ॥ ५ ॥ वैराजराजराजोऽप्यभूत्सुसाकेतराजनरराजः ॥ वानरराजसहायो लीलाकैवल्यमेतद्धि ॥ ६ ॥ जगदसुसुतासुपरवसुमुदे यद्देषा स्तुतिः कृता स्फीता ॥ सा रामषट्पदीयं विलसतु तत्पादजलजाते ॥ ७ ॥

इति श्रीमन्मालवीय-शुक्लश्रीमन्मथुरानाथप्रणीता रामषट्पदी समाप्ता ॥ १५ ॥

॥ इति रामावतारस्तोत्राणि ॥

—*:०:*—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ कृष्णावतारस्तोत्राणि।

१०९ ब्रह्मदेवकृतं कृष्णस्तोत्रम्।

श्रीगणेशाय नमः ॥ ब्रह्मोवाच ॥ रक्ष रक्ष हरे मां च निमग्नं कामसागरे ॥ दुष्कीर्तिजलपूर्णे च दुष्पारे बहुसङ्कटे ॥ १ ॥ भक्तिविस्मृतिबीजे च विपत्सोपानदुस्तरे ॥ अतीव निर्मलज्ञानचक्षुप्रच्छन्नकारणे ॥ २ ॥ जन्मोर्मिसङ्गसहिते योषिन्नक्रौघसङ्कुले ॥ रतिस्रोतसमायुक्ते गम्भीरे घोर एव च ॥ ३ ॥ प्रथमामृतरूपे च परिणामविषालये ॥ यमालयप्रवेशाय मुक्तिद्वारातिविस्मृतौ ॥ ४ ॥ बुद्ध्या तरण्या विज्ञानैरुद्धरास्मानतः स्वयम् ॥ स्वयं च त्वं कर्णधारः प्रसीद मधुसूदन ॥ ५ ॥ मद्विधाः कतिचिन्नाथ नियोज्या भवकर्मणि ॥ सन्ति विश्वेश विधयो हे विश्वेश्वर माधव ॥ ६ ॥ न कर्मक्षेत्रमेवेदं ब्रह्मलोकोऽयमीप्सितः ॥ तथापि न स्पृहा कामे [illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरशरासन निखिलखलोज्जासन प्रथितसुयशाः ॥ मथितहृदयान्तरालं दुष्कृतिजाल ममापनय ॥ २ ॥ सुरुचिरमरीचिनिचयांश्चरणनखेन्दुमुदीय मम हृदये ॥ हृदयेश विकलतापं स्वसकलतापं किलापहर ॥ ३ ॥ इन्दीवरदलसुन्दर वरदलसद्वामजानकीजाने ॥ जाने त्वामखिलेशं लेशलसल्लोकलोकेशम् ॥ ४ ॥ शं कुरु शङ्करवल्लभ यल्लभतामाश्रयं त्वदङ्घ्रियुगे ॥ अनुरक्तिदृढां भक्ति चिरस्य चिन्ताब्धिभवभक्तिम् ॥ ५ ॥ वैराजराजराजोऽप्यभूत्सुसाकेतराजनरराजः ॥ वानरराजसहायो लीलाकैवल्यमेतद्धि ॥ ६ ॥ जगदसुसुतासुपरवसुमुदे यदेषा स्तुतिः कृता स्फीता ॥ सा रामषट्पदीयं विलसतु तत्पादजलजाते ॥ ७ ॥

इति श्रीमन्मालवीय-शुक्लश्रीमन्मथुरानाथप्रणीता रामषट्पदी समाप्ता ॥ १५ ॥

॥ इति रामावतारस्तोत्राणि ॥

—*:o:*—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ कृष्णावतारस्तोत्राणि ।

१०९ ब्रह्मदेवकृतं कृष्णस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ब्रह्मोवाच ॥ रक्ष रक्ष हरे मां च निमग्नं कामसागरे ॥ दुष्कीर्तिजलपूर्णे च दुष्पारे बहुसङ्कटे ॥ १ ॥ भक्तिविस्मृतिबीजे च विपत्सोपानदुस्तरे ॥ अतीव निर्मलज्ञानचक्षुः प्रच्छन्नकारणे ॥ २ ॥ जन्मोर्मिसङ्गसहिते योषिन्नक्रौघसङ्कुले ॥ रतिस्रोतसमायुक्ते गम्भीरे घोर एव च ॥ ३ ॥ प्रथमामृतरूपे च परिणाम विषालये ॥ यमालयप्रवेशाय मुक्तिद्वारातिविस्मृतौ ॥ ४ ॥ बुद्धया तरण्या विज्ञानैरुद्धरास्मानतः स्वयम् ॥ स्वयं च त्वं कर्णधारः प्रसीद मधुसूदन ॥ ५ ॥ मद्विधाः कतिचिन्नाथ नियोज्या भवकर्मणि ॥ सन्ति विश्वेश विधयो हे विश्वेश्वर माधव ॥ ६ ॥ न कर्मक्षेत्रमेवेदं ब्रह्मलोकोऽयमीप्सितः ॥ तथापि न स्पृहा कामे त्वद्भक्तिव्यव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धायके ॥ ७ ॥ हे नाथ करुणासिन्धो दीनबन्धो कृपां कुरु ॥ त्वं महेश महाज्ञाता दुःस्वप्नं मां न दर्शय ॥ ८ ॥ इत्युक्त्वा जगतां धाता विरराम सनातनः ॥ ध्यायं ध्यायं मत्पदाब्जं शश्वत्सस्मार मामिति ॥ ९ ॥ ब्रह्मणा च कृतं स्तोत्रं भक्तियुक्तश्च यः पठेत् ॥ स चैवाकर्मविषये न निमग्नो भवेद्ध्रुवम् ॥ १० ॥ मम मायां विनिर्जित्य स ज्ञानं लभते ध्रुवम् ॥ इह लोके भक्तियुक्तो मद्भक्तप्रवरो भवेत् ॥ ११ ॥

इति श्रीब्रह्मदेवकृतं श्रीकृष्णस्तोत्रं सम्पूर्णम् ॥ १ ॥

११० इन्द्रकृतं कृष्णस्तोत्रम् ।

श्रीगणेशाय नमः ॥ इन्द्र उवाच ॥ अक्षरं परमं ब्रह्म ज्योतिरूपं सनातनम् ॥ गुणातीतं निराकारं स्वेच्छामयमनन्तकम् ॥ १ ॥ भक्तध्यानाय सेवायै नानारूपधरं वरम् ॥ शुक्लरक्तपीतश्यामं युगानुक्रमणेन च ॥ २ ॥ शुक्लतेजःस्वरूपं च सत्येऽसत्यस्वरूपिणम् ॥ त्रेतायां कुङ्कुमाकारं ज्वलन्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मतेजसा ॥ ३ ॥ द्वापरे पीतवर्णं च शोभितं पीतवाससा ॥ कृष्णवर्णं कलौ कृष्णं परिपूर्णतमं प्रभुम् ॥ ४ ॥ नवधाराधरोत्कृष्टश्यामसुन्दरविग्रहम् ॥ नन्दैकनन्दनं वन्दे यशोदानन्दनं प्रभुम् ॥ ५ ॥ गोपिकाचेतनहरं राधाप्राणाधिकं परम् ॥ विनोदमुरलीशब्दं कुर्वन्तं कौतुकेन च ॥ ६ ॥ रूपेणाप्रतिमेनैव रत्नभूषणभूषितम् ॥ कन्दर्पकोटिसौन्दर्यं बिभ्रतं शान्तमीश्वरम् ॥ ७ ॥ क्रीडन्तं राधया सार्द्धं वृन्दारण्ये च कुत्रचित् ॥ कुत्रचिन्निर्जनेऽरण्ये राधावक्षःस्थलस्थितम् ॥ ८ ॥ जलक्रीडां प्रकुर्वन्तं राधया सह कुत्रचित् ॥ राधिकाकबरीभारं कुर्वन्तं कुत्रचिद्वने ॥ ९ ॥ कुत्रचिद्राधिकापादे दत्तवन्तमलक्तकम् ॥ राधाचर्चितताम्बूलं गृह्णन्तं कुत्रचिन्मुदा ॥ १० ॥ पश्यन्तं कुत्रचिद्राधां पश्यन्तीं वक्रचक्षुषा ॥ दत्तवन्तं च राधायै कृत्वा मालां च कुत्रचित् ॥ ११ ॥ कुत्रचिद्राधया सार्द्धं गच्छन्तं रासमण्डलम् ॥ राधादत्तां गले मालां धृतवन्तं च कुत्रचित् ॥ १२ ॥ सार्धं गोपालिकाभिश्च विहरन्तं च कुत्रचित् । राधां गृहीत्वा गच्छन्तं तां विहाय च कुत्रचित् ॥ १३ ॥ विप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्नीदत्तमन्नं भुक्तवन्तं च कुत्रचित् ॥ भुक्तवन्तं तालफलं बालकैः सह कुत्रचित् ॥ १४ ॥ वस्त्रं गोपालिकानां च हरन्तं कुत्रचिन्मुदा ॥ गवां गणं व्याहरन्तं कुत्रचिद्बालकैः सह ॥ १५ ॥ कालीयमूर्ध्नि पादाब्जं दत्तवन्तं च कुत्रचित् ॥ विनोदमुरलीशब्दं कुर्वन्तं कुत्रचिन्मुदा ॥ १६ ॥ गायन्तं रम्यसङ्गीत कुत्रचिद्बालकैः सह ॥ स्तुत्वा शक्रः स्तवेन्द्रेण प्रणनाम हरिं भिया ॥ १७ ॥ पुरा दत्तेन गुरुणा रणे वृत्रासुरेण च ॥ कृष्णेन दत्तं कृपया ब्रह्मणे च तपस्वते ॥ १८ ॥ एकादशाक्षरो मन्त्रः कवचं सर्वलक्षणम् ॥ दत्तमेतत्कुमाराय पुष्करे ब्रह्मणा पुरा ॥ १९ ॥ तेन चाङ्गिरसे दत्तं गुरवेऽङ्गिरसा मुने ॥ इदमिन्द्रकृतं स्तोत्रं नित्यं भक्त्या च यः पठेत् ॥ २० ॥ इह प्राप्य दृढां भक्तिमन्ते दास्यं लभेद्ध्रुवम् ॥ जन्ममृत्युजराव्याधिशोकेभ्यो मुच्यते नरः ॥ २१ ॥ न हि पश्यति स्वप्नेऽपि यमदूतं यमालयम् ॥ २२ ॥

इति श्रीब्रह्मवैवर्ते इन्द्रकृतं श्रीकृष्णस्तोत्रं सम्पूर्णम् ॥ २ ॥

—:-:—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१११ विप्रपत्नीकृतं कृष्णस्तोत्रम् ।

श्रीगणेशाय नमः ॥ विप्रपत्न्य ऊचुः ॥ त्वं ब्रह्म परमं धाम निरीहो निरहङ्कृतिः ॥ निर्गुणश्च निराकारः साकारः सगुणः स्वयम् ॥ १ ॥ साक्षिरूपश्च निर्लिप्तः परमात्मा निराकृतिः ॥ प्रकृतिः पुरुषस्त्वं च कारणं च तयोः परम् ॥ २ ॥ सृष्टिस्थित्यन्तविषये ये च देवास्त्रयः स्मृताः ॥ ते त्वदंशाः सर्वबीजा ब्रह्मविष्णुमहेश्वराः ॥ ३ ॥ यस्य लोम्नां च विवरे चाखिलं विश्वमीश्वर ॥ महाविराण्महाविष्णुस्त्वं तस्य जनको विभो ॥ ४ ॥ तेजस्त्वं चापि तेजस्वी ज्ञानं ज्ञानी च तत्परः ॥ वेदेऽनिर्वचनीयस्त्वं कस्त्वां स्तोतुमिहेश्वरः ॥ ५ ॥ महदादिसृष्टिसूत्रं पञ्चतन्मात्रमेव च ॥ बीजं त्वं सर्वशक्तीनां सर्वशक्तिस्वरूपकः ॥ ६ ॥ सर्वशक्तीश्वरः सर्वः सर्वशक्त्याश्रयः सदा ॥ त्वमनीहः स्वयञ्ज्योतिः सर्वानन्दः सनातनः ॥ ७ ॥ अहो आकारहीनस्त्वं सर्वविग्रहवानपि ॥ सर्वेन्द्रियाणां विषयं जानासि नेन्द्रियी भवान् ॥ ८ ॥ सरस्वती जडीभूता यत्स्तोत्रे यन्निरूपणे ॥ जडीभूतो महेशश्च शेषो धर्मो विधिः स्वयम् ॥ ९ ॥ पार्वती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कमला राधा सावित्री वेदसूरपि ॥ वेदश्च जडतां याति के वा शक्ता विपश्चितः ॥ १० ॥ वयं किं स्तवनं कुर्मः स्त्रियः प्राणेश्वरेश्वर ॥ प्रसन्नो भव नो देव दीनबन्धो कृपां कुरु ॥ ११ ॥ इति तेपुश्च ता विप्रपत्न्यस्तच्चरणाम्बुजे ॥ अभयं प्रददौ ताभ्यः प्रसन्नवदनेक्षणः ॥ १२ ॥ विप्रपत्नीकृतं स्तोत्रं पूजाकाले च यः पठेत् ॥ स गतिं विप्रपत्नीनां लभते नात्र संशयः ॥ १३ ॥

इति श्रीब्रह्मवैवर्ते विप्रपत्नीकृतं श्रीकृष्णस्तोत्रम् ३

११२ ज्वरकृतं श्रीकृष्णस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ज्वर उवाच ॥ नमामि त्वाऽनन्तशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम् ॥ विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥ १ ॥ कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ॥ त्वत्सङ्घातो बीजरोहप्रवाहस्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥ २ ॥ नानाभावैर्लीलयैवोपपन्नैर्देवान्साधून् लोक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सेतून्बिभर्षि ॥ हंस्युन्मार्गान् हिंसया वर्तमानान् जन्मैतत्ते भारहाराय भूमेः ॥ ३ ॥ तप्तोऽहं ते तेजसा दुःसहेन शान्तोग्रेणात्युल्बणेन ज्वरेण ॥ तावत्तापो देहिनां तेऽङ्घ्रिमूलं नो सेवेरन् यावदाशानुबद्धाः ॥ ४ ॥ श्रीभगवानुवाच ॥ त्रिशिरस्ते प्रसन्नोऽस्मि व्येतु ते मज्ज्वराद्भयम् ॥ यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भयम् ॥ ५ ॥ इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः ॥ बाणस्तु रथमारूढः प्रागाद्योत्स्यन् जनार्दनम् ॥ ६ ॥

इति श्रीमद्भागवतान्तर्गतं ज्वरकृतं श्रीकृष्णस्तोत्रम् समाप्तम् ॥ ४ ॥

---

११३ मोहिनीकृतं कृष्णस्तोत्रम् ।

श्रीगणेशायनमः ॥ मोहिन्युवाच ॥ सर्वेन्द्रियाणां प्रवरं विष्णोरंश च मानसम् ॥ तदेव कर्म्मणां बीजं तदुद्भव नमोऽस्तु ते ॥ १ ॥ स्वयमात्मा हि भगवान् ज्ञानरूपो महेश्वरः ॥ नमो ब्रह्मन् जगत्स्रष्टस्तदुद्भव नमोऽस्तु ते ॥ २ ॥ सर्वाजित जगज्जेतर्जीवजीव मनोहर ॥ रतिबीज रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वामिन् रतिप्रिय नमोऽस्तु ते ॥ ३ ॥ शश्वद्योषिद्धिष्ठान योषित्प्राणाधिकप्रिय ॥ योषिद्वाहन योषास्त्र योषिद्बन्धो नमोऽस्तु ते ॥ ४ ॥ पतिसाध्यकराशेषरूपाधार गुणाश्रय ॥ सुगन्धिवातसचिव मधुमित्र नमोऽस्तु ते ॥ ५ ॥ शश्वद्योनिकृताधार स्त्रीसन्दर्शनवधन ॥ विदग्धानां विरहिणां प्राणान्तक नमोऽस्तु ते ॥६॥ अकृपा येषु तेऽनर्थं तेषां ज्ञानं विनाशनम् ॥ अनूहरूपभक्तेषु कृपासिन्धो नमोऽस्तु ते ॥ ७ ॥ तपस्विनां च तपसां विघ्नबीजाय लीलया ॥ मनः सकामं मुक्तानां कर्तुं शक्त नमोऽस्तु ते ॥ ८ ॥ तपःसाध्यस्तथाऽऽराध्यः सदैवं पाञ्चभौतिकः ॥ पञ्चेन्द्रियकृताधार पञ्चबाण नमोऽस्तु ते ॥ ६ ॥ मोहिनीत्येवमुक्त्वा तु मनसा सा विधेः पुरः विरराम नम्रवक्त्रा बभूव ध्यानतत्परा ॥ १० ॥ उक्तं माध्यन्दिने कान्ते स्तोत्रमेतन्मनोहरम् ॥ पुरा दुर्वाससा दत्तं मोहिन्यै गन्धमादने ॥ ११ ॥ स्तोत्रमेतन्महापुण्यं कामी भक्त्या यदा पठेत् ॥ अभीष्टं लभते नूनं निष्कलङ्को भवेद् ध्रुवम् ॥ १२ ॥ चेष्टां न कुरुते कामः कदाचिदपि तं प्रियम् ॥ भवेदरोगी श्रीयुक्तः काम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवसमप्रभः ॥ वनितां लभते साध्वीं पत्नीं त्रैलोक्यमोहिनीम् ॥ १३ ॥

इति श्रीमोहिनीकृतं श्रीकृष्णस्तोत्रम्
सम्पूर्णम् ॥ ५ ॥

---

११४ श्रीकृष्णस्तोत्रम्

श्रीगणेशाय नमः ॥ वन्दे नवघनश्यामं पीतकौशेयवाससम् ॥ सानन्दं सुन्दरं शुद्धं प्रकृतेः परम् ॥ १ ॥ राधेशं राधिकाप्राणवल्लभं वल्लवीसुतम् ॥ राधासेवितपादाब्जं राधावक्षःस्थलस्थितम् ॥ २ ॥ राधाधारं भवाधारं सर्वाधारं नमामि तम् ॥ ३ ॥ राधाहृत्पद्ममध्ये च वसन्तं सन्ततं शुभम् ॥ राधासहचरं शश्वद्राधाज्ञापरिपालकम् ॥ ४ ॥ ध्यायन्ते योगिनो योगान् सिद्धाः सिद्धेश्वराश्च यम् ॥ तं ध्यायेत्सततं शुद्धं भगवन्तं सनातनम् ॥ ५ ॥ सेवन्ते सततं सन्तो ब्रह्मेशशेषसंज्ञकाः ॥ सेवन्ते निर्गुणं ब्रह्म भगवन्तं सनातनम् ॥ ६ ॥ निर्लिप्तं च निरीहं च परमात्मानमीश्वरम ॥ नित्यं सत्यं च परमं भगवन्तं सना-

-Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तनम् ॥ ७ ॥ यं सृष्टेरादिभूतं च सर्ववीजं परात्परम् ॥ योगिनस्तं प्रपद्यन्ते भगवन्तं सनातनम् ॥ ८ ॥ बीजं नानावताराणां सर्वकारण-कारणम् ॥ वेदावेद्यं वेदबीजं वेदकारणकारणम् ॥ ६ ॥ योगिनस्तं प्रपद्यन्ते भगवन्तं सनातनम् ॥ इत्येवमुक्त्वा गन्धर्वः पपात धरणीतले ॥ १० ॥ ननाम दण्डवद्भूमौ देवदेवं परात्परम् ॥ इति तेन कृतं स्तोत्रं यः पठेत्प्रयतः शुचिः ॥ ११ ॥ इह जीवनमुक्तश्च परं याति परां गतिम् ॥ हरिभक्तिं हरेर्दास्यं गोलोके च निरामयः ॥ १२ ॥ पार्षद-प्रवरत्वं च लभते नात्र संशयः ॥ १३ ॥

इति नारदपञ्चरात्रे श्रीकृष्णस्तोत्रं सम्पूर्णम् ॥ ६ ॥

—:❀:—

११५ दामोदरस्तोत्रम् ।

श्रीगणेशाय नमः ॥ सिन्धुदेशोद्भवो विप्रो नाम्ना सत्यव्रतः सुधीः ॥ विरक्त इन्द्रियार्थे-भ्यस्त्यक्त्वा पुत्रगृहादिकम् ॥ १ ॥ वृन्दावने स्थितः कृष्णमारराध दिवानिशम् । निःस्वः सत्यव्रतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विप्रो निर्जने व्यग्रमानसः ॥ २ ॥ कार्तिके पूजया-
मास प्रीत्या दामोदरं नृप ॥ तृतीयेऽह्नि सकृद्-
भुंक्ते पत्रं मूलं फलं तथा ॥३॥ पूजयित्वा हरिं स्तौति
प्रीत्या दामोदराभिधम् ॥ ४ ॥ सत्यव्रत उवाच ॥
नमामीश्वरं सच्चिदानन्दरूपं लसत्कुण्डलं गोकुले
भ्राजमानम् ॥ यशोदाभियोलूखले धावमानं परा-
मृष्टमत्यन्ततो द्रुतगोप्या ॥ ५ ॥ रुदन्तं मुहुर्नेत्र-
युग्मं मृजन्तं कराम्भोजयुग्मेन सातङ्कनेत्रम् ॥
मुहुः श्वासकं पत्रिरेखाङ्ककण्ठं स्थितं नौमि दामो-
दरं भक्तवन्द्यम् ॥ ६ ॥ वरं देव देहीश मोक्षा-
वधिं वा न चान्यं वृणेऽहं वरेशादपीह ॥ इदं
ते वपुर्नाथ गोपालबालं सदा मे मनस्याविरास्तां
किमन्यैः ॥ ७ ॥ इदं ते मुखाम्भोजमत्यन्तनीलैर्वृतं
कुन्तलैः स्निग्धवक्त्रेश्च गोप्या ॥ मुहुश्चुम्बितं बिम्ब-
रक्ताधरं मे मनस्याविरास्तामलं लक्षलाभैः ॥ ८ ॥
नमो देव दामोदरानन्द विष्णो प्रसीद प्रभो दुःख-
जालाब्धिमग्नम् ॥ कृपादृष्टिवृष्ट्याऽतिदीनं च
रक्ष गृहाणेश मामज्ञमेवाक्षिदृश्यम् ॥ ९ ॥ कुबेरा-
त्मजौ वृक्षमूर्ती च यद्वत्त्वया मोचितौ भक्ति-
भाजौ कृतौ च ॥ तथा प्रेम भक्तिं स्विकां मे प्रयच्छ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न मोक्षे ग्रहो मेऽस्ति दामोदरेह ॥ १० ॥ नमस्ते सुदाम्ने स्फुरद्दीप्तधाम्ने तथोरःस्थविश्वस्य धाम्ने नमस्ते ॥ नमो राधिकायै त्वदीयप्रियायै नमोऽनन्तलीलाय देवाय तुभ्यम् ॥ ११ ॥ नारद उवाच ॥ सत्यव्रतद्विजस्तोत्रं श्रुत्वा दामोदरो हरिः ॥ चिद्युल्लोलचमत्कारो हृदये शनकैरभूत् ॥ १२ ॥

इति श्रीसत्यव्रतकृतं दामोदरस्तोत्रं सम्पूर्णम् ॥ ७ ॥

—०:※:०—

११६ गोपालस्तोत्रम् ।

श्रीगणेशाय नमः ॥ श्रीनारद उवाच ॥ नवीननीरदश्यामं नीलेन्दीवरलोचनम् ॥ वल्लवीनन्दनं वन्दे कृष्णं गोपालरूपिणम् ॥ १ ॥ स्फुरद्बर्हिदलोद्बद्धनीलकुञ्चितमूर्धजम् ॥ कदम्बकुसुमोद्बद्धवनमालाविभूषितम् ॥ २ ॥ गण्डमण्डलसंसर्गिचलत्काञ्चनकुण्डलम् ॥ स्थूलमुक्ताफलोदारहारोद्योतितवक्षसम् ॥ ३ ॥ हेमाङ्गदतुलाकोटिकिरीटोज्ज्वलविग्रहम् ॥ मन्दमारुतसंक्षोभचलिताम्बरसञ्चयम् ॥ ४ ॥ रुचिरौष्ठपुटन्यस्तवंशीमधुरनिःस्वनैः लसद्गो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पालिकाचेतो मोहयन्तं पुनः पुनः ॥ ५ ॥ वल्लवी-
वदनाम्भोजमधुपानमधुव्रतम् । क्षोभयन्तं मन-
स्तासां सस्मेरापाङ्गवीक्षणैः ॥ ६ ॥ यौवनोद्भिन्न-
देहाभिः संसक्ताभिः परस्परम् ॥ विचित्राम्बरभूषा-
भिर्गोपनारीभिरावृतम् ॥ ७ ॥ प्रभिन्नाञ्जनकालि-
न्दीजलकेलिकलोत्सुकम् ॥ योधयन्तं क्वचिद्गोपान्
व्याहरन्तं गवां गणम् ॥ ८ ॥ कालिन्दीजलसंस-
र्गिशीतलानिलसेविते ॥ कदम्बपादपच्छाये स्थितं
वृन्दावने क्वचित् ॥ ६ ॥ रत्न धरसंलग्नरत्नासन-
परिग्रहम् ॥ कल्पपादपमध्यस्थहेममण्डपिकागतम्
॥ १० ॥ वसन्तकुसुमामोदसुरभीकृतदिङ्मुखे ॥
गोवर्धनगिरौ रम्ये स्थितं रासरसोत्सुकम् ॥ ११ ॥
सव्यहस्ततलन्यस्तगिरिवर्यातपत्रकम् ॥ खण्डिता-
खण्डलोन्मुक्तमुक्तासारघनाघनम् ॥ १२ ॥ वेणु-
वाद्यमहोल्लासकृतहुङ्कारनिःस्वनैः ॥ सवत्सैरुन्मुखैः
शश्वद्गोकुलैरभिवीक्षितम् ॥ १३ ॥ कृष्णमेवानु-
गायद्भिस्तच्चेष्टावशवर्तिभिः ॥ दण्डपाशोद्यतकरै-
र्गोपालैरुपशोभितम् ॥ १४ ॥ नारदाद्यैर्मुनिश्रेष्ठैर्वेद-
वेदाङ्गपारगैः ॥ प्रीतिसुस्निग्धया वाचा स्तूयमानं
परात्परम् ॥ १५ ॥ य एनं चिन्तयेद्देवं भक्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्तौति मानवः ॥ त्रिसन्ध्यं तस्य तुष्टोऽसौ ददाति वरमीप्सितम् ॥ १६ ॥ राजवल्लभतामेति भवेत्सर्वजनप्रियः ॥ अचलां श्रियमाप्नोति स वाग्मी जायते ध्रुवम् ॥ १७ ॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे
गोपालस्त्रोत्र सम्पूर्णम् ॥ १८ ॥

११७ गोपालविंशतिस्तोत्रम् ।

श्रीगणेशाय नमः ॥ श्रीमान्वेङ्कटनाथार्यः कवितार्किककेशरी ॥ वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥ १ ॥ वन्दे बृन्दावनचरं बल्लवीजनवल्लभम् ॥ जयन्तीसम्भवं धाम वैजयन्तीविभूषणम् ॥ २ ॥ वाचं निजाङ्करसिकां प्रसमीक्षमाणो वक्त्रारविन्दविनिवेशितपाञ्चजन्यः ॥ वर्णत्रिकोणरुचिरे वरपुण्डरीके बद्धासनो जयति बल्लवचक्रवर्ती ॥३॥ आम्नायगन्धरुचिरस्फुरिताधरोष्ठमस्राविलेक्षणमनुक्षणमन्दहासम् ॥ गोपालडिम्भवपुषं कुहनाजनन्याः प्राणस्तनन्धयमवैमि परं पुमांसम् ॥ ४ ॥ आविर्भवत्यनिभृताभरणं पुरस्तादाकुञ्चितैकचरणं निहि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तान्यपादम् ॥ राधानिबद्ध मुकुरेण निबद्धतालं नाथस्य नन्दभवने नवनीतनाट्यम् ॥ ५ ॥ कुन्द-प्रसूनविशदैर्दशनैश्चतुर्भिः सन्दश्य मातुरनिशं कुचचूचुकाग्रम् ॥ नन्दस्य वक्त्रमवलोकयतो मुरारेर्मन्द-स्मितं मम मनीषितमातनोतु ॥ ६ ॥ हर्तुं कुम्भे विनिहितकरः स्वादु हैयङ्गवीनं दृष्ट्वा दामग्रहण-चटुलां मातरं जातरोषाम् ॥ पायादीषत्प्रचलितपदो नापगच्छन्न तिष्ठन्मिथ्यागोपः सपदि नयने मील-यन् विश्वगोप्ता ॥ ७ ॥ व्रजयोषिदपाङ्गवेदनीयं मथुराभाग्यमनन्यभोग्यमीडे ॥ वसुदेववधूस्तन-न्धयं तत्किमपि ब्रह्म किशोरभावदृश्यम् ॥ ८ ॥ परिवर्तितकन्धरं भयेन स्मितफुल्लाधरपल्लवं स्मरामि ॥ विटपित्वनिरासकं कयोश्चिद्विपुलोलूखल-कर्षकं कुमारम् ॥ ९ ॥ निकटेषु निशामयामि नित्यं निगमान्तैरधुनापि मृग्यमाणम् ॥ यमलार्जुनदृष्ट-बालकेलिं यमुनासाक्षिकयौवतं युवानम् ॥ १० ॥ पदवीमदवीयसीं विमुक्तेरटवीसम्पदमम्बुवाह-यन्तीम् ॥ अरुणाधरसाभिलाषवंशां करुणां कारण-मानुषं भजामि ॥ ११ ॥ अनिमेषनिषेवणीयमक्ष्णो-रजहद्यौवनमाविरस्तु चित्ते ॥ कलहाहितकुन्तलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कलापैः करुणोन्मादकविभ्रहं मनो मे ॥ १२ ॥ अनुयायिमनोज्ञवंशनालैरवतु स्पर्शितवल्लवीविमोघैः ॥ अनघस्मितशीतलैरसौ मामनुकम्पासदिम्बुजैरपाङ्गैः ॥ १३ ॥ अधराहितचारुवंशनाला मुकुटालम्बिमयूरपिच्छमालाः ॥ हरिनीलशिलाविहङ्गलीलाः प्रतिभास्वन्तु ममान्तिमप्रयाणे ॥ १४ ॥ अखिलानवलोकयामि कालान्महिलादीनभुजान्तरस्य'यूनः ॥ अभिलाषपदं व्रजाङ्गनानामभिलाषक्रमदूरमाभिरूप्यम् ॥ १५ ॥ महसे मह्निताय मौलिना विनतेनाञ्जलिमञ्जनत्विषे ॥ कलयामि विदग्धवल्लवीवलयाभाषितमञ्जुवेणवे ॥ १६ ॥ जयतु ललितकृत्यं शिक्षको वल्लवीनां शिथिलवलयसिञ्जाशीतलैर्हस्ततालैः ॥ अखिलभुवनरक्षागोपवेषस्य विष्णोरधरमणिसुधाया वंशवान् वंशनालः ॥ १७ ॥ चित्राकल्पश्रवसि कलयंल्लाङ्गलीकर्णपूरं बर्होत्तंसस्फुरितचिकुरो बन्धुजीवं दधानः ॥ गुञ्जां बद्धामुरसि ललितां धारयन् हारयष्टिं गोपस्त्रीणां जयति कितवः कोऽपि कौमारहारी ॥ १८ ॥ लीलायष्टिं करकिसलये दक्षिणे न्यस्य धन्यामंसे देव्याः पुलनिबिडे सन्निविष्टान्यबाहुः ॥ मेघश्यामो जयति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ललितं मेखलादत्तवेणुं गुञ्जापीडस्फुरितचिकुरो गोपकन्याभुजङ्गः ॥ १९ ॥ प्रत्यालीढस्मृतिमधिगतां प्राप्तगाढाङ्गलीलां पश्चादीषन्मिलितनयनां प्रेयसीं प्रेक्षमाणः ॥ भस्त्रायन्त्रप्रणिहितकरो भक्तजीवातुरव्याद्वारिक्रीडानिबिडवसनो बल्लवीवल्लभो नः ॥ २० ॥ वासो हृत्वा दिनकरसुतासन्निधौ बल्लवीनां लीलास्मेरो जयति ललितामास्थितः कुन्दशाखाम् ॥ सव्रीडाभिस्तदनु वसनं ताभिरभ्यर्थ्यमानः कामी कश्चित्करकमलयारञ्जलिं याचमानः ॥ २१ ॥ इत्यनन्यमनसा विनिर्मितां वेङ्कटेशकविना स्तुतिं पठन् ॥ दिव्यवेणुरसिकैः समीक्ष्यते दैवतं किमपि यौवतप्रियम् ॥ २२ ॥

इति गोपालविंशतिस्तोत्रं सम्पूर्णम् ॥ ६ ॥

--:--:--

११८ गोपालहृदयस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ॐ अस्य श्रीगोपालहृदयस्तोत्रमन्त्रस्य । श्रीभगवान् सङ्कर्षण ऋषिः । गायत्रीच्छन्दः । ॐ बीजम् । लक्ष्मीः शक्तिः । श्रीगोपालः परमात्मा देवता । प्रद्युम्नः कीलकम् । मनोवाका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यजनितसर्वपापक्षयाय श्रीगोपालप्रीत्यर्थे गोपाल-
हृदयस्तोत्रजपे विनियोगः ॥ श्रीसङ्कर्षण उवाच ॥
ॐ ममाग्रतः सदा विष्णुः पृष्ठतश्चापि केशवः ॥
गोविन्दो दक्षिणे पार्श्वे वामे च मधुसूदनः ॥ १ ॥
उपरिष्टात्तु वैकुण्ठो वराहः पृथिवीतले ॥ अवा-
न्तरदिशो पातु तासु सर्वासु माधवः ॥ २ ॥ गच्छ-
तस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा ॥ नरसिंह-
कृताद्गुप्तिर्वासुदेवमयो ह्ययम् ॥ ३ ॥ अव्यक्त-
मेवास्य योनिं वदन्ति व्यक्तं देहं दीर्घमायुर्गतिश्च ॥
वह्निर्वक्त्रं चन्द्रसूर्यौ च नेत्रे दिशः श्रोत्रे घ्राणमा-
युश्च वायुम् ॥ ४ ॥ वाचं वेदा हृदयं वै नभश्च
पृथ्वी पादौ तारका रोमकूपाः ॥ अङ्गान्युपाङ्गा-
न्यधिदेवता च विद्यादुपस्थं हि तथा समुद्रम् ॥ ५ ॥
तं देवदेवं शरणं प्रजानां यज्ञात्मकं सर्वलोकप्रति-
ष्ठम् ॥ अजं वरेण्यं वरदं वरिष्ठं ब्रह्माणमीशं पुरुषं
नमस्ते ॥ ६ ॥ आद्यं पुरुषमीशानं पुरुहूतं पुर-
स्कृतम् ॥ ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम्
॥ ७ ॥ महाभारतमाख्यानं कुरुक्षेत्रं सरस्वतीम् ॥
केशवं गां च गङ्गां च कीर्तयन्मां प्रसीदति ॥ ८ ॥
ॐ भूः पुरुषाय पुरुषरूपाय वासुदेवाय नमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमः॥ ॐ भुवः पु० वा। ॐ स्व० पु० वा०। ॐ महः पु०। ॐ जनः पु० ॐ तपः पु०। ॐ सत्यं पु०। ॐ भूर्भुवः स्वः पु०। ॐ वासुदेवाय पु०। ॐ सङ्कर्षणाय पु०। ॐ प्रद्युम्नाय पु०। ॐ अनिरुद्धाय पु०। ॐ हयग्रीवाय पु०। ॐ भवोद्भवाय पु०। ॐ केशवाय पु०। ॐ नारायणाय पु०। ॐ माधवाय पु०। ॐ गोविन्दाय पु०। ॐ विष्णवे पु०। ॐ मधुसूदनाय पु०। ॐ वैकुण्ठाय पु०। ॐ अच्युताय पु०। ॐ त्रिविक्रमाय पु०। ॐ वामनाय पु०। ॐ श्रीधराय पु०। ॐ हृषीकेशाय पु०। ॐ पद्मनाभाय पु०। ॐ मुकुन्दाय पु०। ॐ दामोदराय पु०। ॐ सत्याय पु०। ॐ ईशानाय पु०। ॐ तत्पुरुषाय पु०। ॐ पुरुषोत्तमाय पु०। ॐ श्रीरामचन्द्राय पु०। ॐ श्रीनृसिंहाय पु०। ॐ अनन्ताय पु०। ॐ विश्वरूपाय पु०। ॐ प्रणवेन्दुवह्निरविसहस्रनेत्राय पु०। य इदं गोपालहृदयमधीते स ब्रह्महत्यायाः पूतो भवति॥ सुरापानात् स्वर्णस्तेयात् वृषलीगमनात् पतितसम्भाषणात् असत्यात् अगम्यागमनात् अपेयपानात् अभक्ष्यभक्षणाच्च पूतो भवति॥ अब्रह्मचारी ब्रह्मचारी भवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भगवान्महाविष्णुरित्याह ॥ ॐ शान्तिः ॥ ॐ शान्तिः ॥ ॐ शान्तिः ॥

इति श्रीगोपालहृदयस्तोत्रं सम्पूर्णम् ॥ १० ॥

---

११९ गोपालस्तुतिः ।

श्रीगणेशाय नमः ॥ ॐ नमो विश्वरूपाय विश्वस्थित्यन्तहेतवे ॥ विश्वेश्वराय विश्वाय गोविन्दाय नमो नमः ॥ १ ॥ नमो विज्ञानरूपाय परमानन्दरूपिणे ॥ कृष्णाय गोपनाथाय गोविन्दाय नमो नमः ॥ २ ॥ नमः कमलनेत्राय नमः कमलमालिने नमः कमलनाभाय कमलापतये नमः ॥३॥ बर्हापीडाभिरामाय रामायाकुण्ठमेधसे ॥ रमामानसहंसाय गोविन्दाय नमो नमः ॥४॥ कंसवंशविनाशाय केशिचाणूरघातिने ॥ कालिन्दीकूललीलाय लोलकुण्डलधारिणे ॥ ५ ॥ वृषभध्वजवन्द्याय पार्थसारथये नमः ॥ वेणुवादनशीलाय गोपालायाहिमर्दिने ॥६॥ बल्लवीवदनाम्भोजमालिने नृत्यशालिने ॥ नमः प्रणतपालाय श्रीकृष्णाय नमो नमः ॥ ७ ॥ नमः पापप्रणाशाय गोवर्धनधराय च ॥ पूतनाजीवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तान्ताय तृणावर्तासुहारिणे ॥८॥ निष्कलाय विमोहाय शुद्धायाशुद्धवैरिणे ॥ अद्वितीयाय महते श्रीकृष्णाय नमो नमः ॥ ९ ॥ प्रसीद परमानन्द प्रसीद परमेश्वर ॥ आधिव्याधिभुजङ्गेन दष्टं मामुद्धर प्रभो ॥ १० ॥ श्रीकृष्ण रुक्मिणीकान्त गोपीजनमनोहर ॥ संसारसागरे मग्नं मामुद्धर जगद्गुरो ॥ ११ ॥ केशव क्लेशहरण नारायण जनार्दन ॥ गोविन्द परमानन्द मां समुद्धर माधव ॥ १२ ॥

इत्यथर्वणे गोपालतापिन्युपनिषदन्तर्गतगोपालस्तोत्रं सम्पूर्णम् ॥ ११ ॥

१२० गोपालस्तुतिः ।

श्रीगणेशाय नमः ॥ गोधूलिधूसरतनो करुणैकपात्र नारायणाभयद गोपजनाभिराम ॥ गोगोपिकानयनरञ्जन वंशपाणे वेदान्तवेद्य मम देहि करावलम्बम् ॥ १ ॥ आभीरदारमुखपङ्कजसौरभोत्थमाध्वीसुधादनपटो नवनीतचौर ॥ गोपाङ्गनांगपरिरम्भणजातहासं वेदान्त० ॥ २ ॥ गोवर्द्धनोद्धरणखेदभवोदविन्दुसंसिक्तसुन्दरमुखाब्जदयार्द्रदृष्टे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ लावण्यधाम सुरवन्दितपादपद्म वेदान्त० ॥३॥ सूर्यात्मजातटसमुद्भवनीपवृक्षशाखाधिरोहजनित- द्विगुणाङ्ककान्ते ॥ वंशीरवेण धवलोतिकृताभिशब्द वेदान्त० ॥ ४ ॥ सव्येन पाणिकमलेन विधाय भक्ष्यमास्वादयन्तमपरेण विलोलनेत्र ॥ त्वां देवताश्च मुनयः प्रविलोकयन्ति वेदान्त० ॥ ५ ॥ लक्ष्मीपते तरुणवारिजपद्मनेत्र पीताम्बरार्जुनसख स्मरसुन्द- राङ्ग ॥ नारायणाच्युत जनार्दन चक्रपाणे वेदान्त० ॥ ६ ॥ ब्रह्मेन्द्ररुद्रमरुदश्विसहस्ररश्मिनाराधिपान्तक कुबेर विशालवक्षः ॥ मारीचकश्यपसनातनवन्दि- तांघ्रे वेदान्त० ॥ ७ ॥ नमः पद्मनाभारविन्दाक्ष विष्णो नमस्ते हृषीकेश जिष्णो नमस्ते ॥ नमो वासुदेवाखिलाधारभूमन्नमस्ते सुराधीश ते विश्व- रूप ॥८॥ नमः कैटभारे मुरारे खरारे नमो दानवारे नमो रावणारे ॥ नमः कंसविध्वंसनारिष्टशत्रो नमो धेनुकारे नमः पूतनारे ॥ ९ ॥ नमः शङ्खपाणे नमश्चक्रपाणे नमः शार्ङ्गपाणे नमः पद्मपाणे ॥ नमो वेदरूपाय तुभ्यं पराय नमो यज्ञभोक्त्रे नमस्तेऽगुणाय ॥१०॥ अजो रुद्रधातादिदेवाः स्वरूपं परं नाभिजा- नन्ति मायामयेशम्॥ जपन्तीह नित्यं ततः स्थूलरूप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसीदाशु मे दीनबन्धो रमेश ॥ ११ ॥ संसारपाश-दृढबन्धनिपीडितस्य मोहान्धकारमयकूपनिपातितस्य ॥ कामाभिलाषविविधोरगदंशितस्य दीनस्य मे कुरु दयां करुणैकपात्र ॥ १२ ॥ आर्तो मत्सदृशो नान्यस्त्वत्तो नान्यः कृपाकरः ॥ अनन्यगतिकं नाथ कथं मां समुपेक्षसे ॥ १३ ॥ आकर्णयाशु कृपणस्य कृपावचांसि लब्धोऽसि नाथ बहुभिः किल जन्मसंघैः ॥ अद्य प्रभो यदि दयां कुरुषे न मे त्वं त्वत्तः परं कथय कं शरणं श्रयामि ॥ १४ ॥ श्रीयादवेन्द्र करुणार्णव विश्वरूप लक्ष्मीनिवास सुरवन्दितपादपद्म ॥ त्वामागतोऽस्मि शरणं सकलत्रपुत्रो यद्रोचते भगवते कुरु तन्नमस्ते ॥ १५ ॥

इति श्रीगोपालस्तुतिः सम्पूर्णा ॥ १२ ॥

—❀—❀—

१२१ श्रीगोपालाक्षयकवचनम् ।

श्रीगणेशाय नमः ॥ श्रीनारद उवाच ॥ इन्द्राद्यमरवर्गेसु ब्रह्मन्यत्परमाद्भुतम् ॥ अक्षयं कवचं नाम कथयस्व मयि प्रभो ॥ १ ॥ यद्धृत्वाऽऽकर्ण्य वीरस्तु त्रैलोक्यविजयी भवेत् ॥ ब्रह्मोवाच ॥ शृणु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुत्र मुनिश्रेष्ठ कवचं परमाद्भुतम् ॥ २ ॥ इन्द्रादि-देववृन्दैश्च नारायणमखाच्छ्रुतम् ॥ त्रैलोक्यविजय-स्यास्य कवचस्य प्रजापतिः ॥ ३ ॥ ऋषिश्छन्दो देवता च सदा नारायणः प्रभुः ॥ अस्य श्रीत्रैलोक्य-विजयाक्षयकवचस्य प्रजापतिऋषिः ॥ अनुष्टुप् छन्दः ॥ श्रीनारायणः परमात्मा देवता ॥ धर्मार्थ-काममोक्षार्थे जपे विनियोगः ॥ पादौ रक्षतु गोविन्द जंघे पातु जगत्प्रभुः ॥४॥ ऊरू द्वौ केशवः पातु कटी दामोदरस्ततः ॥ वदनं श्रीहरिः पातु नाडीदेशं च मेऽच्युतः ॥ ५ ॥ वामपार्श्वे तथा विष्णुर्दक्षिणं च सुदर्शनः ॥ बाहुमूले वासुदेवो हृदयं च जनार्दनः ॥ ६ ॥ कण्ठं पातु वराहश्च कृष्णश्च मुखमण्डलम् ॥ कर्णौ मे माधवः पातु हृषीकेशश्च नासिके ॥ ७ ॥ नेत्रं नारायणः पातु ललाटं गरुडध्वजः ॥ कपोलं केशवः पातु चक्रपाणिः शिरस्तथा ॥ ८ ॥ प्रभाते माधवः पातु मध्याह्ने मधुसूदनः ॥ दिनान्ते दैत्यनाशश्च रात्रौ रक्षतु चन्द्रमाः ॥ ९ ॥ पूर्वस्यां पुण्डरीकाक्षो वायव्यां च जनार्दनः ॥ इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम् ॥ १० ॥ तव स्नेहान्मयाऽऽख्यातं न वक्तव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तु कस्यचित् ॥ कवचं धारयेद्यस्तु साधको दक्षिणे भुजे ॥ ११ ॥ देवा मनुष्या गन्धर्वा यक्षास्तस्य न संशयः ॥ योषिद्वामभुजे चैव पुरुषो दक्षिणे भुजे ॥१२॥ विभृयात्कवचं पुण्यं सर्वसिद्धियुतो भवेत् ॥ कण्ठे यो धारयेदेतत् कवचं मत्स्वरूपिणम् ॥ १३ ॥ युद्धे जयमवाप्नोति द्यूते वादे च साधकः ॥ सर्वथा जयमाप्नोति निश्चितं जन्मजन्मनि ॥ १४ ॥ अपुत्रो लभते पुत्रं रोगनाशस्तथा भवेत् ॥ सर्वपापप्रमुक्तश्च विष्णुलोकं स गच्छति ॥ १५ ॥

इति श्रीब्रह्मसंहितायां देवदुर्लभं नाम गोपालाक्षयकवचं सम्पूर्णम् ॥ १३ ॥

---

१२२ श्रीगोपालकवचम् ।

श्रीगणेशाय नमः ॥ श्रीमहादेव उवाच ॥ अथ वक्ष्यामि कवचं गोपालस्य जगद्गुरोः ॥ अस्य स्मरणमात्रेण जीवन्मुक्तो भवेन्नरः ॥ १ ॥ शृणु देवि प्रवक्ष्यामि सावधानाऽवधारय ॥ नारदोऽस्य ऋषिर्देवि छन्दोऽनुष्टुबुदाहृतम् ॥ २ ॥ देवता बाल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृष्णश्च चतुर्वर्गप्रदायकः ॥ ॐ अस्य श्रीगोपाल-कवचस्य नारद ऋषिः ॥ अनुष्टुप्छन्दः ॥ श्रीबाल-कृष्णो देवता ॥ धर्मार्थकाममोक्षार्थे जपे विनि-योगः ॥ शिरो मे बालकृष्णश्च पातु नित्यं मम श्रुती ॥ ३ ॥ नारायणः पातु कण्ठं गोपीवन्द्यः कपोल-कम् ॥ नासिके मधुहा पातु चक्षुषी नन्दनन्दनः ॥ ४ ॥ जनार्दनः पातु दन्तानधरं माधवस्तथा ॥ ऊर्ध्वोष्ठं पातु वाराहश्चिबुकं केशिसूदनः ॥ ५ ॥ हृदयं गोपिकानाथो नाभिं सेतुप्रदः सदा ॥ हस्तौ गोवर्द्धनधरः पादौ पीताम्बरोऽवतु ॥ ६ ॥ करा-ङ्गुलीः श्रीधरो मे पादाङ्गुल्यः कृपामयः ॥ लिङ्गं पातु गदापाणिर्बालक्रीडामनोरमः ॥ ७ ॥ जगन्नाथः पातु पूर्वं श्रीरामोऽवतु पश्चिमम् ॥ उत्तरं कैटभारिश्च दक्षिणं हनुमत्प्रभुः ॥ ८ ॥ आग्नेय्यां पातु गोविन्दो नैरृत्यां पातु केशवः ॥ वायव्यां पातु दैत्यारि-रैशान्यां गोपनन्दनः ॥ ९ ॥ ऊर्ध्वं पातु प्रलम्बा-रिधःकैटभमर्दनः ॥ शयानं पातु पूतात्मा गतौ पातुः श्रियः पतिः ॥ १० ॥ शेषः पातु निरालम्बे जाग्रद्भावे ह्युपाम्पतिः ॥ भोजने केशिहा पातु कृष्णः सर्वाङ्ग-सन्धिषु ॥ ११ ॥ गणनासु निशानाथो दिवानाथो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिनक्षये ॥ इति ते कथितं दिव्यं कवचं परमाद्भुतम् ॥ १२ ॥ यः पठेन्नित्यमेवेदं कवचं प्रयतो नरः ॥ तस्याशु विपदो देवि नश्यन्ति रिपुसंघतः ॥ १३ ॥ अंते गोपालचरणं प्राप्नोति परमेश्वरि ॥ त्रिसंध्यमेकसंध्यं वा यः पठेच्छृणुयादपि ॥ १४ ॥ तत्सर्वदो रमानाथः परिपाति चतुर्भुजः ॥ अज्ञात्वा कवचं देवि गोपालं पूजयेद्यदि ॥ १५ ॥ सर्वं तस्य वृथा देवि जपहोमार्चनादिकम् ॥ स शस्त्रघातं सम्प्राप्य मृत्युमेति न संशयः ॥ १६ ॥

इति श्रीनारदपञ्चरात्रे गोपालकवचं

समाप्तम् ॥ १४ ॥

—०:०—

१२३ गोपालशतनामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ देवदेव महादेव सर्ववाञ्छाप्रपूरकः ॥ पुरा प्रियं देवदेव कृष्णस्य परमाद्भुतम् ॥ १ ॥ नाम्नां शतं समासेन कथयामीति सूचितम् ॥ श्रीभगवानुवाच । शृणु प्राणप्रिये देवि गोपनादतिगोपितम् ॥ २ ॥ मम प्राणस्वरूपं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तव स्नेहात्प्रकाश्यते ॥ यस्यैकवारं पठनात्सर्वयज्ञफलं लभेत् ॥ ३ ॥ मोहनस्तम्भनाकर्षपठनाज्जायते नृणाम् ॥ स मुक्तः सर्वपापेभ्यो यस्य स्मरणमात्रतः ॥ ४ ॥ स्वयमायान्ति तस्यैव निश्चलाः सर्वसम्पदः ॥ राजानो दासतां यान्ति वह्नयो यान्ति शीतताम् ॥ ५ ॥ जलस्तम्भं रिपुस्तम्भं शत्रूणां वञ्चनं तथा ॥ ॐ अस्य श्रीगोपालशतनामस्तोत्रस्य नारद ऋषिः ॥ अनुष्टुप्छन्दः ॥ श्रीगोपालः परमात्मा देवता ॥ श्रीगोपालप्रीत्यर्थे शतनामपाठे विनियोगः ॥ ॐ गोपालो गोपतिर्गोप्ता गोविन्दो गोकुलप्रियः ॥ गम्भीरो गहनो गोपो प्राणभृत्प्राणधारकः ॥ ६ ॥ पतितानन्दनो नन्दी नन्दीशः कंससूदनः ॥ नारायणो नरत्राता नरकार्णवतारकः ॥ ७ ॥ नवगीतप्रियो नेता नवीनघनसुन्दरः ॥ नवबालकवात्सल्यो ललितानन्दतत्परः ॥ ८ ॥ पुरुषार्थप्रदः प्रेमप्रवीणः परमाकृतिः । करुणः करुणानाथः कैवल्यसुखदायकः ॥९॥ कदम्बकुसुमावेशी कदम्बवनमंदिरः ॥ कादम्बी विसदामोदघूर्णलोचनपङ्कजः॥१०॥ कामी कांतकलानंदी कांतः कामनिधिः कविः ॥ कौमोदकीगदापाणिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कवीन्द्रो गतिमान् हरः ॥ ११ ॥ कमलेशः कला-
नाथः कैवल्यः सुखसागरः ॥ केशवः केशिहा केशः
कलिकल्मषनाशनः ॥ १२ ॥ कृपालुः करुणासेवी
कृपोन्मीलितलोचनः ॥ स्वच्छन्दः सुन्दरः सुन्दः
सुरवृन्दनिषेवितः ॥ १३ ॥ सर्वज्ञः सर्वदो दाता
सर्वपापविनाशनः ॥ सर्वाह्लादकरः सर्वः सर्ववेद-
विदां प्रभुः ॥१४॥ वेदान्तवेद्यो वेदात्मा वेदप्राणकरो
विभुः ॥ विश्वात्मा विश्वविद्विश्वप्राणदो विश्व-
वन्दितः ॥ १५ ॥ विश्वेशः शमनत्राता विश्वेश्वर
सुखप्रदः ॥ विश्वदो विश्वहारी च पूरकः करुणा-
निधिः ॥ १६ ॥ धनेशो धनदो धन्वी धीरो धीर-
जनप्रियः ॥ धरासुखप्रदो धाता दुर्द्धरान्तकरो धरः
॥ १७ ॥ रमानाथो रमानन्दो रसज्ञो हृदयास्पदः ॥
रसिको रासदो रासी रासानन्दकरो रसः ॥ १८ ॥
राधिकाराधितो राधाप्राणेशः प्रेमसागरः ॥
नाम्नां शतं समासेन तव स्नेहात्प्रकाशितम्
॥ १९ ॥ अप्रकाश्यमिमं मन्त्रं गोपनीयं प्रय-
त्नतः ॥ यस्यैतस्यैकपठनात्सर्वविद्यानिधिर्भवेत्
॥ २० ॥ पूजयित्वा दयानाथं ततः स्तोत्रमुदी-
रयेत् ॥ पठनाद्देवदेवेशि भोगभुक्तफलं लभेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ २१ ॥ सर्वपापविविर्मुक्तः सर्वदेवाधिपो भवेत् ॥
जपलक्षेण सिद्धं स्यात्सत्यं सत्यं न संशयः ॥
किमुक्तेनैव बहुना विष्णुतुल्यो भवेन्नरः ॥
॥ २२ ॥

इति श्रीहरगौरीसंवादे श्रीगोपालशतनामस्तोत्रं सम्पूर्णम् ॥ १५ ॥

---

१२४ कृष्णाष्टोत्तरशतनामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीकृष्णाष्टोत्तरशतनामस्तोत्रमन्त्रस्य । श्रीशेष ऋषिः । अनुष्टुप् छन्दः । श्रीकृष्णो देवता । श्रीकृष्णाष्टोत्तरशतनामजपे विनियोगः ॥ शेष उवाच ॥ श्रीकृष्णः कमलानाथो वासुदेवः सनातनः ॥ वसुदेवात्मजः पुण्यो लीलामानुषविग्रहः ॥ १ ॥ श्रीवत्सकौस्तुभधरो यशोदावत्सलो हरिः ॥ चतुर्भुजात्तचक्रासिगदाशङ्खाम्बुजायुधः ॥ २ ॥ देवकीनन्दनः श्रीशो नन्दगोपप्रियात्मजः ॥ यमुनावेगसंहारी बलभद्रप्रियानुजः ॥ ३ ॥ पूतनाजीवितहरः शकटासुरभञ्जनः ॥ नन्दव्रजजनानन्दी सच्चिदानन्दविग्रहः ॥ ४ ॥ नवनीत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नवाहारी मुचुकुन्दप्रसादकः ॥ षोडशस्त्रीसहस्रेश-स्त्रिभङ्गी मधुराकृतिः ॥ ५ ॥ शुकवागमृताब्धीन्दु-र्गोविन्दो गोविदाम्पतिः ॥ वत्सपालनसञ्चारी धेनु-कासुरभञ्जनः ॥ ६ ॥ तृणीकृततृणावर्तो यमलार्जुन-भञ्जनः ॥ उत्तालतालभेत्ता च तमालश्यामलाकृतिः ॥ ७ ॥ गोपगोपीश्वरो योगी सूर्यकोटिसमप्रभः ॥ इलापतिः परञ्ज्योतिर्यादवेन्द्रो यदूद्वहः ॥ ८ ॥ वनमाली पीतवासाः पारिजातापहारकः ॥ गोव-र्धनाचलोद्धर्ता गोपालः सर्वपालकः ॥ ९ ॥ अजो निरञ्जनः कामजनकः कञ्जलोचनः ॥ मधुहा मथु-रानाथो द्वारकानायको बली ॥ १० ॥ वृन्दावना-न्तसञ्चारी तुलसीदामभूषणः ॥ स्यमन्तकमणेर्हर्त्ता नरनारायणात्मकः ॥ ११ ॥ कुब्जाकृष्णाम्बरधरो मायी परमपूरुषः ॥ मुष्टिकासुरचाणूरमहायुद्धवि-शारदः ॥ १२ ॥ संसारवैरी कंसारिर्मुरारिर्नरका-न्तकः ॥ अनादिर्ब्रह्मचारी च कृष्णाव्यसनकर्षकः ॥ १३ ॥ शिशुपालशिरश्छेत्ता दुर्योधनकुलान्तकृत् ॥ विदुराक्रूरवरदो विश्वरूपप्रदर्शकः ॥ १४ ॥ सत्य-वाक् सत्यसङ्कल्पः सत्यभामारतो जयी ॥ सुभद्रा-पूर्वजो विष्णुर्भीष्ममुक्तिप्रदायकः ॥ १५ ॥ जगद्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुरुर्जगन्नाथो वेणुवाद्यविशारदः ॥ वृषभासुरविध्वंसी बाणासुरबलान्तकृत् ॥ १६ ॥ युधिष्ठिरप्रतिष्ठाता बर्हिबर्हावतंसकः ॥ पार्थसारथिरव्यक्तो गीतामृतमहोदधिः ॥ १७ ॥ कालीयफणिमाणिक्यरञ्जितश्रीपदाम्बुजः ॥ दामोदरो यज्ञभोक्ता दानवेन्द्रविनाशनः ॥ १८ ॥ नारायणः परं ब्रह्म पन्नगाशनवाहनः ॥ जलक्रीडासमासक्तगोपीवस्त्रापहारकः ॥ १९ ॥ पुण्यश्लोकस्तीर्थकरो वेदवेद्यो दयानिधिः ॥ सर्वतीर्थात्मकः सर्वग्रहरूपी परात्परः ॥ २० ॥ इत्येवं कृष्णदेवस्य नाम्नामष्टोत्तरं शतम् ॥ कृष्णेन कृष्णभक्तेन श्रुत्वा गीतामृतं पुरा ॥ २१ ॥ स्तोत्रं कृष्णप्रियकरं कृतं तस्मान्मया पुरा ॥ कृष्णनामामृतं नाम परमानन्ददायकम् ॥ २२ ॥ अनुपद्रवदुःखघ्नं परमायुष्यवर्धनम् ॥ दानं श्रुतं तपस्तीर्थं यत्कृतं त्विह जन्मनि ॥ २३ ॥ पठतां शृण्वतां चैव कोटिकोटिगुणं भवेत् ॥ पुत्रप्रदमपुत्राणामगतीनां गतिप्रदम् ॥ २४ ॥ धनावहं दरिद्राणां जयेच्छूनां जयावहम् ॥ शिशूनां गोकुलानां च पुष्टिदं पुष्टिवर्धनम् ॥ २५ ॥ वातग्रहज्वरादीनां शमनं शान्तिमुक्तिदम् ॥ समस्तकामदं सद्यः कोटिजन्माघना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding IMIDF

शनम् ॥ २६ ॥ अन्ते कृष्णस्मरणदं भवतापभयापहम् ॥ कृष्णाय यादवेन्द्राय ज्ञानमुद्राय योगिने ॥ नाथाय रुक्मिणीशाय नमो वेदान्तवेदिने ॥ २७॥ इमं मन्त्रं महादेवि जपन्नेव दिवानिशम् ॥ सर्वग्रहानुग्रहभाक्सर्वप्रियतमो भवेत् ॥ २८ ॥ पुत्रपौत्रैः परिवृतः सर्वसिद्धिसमृद्धिमान् ॥ निर्विश्य भोगानन्तेऽपि कृष्णसायुज्यमाप्नुयात् ॥ २९ ॥

इति श्रीनारदपञ्चरात्रे श्रीकृष्णाष्टोत्तर शतनामस्तोत्रं सम्पूर्णम् ॥ १६ ॥

—❀—❀—

१२५ श्रीकृष्णद्वादशनामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ श्रीकृष्ण उवाच ॥ किं ते नाम सहस्रेण विज्ञातेन तवार्जुन ॥ तानि नामानि विज्ञाय नरः पापैः प्रमुच्यते ॥ १ ॥ प्रथमं तु हरिं विद्याद् द्वितीयं केशवं तथा ॥ तृतीयं पद्मनाभं च चतुर्थं वामनं स्मरेत् ॥ २ ॥ पञ्चमं वेदगर्भं तु षष्ठं च मधुसूदनम् ॥ सप्तमं वासुदेवं च वराहं चाष्टमं तथा ॥ ३ ॥ नवमं पुण्डरीकाक्षं दशमं तु जनार्दनम् ॥ कृष्णमेकादशं विद्याद्द्वादशं श्रीधरं तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ४ ॥ एतद्द्वादश नामानि विष्णुप्रोक्ते विधीयते ॥ सायं प्रातः पठेन्नित्यं तस्य पुण्यफलं शृणु ॥ ५ ॥ चान्द्रायणसहस्राणि कन्यादानशतानि च ॥ अश्वमेधसहस्राणि फलं प्राप्नोत्यसंशयम् ॥ ६ ॥ अमायां पौर्णमास्यां च द्वादश्यां तु विशेषतः ॥ प्रातःकाले पठेन्नित्यं सर्वपापैः प्रमुच्यते ॥ ७ ॥

इति श्रीमन्महाभारते अरण्यपर्वणि कृष्णद्वादशनामस्तोत्रं सम्पूर्णम् ॥ १७ ॥

—❀—❀—

१२६ श्रीकृष्णाष्टकम् (१)

श्रीगणेशाय नमः ॥ भजे व्रजस्य मण्डनं समस्तपापखण्डनं स्वभक्तचित्तरञ्जनं सदैव नन्दनन्दनम् ॥ सुपिच्छगुच्छमस्तकं सनादवेणुहस्तकं ह्यनङ्गरङ्गसागरं नमामि कृष्णनागरम् ॥ १ ॥ मनोजगर्वमोचनं विशाललोललोचनं विधूतगोपशोचनं नमामि पद्मलोचनम् ॥ करारविन्दभूधरं स्मितावलोकसुन्दरं महेन्द्रमानदारणं नमामि कृष्णवारणम् ॥ २ ॥ कदम्बसूनकुण्डलं सुचारुगण्डमण्डलं व्रजाङ्गनैकवल्लभं नमामि कृष्णदुर्लभम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यशोदया समीपया सगोपया सनन्दया युतं सुखैक-
दायकं नमामि गोपनायकम् ॥ ३ ॥ सदैव पाद-
पङ्कजं मदीयमानसे निजं दधानमुत्तमालकं नमामि
नन्दबालकम् ॥ समस्तदोषशोषणं समस्तलोकपोषणं
समस्तगोपमानसं नमामि कृष्णलालसम् ॥ ४ ॥
भुवो भरावतारकं भवाब्धिकर्णधारकं
यशोमतीकिशोरकं नमामि दुग्धचोर-
कम् ॥ दृगन्तकान्तभङ्गिनं सदा सदालसङ्गिनं दिने
दिने नवं नवं नमामि नन्दसम्भवम् ॥ ५ ॥ गुणा-
करं सुखाकरं कृपाकरं कृपावरं सुरद्विषन्निकन्दनं
नमामि गोपनन्दनम् ॥ नवीनगोपनागरं नवीन-
केलिलम्पटं नमामि मेघसुन्दरं तडित्प्रभालसत्प-
टम् ॥ ६ ॥ समस्तगोपनन्दनं हृदम्बुजैकमोहनं
नमामि कुञ्जमध्यगं प्रसन्नभानुशोभनम् ॥ निका-
मकामदायकं दृगन्तचारुसायकं रसालवेणुगायकं
नमामि कुञ्जनायकम् ॥ ७ ॥ विदग्धगोपिकामनो-
मनोज्ञतल्पशायिनं नमामि कुञ्जकानने प्रवृद्धवह्नि-
पायिनम् ॥ यदा तदा यथा तथा तथैव कृष्ण-
सत्कथा मया सदैव गीयतां तथा कृपा विधीय-
ताम् । प्रमाणिकाष्टकद्वयं जपत्यधीत्य यः पुमान्भ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेत्स नन्दनन्दने भवे भवे सुभक्तिमान् ॥ ८ ॥

इति श्रीमच्छङ्कराचार्यविरचितं श्रीकृष्णाष्टकं सम्पूर्णम् ॥ १८ ॥

—:-०-:—

१२७ श्रीकृष्णाष्टकम् (२) ।

श्रीगणेशाय नमः ॥ चतुर्मुखादिसंस्तुतं समस्तसात्वतानुतम् ॥ हलायुधादिसंयुतं नमामि राधिकाधिपम् ॥ १ ॥ बकादिदैत्यकालकं सगोपगोपिपालकम् ॥ मनोहरासितालकं नमामि० ॥ २ ॥ सुरेन्द्रगर्वगञ्जनं विरिञ्चिमोहभञ्जनम् ॥ व्रजाङ्गनानुरञ्जनं नमामि० ॥ ३ ॥ मयूरपिच्छमण्डनं गजेन्द्रदन्तखण्डनम् ॥ नृशंसकंसदंडनं नमामि० ॥ ४ ॥ प्रदत्तविप्रदारकं सुदामधामकारकम् ॥ सुरद्रुमापहारकं नमामि० ॥ ५ ॥ धनञ्जयाजयावहं महाचमूक्षयावहम् ॥ पितामहव्यथापहं नमामि० ॥ ६ ॥ मुनीन्द्रशापकारणं यदुप्रजापहारणम् ॥ धराभरावतारणं नमामि० ॥७॥ सुवृक्षमूलशायिनं मृगारिमोक्षदायिनम् ॥ स्वकीयधाममायिनं नमामि० ॥ ८ ॥ इदं समाहितो हितं वराष्टकं सदा मुदा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जपञ्जनो जनुर्जरार्दितो द्रुतं प्रमुच्यते ॥ ६ ॥

इति श्रीमद्ब्रह्मानन्दविरचितं श्रीकृष्णाष्टकं सम्पूर्णम् ॥१६॥

—:-o-:—

१२८ श्रीकृष्णाष्टकम् (३) ।

श्रीगणेशाय नमः ॥ श्रियाऽऽश्लिष्टो विष्णुः स्थिरचरगुरुर्वेदविषयो धियां साक्षी शुद्धो हरिरसुरहन्ताऽब्जनयनः ॥ गदी शङ्खी चक्री विमलवनमाली स्थिररुचिः शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ १ ॥ यतः सर्वं जातं वियदनिलमुख्यं जगदिदं स्थितौ निःशेषं योऽवति निजसुखांशेन मधुहा ॥ लये सर्वं स्वस्मिन् हरति कलया यस्तु स विभुः शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ २ ॥ असूनायम्यादौ यमनियममुख्यैः सुकरणैर्निरुध्येदं चित्तं हृदि विलयमानीय सकलम् ॥ यमीड्यं पश्यन्ति प्रवरमतयो मायिनमसौ शरण्यो लोकेशो मम० ॥ ३ ॥ पृथिव्यां तिष्ठन्यो यमयति महीं वेद न धरा यमित्यादौ वेदो वदति जगतामीशममलम् ॥ नियन्तारं ध्येयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुनिसुरनृणां मोक्षदमसौ शरण्यो लोकेशो मम० ॥ ४ ॥ महेन्द्रादिर्देवो जयति दितिजान्यस्य बलतो न कस्य स्वातन्त्र्यं क्वचिदपि कृतौ यत्कृतिमृते ॥ कवित्वादेर्गर्वं परिहरति योऽसौ विजयिनः शरण्यो लोकेशो मम० ॥ ५ ॥ विना यस्य ध्यानं व्रजति पशुतां सूकरमुखां विना यस्य ज्ञानं जनिमृतिभयं याति जनता ॥ विना यस्य स्मृत्या कृमिशतजनिं याति स विभुः शरण्यो लोकेशो मम० ॥ ६ ॥ निरातङ्कोत्तङ्कः शरणशरणो भ्रान्तिहरणो घनश्यामो वामो व्रजशिशुवयस्योऽर्जुनसखः ॥ स्वयम्भूर्भूतानां जनक उचिताचारसुखदः शरण्यो लोकेशो मम० ॥ ७ ॥ यदा धर्मग्लानिर्भवति जगतां क्षोभकरणी तदा लोकस्वामी प्रकटितवपुः सेतुधृगजः ॥ सतां धाता स्वच्छो निगमगुणगीतो व्रजपतिः शरण्यो लोकशो मम० ॥ ८ ॥ इति हरिरखिलात्माऽऽराधितः शङ्करेण श्रुति विशदगुणोऽसौ मातृमोक्षार्थमाद्यः ॥ यतिवरनिकटे श्रीयुक्त आविर्बभूव स्वगुणवृत उदारः शङ्खचक्राब्जहस्तः ॥ ९ ॥

इति श्रीमच्छङ्कराचार्यविरचितं श्रीकृष्णाष्टकं सम्पूर्णम् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२६ श्रीकृष्णाष्टकम् (४)।

श्रीगणेशाय नमः ॥ आनन्दलेशमनुगत्य भवन्ति यस्य ब्रह्मादयोऽपि सुखिनः सकला हि देवाः ॥ आनन्दसिन्धुमखिलं त्वनभूय वाक्यात्कृष्णं भजामि चितिरूपमजं तमेकम् ॥ १ ॥ अर्केन्दुवह्निवचने सततं प्रशान्ते सर्वो जनो व्यवहृतिं कुरुतेऽथ येन ॥ सुप्तो विलोपरहितं मनसि प्रलुप्ते कृष्णं० ॥ २ ॥ यं ज्योतिषां सुरगणा विदुरप्रमेयं दीपं मनोऽपि मनसो नयनस्य नेत्रम् ॥ श्रोत्रस्य यः श्रवणमेव भवेत्परात्मा कृष्णं भजामि० ॥ ३ ॥ यस्याप्रबोधवशतो निरयप्रवेशं मूढा व्रजन्ति बहुयोनिषु चापि दुःखम् ॥ बोधेन यस्य लभते न च दुःखगन्धं कृष्णं० ॥ ४ ॥ प्राणेन जीवति नरो नहि कश्चिदेव नापानतोऽपि सततं त्वितरेण येन ॥ सर्वोऽपि जीवति जनः श्रुतिसिद्धमीशं कृष्णं० ॥ ५ ॥ नेदिष्ठमेव विदुषामनुभूतिमानात् प्रत्यक्तया स्फुरणतो भुवनप्रकाशात् ॥ दूरात्सुदूरतमेव बर्हिमुखानां कृष्णं० ॥ ६ ॥ पद्मोद्भवं स्वतनयं प्रहिणोति वेदान् यो यस्य धावति भयेन च मृत्यु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रेषः ॥ अग्निर्भयेन तपति द्युमणिश्च यस्य कृष्णं० ॥ ७ ॥ यो वै निवेद्यमखिलं न च वेदितान्यो यस्यास्ति कश्चिदपि वेदविदो वदन्ति कृष्णं० ॥ ८ ॥ बोधादिमं पठति योऽमलधीः सदैव भक्त्या स्तवं सुखतमे प्रणिधाय चित्तम् ॥ कृष्णो वरे विमलबोधघने प्रशान्ते बन्धं विधूय पुरुषो विशते स कृष्णम् ॥ ९ ॥

इति श्रीमदुदासीनात्मरूपेण विरचितं श्रीकृष्णाष्टकं सम्पूर्णम् ॥ २१ ॥

—:o:—

१३० बिन्दुमाधवाष्टकम् ।

श्रीगणेशाय नमः ॥ कलिन्दजाततटाटवीलता-निकेतनान्तरप्रगल्भबल्लविस्फुरद्रतिप्रसङ्गसङ्गतम् ॥ सुधारसार्द्रवेणुनादमोदमाधुरीमदप्रमत्तगोपगोत्रजं भजामि बिन्दुमाधवम् ॥ १ ॥ गदारिशङ्खचक्र-शार्ङ्गभृच्चतुष्करं कृपाकटाक्षवीक्षणामृतोच्चितामरेन्द्र-नन्दनम् ॥ सनन्दनादिमौनिमानसारविन्द-मन्दिरं जगत्पवित्रकीर्तिदं भजामि० ॥ २ ॥ दिगी-शमौलिरत्नरत्निःसरत्प्रभावलीविराजिताङ्घ्रिपङ्कजं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नतेन्दुशेखराब्जजम् ।। दयामरन्दतुन्दिलारविन्द-
पत्रलोचनं विरोधियूथभेदनं भजामि० ।। ३ ।।
पयःपयोधिवीचिकावलीपयःपृषन्मिलद्भुजङ्गपुङ्गवा-
ङ्कतल्पपुष्पतल्पशायिनम् ।। कटीतटिस्फुटीभव-
त्प्रतप्तहाटकाम्बरं निशाटकोटिपाटनं भजा०
।। ४ ।। अनुश्रवापहारकावलेपलोपनैपुणीपयश्चरा-
वतारतोषितारविन्दसम्भवम् । महाभवाब्धि-
मध्यमग्नदीनलोकतारकं विहङ्गराट्तुरङ्गमं भजा०
।। ५ ।। समुद्रतोयमध्यदेवदानवोत्क्षिप्तधराधरेन्द्र-
मूलधारणक्षमादिकूर्मविग्रहम् ।। दुराग्रहावलिप्त-
हाटकाक्षनाशशूकरं हिरण्यदानवान्तकं भजा०
।। ६ ।। विरोचनात्मसम्भवोत्तमाङ्गकृत्पदक्रमं पर-
श्वधोपसंहृताखिलावनीशमण्डलम् ।। कठोरनी-
लकण्ठकार्मुकप्रदर्शितादिदोर्बलान्वितक्षितीसुतं
भजा० ।। ७ ।। यमानुजोदकप्रवाहसत्वराभिजि
त्वरं पुरा सुराङ्गनाभिमानभञ्जितोपनायकम् ।।
स्वमण्डलाग्रखण्डनीययावनारिमण्डलं बलानुजं
गदाग्रजं भजा० ।। ८ ।। प्रशस्तपञ्चचामराख्यवृत्त-
भेदभासितं दशावतारवर्णनं नृसिंहभक्तवर्णितम् ।।
प्रसिद्धबिन्दुमाधवाष्टकं पठन्ति ये नराः सुदुर्लभं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भजन्ति ते मनोरथं निरन्तम् ॥ ६ ॥

इति श्रीबिन्दुमाधवाष्टकं सम्पूर्णम् ॥ २२ ॥

—:—:—

१३१ जगन्नाथाष्टकम् ।

श्रीगणेशाय नमः । कदाचित्कालिन्दीतटविपिनसङ्गीतकरवो मुदाभीरीनारीवदनकमलास्वादमधुपः ॥ रमाशम्भुब्रह्मामरपतिगणेशार्चितपदो जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ १ ॥ भुजे सव्ये वेणुं शिरसि शिखिपिच्छं कटितटे दुकूलं नेत्रान्ते सहचरकटाक्षं विदधते ॥ सदा श्रीमद्वृन्दावनवसतिलीलापरिचयो जग० ॥ २ ॥ महाम्भोधेस्तीरे कनकरुचिरे नीलशिखरे वसन् प्रसादान्तः सहजबलभद्रेण बलिना ॥ सुभद्रामध्यस्थः सकलसुरसेवावसरदो जग० ॥ ३ ॥ कथापारावारः सजलजलदश्रेणिरुचिरो रमावाणीरामस्फुरदमलपद्मेक्षणमुखैः ॥ सुरेन्द्रैराराध्यः श्रुतिगणशिखागीतचरितो जग० ॥ ४ ॥ रथारूढो गच्छन्पथि मिलितभूदेवपटलैः स्तुतिप्रादुर्भावं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिपदमुपाकर्ण्य सदयः ॥ दयासिन्धुर्बन्धुः सकलजगतां सिन्धुसुतया जग० ॥ ५ ॥ परब्रह्मापीडः कुवलयदलोत्फुल्लनयनो निवासी नीलाद्रौ निहितचरणोऽनन्तशिरसि ॥ रसानन्दो राधासरसवपुरालिङ्गनसुखो जग० ॥ ६ ॥ न वै प्रार्थ्यं राज्यं न च कनकतां भोगविभवं न याचेऽहं रम्यां निखिलजनकाम्यां वरवधूम् ॥ सदा काले काले प्रमथपतिना गीतचरितो जग० ॥ ७ ॥ हर त्वं संसारं द्रुततरमसारं सुरपते हर त्वं पापानां विततिमपरां यादवपते ॥ अहो दीनानाथं निहितमचलं निश्चितपदं जगन्नाथः० ॥ ८ ॥

इति श्रीजगन्नाथाष्टकं सम्पूर्णम् ॥ २३ ॥

---

१३२ गोविन्दाष्टकम् ।

श्रीगणेशाय नमः ॥ चिदानन्दाकारं श्रुतिसरससारं समरसं निराधाराधारं भवजलधिपारं परगुणम् ॥ रमाग्रीवाहारं व्रजवनविहारं हरनुतं सदा त गोविन्दं परमसुखकन्दं भजत रे ॥ १ ॥ महाम्भोधिस्थानं स्थिरचरनिदानं दिविजपं सुधाधारा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पानं विहगप्रतियानं यमरतम् ॥ मनोज्ञं सुज्ञानं मुनिजननिधानं ध्रुवपदं सदा० ॥ २ ॥ धिया धीरैर्ध्येयं श्रवणपुटमेयं यतिवरैर्महावाक्यैर्ज्ञेयं त्रिभुवनविधेयं विधिपरम् ॥ मनोमानामेयं सपदि हृदि नेयं नवतनुं सदा० ॥ ३ ॥ महामायाजालं विमलवनमालं मलहरं, सुभालं गोपालं निहतशिशुपालं शशिमुखम् ॥ कलातीतं कान्तं गतिहयमराल मुररिपुं सदा० ॥ ४ ॥ नसोबिम्बस्फीतं निगमगुणगीतं समगतिं सुरौघे सम्प्रीतं दितिजविपरीतं पुरिशयम् ॥ गिरां पन्थातीतं स्वदितनवनीतं नयकरं सदा० ॥५॥ परेशं पद्मेशं शिवकमलजेशं शिवकरं द्विजेशं देवेशं तनुकुटिलकेशं कलिहरम् ॥ खगेशं विश्वेशं निखिलभुवनेशं जगधरं सदा० ॥ ६ ॥ रमाकान्तं कान्तं भवभयभयान्तं भवसखं दुराशान्तं शान्तं निखिलहृदि भान्तं भुवनपम् ॥ विना दान्तं दान्तं दनुजनिचयान्तं सुचरितं सदा० ॥७॥ जगज्ज्येष्ठं श्रेष्ठं सुरपतिकनिष्ठं क्रतुपतिं बलिष्ठं भूयिष्ठं त्रिभुवनवरिष्ठं वरवहम् ॥ स्वनिष्ठं धर्मिष्ठं गुरुगणगरिष्ठं गुरुवरं सदा० ॥ ८ ॥ गदापाणेरेतद्दुरितदलनं दुःखशमनं विशुद्धात्मा स्तोत्रं पठति मनुजो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्तु सततम् ॥ स भुक्त्वा भोगौघं चिरमिह ततोऽपास्तवृजिनो वरं विष्णोः स्थानं व्रजति खलु वैकुण्ठभुवनम् ॥ ६ ॥

इति श्रीमत्परमहंसब्रह्मानन्दविरचितं श्रीगोविन्दाष्टकं सम्पूर्णम् ॥ ३४.॥

---

१३३ श्रीगोविन्दाष्टकम् ।

श्रीगणेशाय नमः ॥ सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशं गोष्ठप्राङ्गणरिङ्गणलोलमनायासं परमायासम ॥ मायाकल्पितनानाकारमनाकारं भुवनाकारं क्ष्मामानाथमनाथं प्रणमत गोविन्दं परमानन्दम् ॥ १ ॥ मृत्स्नामत्सीहेति यशोदाताडनशैशवसन्त्रासं व्यादितवक्त्रालोकितलोकालोकचतुर्दशलोकालम् ॥ लोकत्रयपुरमूलस्तम्भं लोकालोकमनालोकं लोकेशं परमेशं प्रण० ॥ २ ॥ त्रैविष्टपरिपुवीरघ्नं क्षितिभारघ्नं भवरोगघ्नं कैवल्यं नवनीताहारमनाहारं भुवनाहारम् ॥ वैमल्यस्फुटचेतोवृत्तिविशेषाभासमनाभासं शैवं केवलशान्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रणमत० ॥ ३ ॥ गोपालं भूलीलाविग्रहगोपालं कुलगोपालं गोपीखेलनगोवर्धनधृतिलीलालालितगोपालम् ॥ गोभिर्निगदितगोविन्दस्फुटनामानं बहुनामानं गोपीगोचरदूरं प्रणमत० ॥ ४ ॥ गोपीमण्डलगोष्ठीभेदं भेदावस्थमभेदाभं शश्वद्गोखुरनिर्धूतोत्कृतधूलीधूसरसौभाग्यम् ॥ श्रद्धाभक्तिगृहीतानन्दमचिन्त्यं चिन्तितसद्भावं चिन्तामणिमहिमानं प्रणमत० ॥ ५ ॥ स्नानव्याकुलयोषिद्वस्त्रमुपादायागमुपारूढं व्यादित्सन्तीरथ दिग्वस्त्रा ह्युपदातुमुपाकर्षन्तम् ॥ निर्धूतद्वयशोकविमोहं बुद्धं बुद्धेरप्यन्तस्थं सत्तामात्रशरीरं प्रणमत० ॥ ६ ॥ कान्तं कारणकारणमादिमनादिं कालमनाभासं कालिन्दीगतकालियशिरसि मुहुर्नृत्यन्तं च सुनृत्यन्तम् ॥ कालं कालकलातीतं कलिताशेषं कलिदोषघ्नं कालत्रयगतिहेतुं प्रणमत० ॥ ७ ॥ वृन्दावनभुवि वृन्दारकगणवृन्दाराधित वन्देऽहं कुन्दाभामलमन्दस्मेरसुधानन्दं सुहृदानन्दम् ॥ वंद्याशेषमहामुनिमानसवन्द्यानन्दपदद्वन्द्वं वन्द्याशेषगुणाब्धि प्रणमत० ॥ ८ ॥ गोविन्दाष्टकमेतदधीते गोविन्दार्पितचेता यो गोविन्दाच्युत माधव विष्णो

Nepal Sanskrit University, Bålmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोकुलनायक कृष्णेति ॥ गोविन्दांघ्रिसरोजध्यान-सुधाजलधौतसमस्ताघो गोविन्दं परमानन्दामृत-मन्तःस्थं स समभ्येति ॥ ६ ॥

इति श्रीमत्परमहंसश्रीमच्छङ्कराचार्यविरचितं गोविन्दाष्टकं सम्पूर्णम् ॥ २५ ॥

---

१३४ श्रीगोपालाष्टकम् ।

श्रीगणेशाय नमः ॥ यस्माद्विश्वं जातमिदं चित्रमतर्क्यं यस्मिन्नानन्दात्मनि नित्यं रमते वै ॥ यत्रान्ते संयाति लयं चैतदशेषं तं गोपालं सन्ततकालं प्रति वन्दे ॥ १ ॥ यस्याज्ञानाज्जन्मजरारोगकदम्बं ज्ञाते यस्मिन्नश्यति तत्सर्वमिहाशु ॥ गत्वा यत्रायाति पुनर्नो भवभूमिं तं गो० ॥ २ ॥ तिष्ठन्नन्तर्यो यमयत्येतदजस्रं यं कश्चिन्नो वेद जनोऽप्यात्मनि सन्तम् ॥ सर्वं यस्येदं च वशे तिष्ठति विश्वं तं गो० ॥ ३ ॥ धर्मो धर्मेणेह तिरस्कारमुपैति काले यस्मिन्मत्स्यमुखैश्चारुचरित्रः ॥ नानारूपैः पाति तदा योऽवनिबिम्बं तं गो० ॥ ४ ॥ प्राणायामैर्ध्वस्तसमस्तेन्द्रियदोषा रुद्ध्वा चित्तं यं हृदि पश्यन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समाधौ ॥ ज्योतीरूपं योगिजनामोदनिमग्नास्तं गो० ॥ ५ ॥ भानुश्चन्द्रश्चोडुगणाश्चैव हुताशो यस्मिन्नैवाभाति तडिच्चापि कदापि ॥ यद्भासा चाभाति समस्तं जगदेतत्तं गो० ॥ ६ ॥ सत्यज्ञानं मोदमवोचुर्निगमाद्यं यो ब्रह्मेन्द्रादित्यगिरीशार्चितपादः ॥ शेतेऽनन्तोऽनन्ततनावम्बुनिधौ यस्तं गो० ॥ ७ ॥ शैवाः प्राहुर्यं शिवमन्ये गणनाथं शक्तिं चान्येऽर्कं च तथान्ये मतिभेदात् ॥ नानाकारैर्भाति य एकोऽखिलशक्तिस्तं गो० ॥ ८ ॥ श्रीमद्गोपालाष्टकमेतत्समधीते भक्त्या नित्यं यो मनुजो वै स्थिरचेताः ॥ हित्वा तर्णं पापकलापं स समेति पुण्यं विष्णोर्धाम यतो नैव निपातः ॥ ९ ॥

इति श्रीमत्परमहंसब्रह्मानन्दरचितं श्रीगोपालाष्टकं सम्पूर्णम् ॥ २६ ॥

—❀—❀—

१३५ भगवन्मानपूजा ।

श्रीगणेशाय नमः ॥ हृदम्भोजे कृष्णः सजलजलदश्यामलतनुः सरोजाक्षः स्रग्वी मुकुटकटकाद्याभरणवान् ॥ शरद्राकानाथप्रतिमवदनः श्रीमुरलिकां वहन्ध्येयो गोपीगणपरिवृतः कुङ्कुमचितः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पयोम्भोधेर्द्वीपान्मम हृदयमायाहि भगवन् भ्राजत्कनकवरपीठं भज हरे ॥ सुचिरं शृणु यदुकुलज नेनेज्मि सुजलैर्गृहाणेदं दधिफलसदर्घ्यं सुररिपो ॥ २ ॥ त्वमाचामोपेन्द्रं त्रिदशसरिदम्भोऽतिशिशिरं भजस्वेमं पञ्चामृतरचितमाप्लावमघहन् ॥ द्युनद्याः कालिन्द्या अपि कनककुम्भस्थितमिदं जलं तेन स्नानं कुरु कुरु कुरुष्वाचमनकम् ॥ ३ ॥ तडिद्वर्णे वस्त्रे भयविजयकान्ताधिहरण प्रलम्बारि भ्रातर्मृदुलमुपवीतं कुरु गले ॥ ललाटे पाटीरं मृगमदयुतं धारय हरे गृहाणेदं माल्यं शतदलतुलस्यादिरचितम् ॥ ४ ॥ दशाङ्गं धूपं सद्वरदचरणाग्रेऽर्पितमये मुखं दीपेनेन्दुप्रभवरजसा देव कलये ॥ इमौ पाणी वाणीपतिसुतसकर्पूररजसा विशोध्याग्रे दत्तं सलिलमिदमाचाम नृहरे ॥ ५ ॥ सदा तृप्तान्नं षड्रसवदखिलं व्यञ्जनयुतं सुवर्णामत्रे गोघृतचषकयुक्ते स्थितमिदम् ॥ यशोदासूनो तत्परमदययाऽशान सखिभिः प्रसादं वाञ्छद्भिः सह तदनु नीरं पिब विभो ॥ ६ ॥ सचन्द्रं ताम्बूलं मुखरुचिकरं भक्षय हरे फलं स्वादु प्रीत्या परिमलवदास्वादय चिरम् ॥ सपर्यापर्याप्त्यै कनकमणि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समाधौ ॥ ज्योतीरूपं योगिजनामोदनिमग्नास्तं गो० ॥ ५ ॥ भानुश्चन्द्रश्चोडुगणश्चैव हुताशो यस्मिन्नैवाभाति तडिच्चापि कदापि ॥ यद्भासा चाभाति समस्तं जगदेतत्तं गो० ॥ ६ ॥ सत्यज्ञानं मोदमवोचुर्निगमाद्यं यो ब्रह्मेन्द्रादित्यगिरीशार्चितपादः ॥ शेतेऽनन्तोऽनन्ततनावम्बुनिधौ यस्तं गो० ॥ ७ ॥ शैवाः प्राहुर्यं शिवमन्ये गणनाथं शक्तिं चान्येऽर्कं च तथान्ये मतिभेदात् ॥ नानाकारैर्भाति य एकोऽखिलशक्तिस्तं गो० ॥ ८ ॥ श्रीमद्गोपालाष्टकमेतत्समधीते भक्त्या नित्यं यो मनुजो वै स्थिरचेताः ॥ हित्वा तर्णं पापकलापं स समेति पुण्यं विष्णोर्धाम यतो नैव निपातः ॥ ९ ॥

इति श्रीमत्परमहंसब्रह्मानन्दरचितं श्रीगोपालाष्टकं सम्पूर्णम् ॥ २६ ॥

—※—※—

१३५ भगवन्मानपूजा ।

श्रीगणेशाय नमः ॥ हृदम्भोजे कृष्णः सजलजलदश्यामलतनुः सरोजाक्षः स्रग्वी मुकुटकटकाद्याभरणवान् ॥ शरद्राकानाथप्रतिमवदनः श्रीमुरलिकां वहन्ध्येयो गोपीगणपरिवृतः कुङ्कुमचितः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पयोम्भोधेर्द्वीपान्मम हृदयमायाहि भगवन् भ्राजत्कनकवरपीठं भज हरे ॥ सुचिह्नं श्रृणु यदुकुलज नेनेञ्जिम सुजलैर्गृहाणेदं दूर्वाफलजदर्घ्यं मुररिपो ॥ २ ॥ त्वमाचामोपेन्द्रं त्रिदशसरिदम्भोऽतिशिशिरं भजस्वेमं पञ्चामृतरचितमाप्लावमघहन् ॥ द्युनद्याः कालिन्द्या अपि कनककुम्भस्थितमिदं जलं तेन स्नानं कुरु कुरु कुरुष्वाचमनकम् ॥ ३ ॥ तडिद्वर्णे वस्त्रे भयविजयकान्ताधिहरण प्रलम्बारि भ्रातर्मृदुलमुपवीतं कुरु गले ॥ ललाटे पाटीरं मृगमदयुतं धारय हरे गृहाणेदं माल्यं शतदलतुलस्यादिरचितम् ॥ ४ ॥ दशाङ्गं धूपं सद्वरदचरणाग्रेऽर्पितमये मुखं दीपेनेन्दुप्रभवरजसा देव कलये ॥ इमौ पाणी वाणीपतिसुतसकर्पूररजसा विशोध्याग्रे दत्तं सलिलमिदमाचाम नृहरे ॥ ५ ॥ सदा तृप्तान्नं षड्रसवदखिलं व्यञ्जनयुतं सुवर्णामत्रे गोघृतचषकयुक्ते स्थितमिदम् ॥ यशोदासूनो तत्परमदययाऽशान सखिभिः प्रसादं वाञ्छद्भिः सह तदनु नीरं पिब विभो ॥ ६ ॥ सचन्द्रं ताम्बूलं मुखरुचिकरं भक्षय हरे फलं स्वादु प्रीत्या परिमलमुखरुचिकरं ... वदास्वादय चिरम् ॥ सपर्यापर्याप्त्यै कनकमणि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समा[illegible]मिदं प्रदीपैरारार्त्तिं जलधितनयाश्लिष्ट-गो० ॥ [illegible] ॥ विजातीयैः पुष्पैरभिसुरभिबिल्वैश्च-[illegible]र्चेति पुष्पाञ्जलिमजित ते मूर्ध्नि निदधे ॥ तव प्रादक्षिण्यक्रमणमघविध्वंसिरचितं चतुर्वारं विष्णो जनिपथगतिश्रान्तविदुषा ॥८॥ नमस्कारोऽष्टाङ्गः सकलदुरितध्वंसनपटुः कृतं नृत्यं गीतं स्तुतिरपि रमाकान्त त इमम् ॥ तव प्रीत्यै भूयादहमपि च दासस्तव विभो कृतं छिद्रं पूर्णं कुरु कुरु नमस्तेऽस्तु भगवन् ॥ ९ ॥ सदा सेव्यः कृष्णः सजलघननीलः करतले दधानो दध्यन्नं तदनु नवनीतं मुरलिकाम् ॥ कदाचित्कान्तानां कुचकलशपत्रालिरचनासमासक्तं स्निग्धैः सह शिशुविहारं विरचयन् ॥ १० ॥ मणिकर्णीच्छया जातमिदं मानसपूजनम् ॥ यः कुर्वीतोषसि प्राज्ञस्तस्य कृष्णः प्रसीदति ॥ ११ ॥

इति श्रीशङ्कराचार्यविरचितं भगवन्मानसपूजनम् ॥ २७ ॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१३६ श्रीकृष्णस्तवराजः ।

श्रीगणेशाय नमः ॥ श्रीमहादेव उवाच ॥ शृणु देवि प्रवक्ष्यामि स्तोत्रं परमदुर्लभम् ॥ यज्ज्ञात्वा न पुनर्गच्छेन्नरो निरययातनाम् ॥ १ ॥ नारदाय च यत्प्रोक्तं ब्रह्मपुत्रेण धीमता ॥ सनत्कुमारेण पुरा योगीन्द्रगुरुवर्त्मना ॥ २ ॥ श्रीनारद उवाच ॥ प्रसीद भगवन्मह्यमज्ञानात्कुण्ठितात्मने ॥ तवाङ्घ्रिपङ्कजरजोरागिणीं भक्तिमुत्तमाम् ॥ ३ ॥ अज प्रसीद भगवन्नमितद्युतिपञ्जर ॥ अप्रमेय प्रसीदास्मद्दुःखहन् पुरुषोत्तम ॥ ४ ॥ स्वसंवेद्य प्रसीदास्मदानन्दात्मन्ननामय ॥ अचिन्त्यसार विश्वात्मन्प्रसीद परमेश्वर ॥ ५ ॥ प्रसीद तुङ्गतुङ्गानां प्रसीद शिव शोभन ॥ प्रसीद गुणगम्भीर गम्भीराणां महाद्युते ॥ ६ ॥ प्रसीद व्यक्त विस्तीर्ण विस्तीर्णानामगोचर ॥ प्रसीदार्द्रार्द्रजातीनां प्रसीदान्तान्तदायिनाम् ॥ ७ ॥ गुरोर्गरीयः सर्वेश प्रसीदानन्त देहिनाम् ॥ जय माधव मायात्मन् जय शाश्वत शृङ्गभृत् ॥ ८ ॥ जय शङ्खधर श्रीमन् जय नन्दकनन्दन ॥ जय चक्रगदापाणे जय देव जनार्दन ॥ ९ ॥ जय रत्नवराबद्धकिरीटाक्रान्तमस्तक ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जय पक्षिपतिच्छायानिरुद्धार्ककरारुण ॥ १० ॥
नमस्ते नरकाराते नमस्ते मधुसूदन ॥ नमस्ते
ललितापाङ्ग नमस्ते नरकान्तक ॥ ११ ॥ नमः पाप-
हरेशान नमः सर्वभयापह ॥ नमः सम्भूतसर्वात्म-
न्नमः सम्भृतकौस्तुभ ॥ १२ ॥ नमस्ते नयनातीत
नमस्ते भयतारक ॥ नमो विभिन्नवेषाय नमः
श्रुतिपथातिग ॥ १३ ॥ नमस्त्रिमूर्त्तिभेदेन सर्गस्थि-
त्यन्तहेतवे ॥ विष्णवे त्रिदशारातिजिष्णवे परमा-
त्मने ॥ १४ ॥ चक्रभिन्नारिचक्राय चक्रिणे चक्र-
वल्लभ ॥ विश्वाय विश्ववन्द्याय विश्वभूतानु-
वर्तिने ॥ १५ ॥ नमोऽस्तु योगिध्येयात्मन्नमोऽस्त्व-
ध्यात्मरूपिणे ॥ भक्तिप्रदाय भक्तानां नमस्ते मुक्ति-
दायिने ॥ १६ ॥ पूजनं हवनं चेज्या ध्यानं पश्चा-
न्नमस्क्रिया ॥ देवेश कर्म सर्वं मे भवेदाराधनं
तव ॥ १७ ॥ इति हवनजपार्चाभेदतो विष्णुपूजा-
नियतहृदयकर्मा यस्तु मन्त्री चिराय ॥ स खलु
सकलकामान्प्राप्य कृष्णान्तरात्मा जननमृतिविमु
क्तोऽत्युत्तमां भक्तिमेति ॥ १८ ॥ गोगोपगोपिका-
वीतं गोपालं गोषु गोप्रदम् ॥ गोपैरीड्यं गोसहस्रै-
र्नौमि गोकुलनायकम् ॥ १९ ॥ प्रीणयेदनया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तुत्या जगन्नाथं जगन्मयम् ॥ धर्मार्थकाममोक्षाणामाप्तये पुरुषोत्तमम् ॥ २० ॥

इति श्रीनारदपञ्चरात्रे श्रीकृष्णस्तवराजः सम्पूर्णम् ॥ २८ ॥

॥ इति कृष्णावतारस्तोत्राणि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ अवतारस्तोत्राणि ।

१३७ पाण्डुरङ्गाष्टकम् ।

श्रीगणेशाय नमः ॥ महायोगपीठे तटे भीमरथ्यां वरं पुण्डरीकाय दातुं मुनीन्द्रैः ॥ समागत्य तिष्ठन्तमानन्दकन्दं परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ १ ॥ तडिद्वाससं नीलमेघावभासं रमामन्दिरं सुन्दरं चित्प्रकाशम् ॥ वरं त्विष्टिकायां समन्यस्तपादं पर० ॥ २ ॥ प्रमाणं भवाब्धेरिदं मामकानां नितम्बः कराभ्यां धृतो येन तस्मात् ॥ विधातुर्वसत्यै धृतो नाभिकोशः पर० ॥ ३ ॥ स्फुरत्कौस्तुभालङ्कृतं कण्ठदेशे श्रिया जुष्टकेयूरकं श्रीनिवासम् ॥ शिवं शान्तमीड्यं वरं लोकपालं पर० ॥ ४ ॥ शरच्चन्द्रबिम्बाननं चारुहासं लसत्कुण्डलाकान्तगण्डस्थलाङ्गम् ॥ जपारागबिम्बाधरं कञ्जनेत्रं पर० ॥ ५ ॥ किरीटोज्ज्वलत्सर्वदिक्प्रान्तभागं सुरैरर्चितं दिव्यरत्नैरनर्घ्यैः त्रिभङ्गाकृतिं बर्हमाल्यावतंसं पर०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ६ ॥ विभुं वेणुनादं चरन्तं दुरन्तं स्वयं लीलया गोपवेषं दधानम् ॥ गवां वृन्दकानन्ददं चारुहासं पर० ॥ ७ ॥ अजं रुक्मिणीप्राणसञ्जीवनं तं परं धाम कैवल्यमेकं तुरीयम् ॥ प्रसन्नं प्रसन्नार्तिहं देवदेवं परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ ८ ॥ स्तवं पाण्डुरङ्गस्य वै पुण्यदं ये पठन्त्येकचित्तेन भक्त्या च नित्यम् ॥ भवाम्भोनिधिं तेऽपि तीर्त्वाऽन्तकाले हरेरालयं शाश्वतं प्राप्नुवन्ति ॥ ९ ॥

इति श्रीमच्छङ्कराचार्यविरचितं पाण्डुरङ्गाष्टकं सम्पूर्णम् ॥ १ ॥

---

१३८ कल्किस्तोत्रम् ।

श्रीगणेशाय नमः ॥ सुशान्तोवाच ॥ जय हरेऽमराधीशसेवितं तव पदाम्बुजं भूरिभूषणम् ॥ कुरु ममाग्रतः साधु सत्कृतं त्यज महामते मोहमात्मनः ॥ १ ॥ तव वपुर्जगद्रूपसम्पदा विरचितं सतां मानसे स्थितम् ॥ रतिपतेर्मनोमोहदायकं कुरु विचेष्टितं कामलम्पटम् ॥ २ ॥ तव यशो जगच्छोकनाशनं मृदुकथामृतं प्रीतिदायकम् ॥ स्मितसुधोक्षितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रवन्मुखं तव करोत्यलं लोकमङ्गलम् ॥ ३॥ मम पतिस्त्वयं सर्वदुर्जयो यदि तवाप्रियं कर्मणा चरेत् ॥ जहि तदात्मनः शत्रुमुद्यतं कुरु कृपां न चेदीदृगीश्वरः ॥ ४ ॥ महदहयुतं पञ्चमात्रया प्रकृतिजायया निर्मितं वपुः ॥ तव निरीक्षणाल्लीलया जगत्स्थितिलयोदयं ब्रह्मकल्पितम् ॥ ५ ॥ भूवियन्मरुद्वारितेजसां राशिभिः शरीरेन्द्रियाश्रितैः ॥ त्रिगुणया स्वया मायया विभो कुरु कृपां भवत्सेवनार्थिनाम् ॥ ६ ॥ तव गुणालयं नाम पावनं कलिमलापहं कीर्तयन्ति ये ॥ भवभयक्षयं तापतापिता मुहुरहो जनाः संसरन्ति नो ॥ ७ ॥ तव जनुः सतां मानवर्धनं जिनकुलक्षयं देवपालकम् ॥ कृतयुगार्पकं धर्मपूरकं कलिकुलान्तकं शं तनोतु मे ॥ ८ ॥ मम गृहं पतिपुत्रनप्तृकं गजरथैर्ध्वजैश्चामरैर्धनैः ॥ मणिवरासनं सत्कृतिं विना तव पदाब्जयोः शोभयन्ति किम् ॥ ९ ॥ तव जगद्वपुः सुन्दरस्मितं मुखमनिन्दितं सुन्दरारवम् ॥ यदि न मे प्रियं वल्गुचेष्टितं परिकरोत्यहो मृत्युरस्त्विह ॥ १० ॥ हयचर भयहरकरहरशरणखर तरवरशर दशबलदमन ॥ जय हतपरभरभवभरनाशन शशधरशतसमरसभरम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दन ॥ ११ ॥

इति श्रीकल्किपुराणे सुशान्ताकृतं कल्किस्तोत्रं सम्पूर्णम् ॥ २ ॥

---

१३९ कल्किस्तवः ।

श्रीगणेशाय नमः ॥ राजान ऊचुः ॥ गद्यानि । जयजय निजमायया कल्पिताशेषविशेष कल्पनापरिणामजलाप्लुतलोकत्रयोपकारणमाकलय्य मनुमनिशम्य पूरितमविजनाविजामाविर्भूतमहामीनशरीरं त्वं निजकृतधर्मसेतुसंरक्षणकृतावतारः ॥१॥ पुनरिह जलधिमथनादृतदेवदानवगणानां मन्दराचलानयनव्याकुलितानां साहाय्येनादृतचित्तः पर्वतोद्धरणामृतप्राशनरचनावतारः कूर्माकारः प्रसीद परेश त्वं दीननृपाणाम् ॥ २ ॥ पुनरिह दितिजबलपरिलङ्घितवासवसूदनादृत जितभुवनपराक्रमहिरण्याक्षनिधनपृथिव्युद्धरणसङ्कल्पाभिनिवेशेन धृतकोलावतार पाहि नः ॥ ३ ॥ पुनरिह त्रिभुवनजयिनो महाबलपराक्रमस्य हिरण्यकशिपोरर्दितानां देववराणां भयभीतानां कल्याणाय दितिसुतवध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रेप्सुर्ब्रह्मणो वरदानादवध्यस्य न शस्त्रास्त्रराग्निदिवा-
स्वर्गमर्त्यपातालतले देवगन्धर्वकिन्नरनागैरिति
विचिन्त्य नरहरिरूपेण नखाग्रभिन्नोरुं दष्टदन्त-
च्छदं त्यक्तासुं कृतवानसि ॥ ४ ॥ पुनरिह त्रिज-
गज्जयिना बलेः सत्रे शक्रानुजं बटुवामनो दैत्य-
सम्मोहनाय त्रिपदभूमियाच्ञाच्छलेन विश्वकाय-
स्तदुत्सृष्टजलसंस्पर्शविवृद्धमनोभिलाषस्त्वं भूतले
बलेर्दौवारिकत्वमङ्गीकृतमुचितं दानफलम् ॥ ५ ॥
पुनरिह हैहयादिनृपाणाममितबलपराक्रमाणां नाना-
मदोल्लङ्घितमर्यादावर्त्मनां निधनाय भृगुवंशजो
जामदग्न्यः पितृहोमधेनुहरणप्रवृद्धमन्युवशात् त्रिः
सप्तकृत्वो निःक्षत्रियां पृथिवीं कृतवानसि परशु-
रामावतारः ॥ ६ ॥ पुनरिह पुलस्त्यवंशावतंसस्य
विश्रवसः पुत्रस्य निशाचरस्य रावणस्य लोकत्रय-
तापनस्य निधनमुररीकृत्य रविकुलजातदशरथात्म-
जो विश्वामित्रादस्त्राण्युपलभ्य वने सीताहरण-
वशात्प्रवृद्धमन्युनाऽम्बुधिं वानरैर्निर्बध्य सगणं दश-
कन्धरं हतवानसि रामावतारः ॥ ७ ॥ पुनरिह
यदुकुलजलधिकलानिधिः सकलसुरगणसेवितपा-
दारविन्दद्वन्द्वो विविधदानवदैत्यदलनलोकत्रय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुरिततापनो वसुदेवात्मजो रामावतारो बलभद्र-स्त्वमसि ॥ ८ ॥ पुनरिह विविधकृतवेदधर्मानुष्ठान-विहितनानादर्शनः सघृणः संसारकर्मत्यागविधिना ब्रह्माभासविलासचातुरीं प्रकृतिविमाननामसम्पा-दयन् बुद्धावतारस्त्वमसि ॥ ९ ॥ अधुनाकलिकुल-नाशावतारो बौद्धपाखण्डम्लेच्छादीनां च वेदधर्म-सेतुपरिपालनाय कृतावतारः कल्किरूपेणास्मान् स्त्रीत्वनिरयादुद्धृतवानसि तत्रानुकम्पां किमिह कथयामः ॥ १० ॥ क्व ते ब्रह्मादीनानविजितविला-सावतरणं क्व नः कामावामाकुलितमृगतृष्णार्त-मनसाम् ॥ सुदुष्प्राप्यं युष्मच्चरणजलजालोकन-मिदं कृपापारावारः प्रमुदितदृशाऽश्वासय निजान्

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे नृपकृतकल्किस्तवः सम्पूर्णः ॥ ३ ॥

—❀—❀—

१४० मत्स्यस्तोत्रम् ।

श्रीगणेशाय नमः ॥ नूनं त्वं भगवान्साक्षाद्धरि-र्नारायणोऽव्ययः ॥ अनुग्रहाय भूतानां धत्से रूपं जलौकसाम् ॥ १ ॥ नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्ययेश्वर ॥ भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो ॥ २ ॥ सर्वे लीलावतारास्ते भूतानां भूतिहेतवः ॥ ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतम् ॥ ३ ॥ न तेऽरविन्दाक्ष पदोपसर्पणं मृषा भवेत्सर्वसुहृत्प्रियात्मनः ॥ यथेतरेषां पृथगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ॥ ४ ॥

इति श्रीमद्भागवतान्तर्गतं मत्स्यस्तोत्रं सम्पूर्णम् ॥ ४ ॥

---

१४१ कूर्मस्तोत्रम् ।

श्रीगणेशाय नमः ॥ देवा ऊचुः ॥ नमाम ते देव पदारविन्दं प्रपन्नतापोपशमातपत्रम् ॥ यन्मूलकेता यतयोऽञ्जसोरुसंसारदुःखं बहिरुत्क्षिपन्ति ॥ १ ॥ धातर्यदस्मिन्भव ईश जीवास्तापत्रयेणोपहता न शर्म ॥ आत्मंल्लभन्ते भगवंस्तवाङ्घ्रिच्छायां सविद्यामत आश्रयेम ॥ १ ॥ मार्गन्ति यत्ते मुखपद्मनीडैश्छन्दःसुपर्णैर्ऋषयो विविक्ते ॥ यस्याघमर्षोदसरिद्वरायाः पदं पदं तीर्थपदः प्रपन्नाः ॥ ३ ॥ यच्छ्रद्धयाऽश्रुतवत्या च भक्त्या संमृज्यमाने हृदये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वधाय ॥ ज्ञानेन वैराग्यबलेन धारा व्रजेम तत्तेऽ-ङ्घ्रिसरोजपीठम् ॥ ४ ॥ विश्वस्य जन्मस्थिति-संयमार्थे कृतावतारस्य पदाम्बुजे ते ॥ व्रजेम सर्वे शरणं यदीशं स्मृतं प्रयच्छत्यभयं स्वपुंसाम् ॥ ५ ॥ यत्सानुबन्धेऽसति देहगेहे ममाहमित्यूढदुराग्रहाणाम् ॥ पुंसां सुदूरं वसतोऽपि पुर्यां भजेम तत्ते भगवन्पदाब्जम् ॥ ६ ॥ तान्वा असद्वृत्तिभिरक्षिभिर्ये पराहृतान्तर्मनसः परेश ॥ अथो न पश्यन्त्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ॥ ७ ॥ पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ते ॥ वैराग्यसारं प्रतिलभ्य बोधं यथाऽञ्जसाऽन्वीयुरकुण्ठधिष्ण्यम् ॥८॥ तथाऽपरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम् ॥ त्वामेव धीराः पुरुषं विशन्ति तेषां श्रमः स्यान्नतु सेवया ते ॥ ९ ॥ तत्ते वयं लोकसिसृक्षयाऽद्य त्वयाऽनुसृष्टास्त्रिभिरात्मभिः स्म ॥ सर्वे वियुक्ताः स्वविहारतन्त्रं न शक्नुमस्तत्प्रतिहर्तवे ते ॥ १० ॥ यावद्बलिं तेऽज हराम काले यथा वयं चान्नमदाम यत्र ॥ यथोभयेषां त इमे हि लोका बलिं हरन्तोऽन्नमदन्त्यनूहाः ॥ ११ ॥ त्वं नः सुराणामसि सान्वयानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कूटस्थ आद्यः पुरुषः पुराणः ॥ त्वं देवशक्त्यां गुण-कर्मयोनौ रेतस्त्वजायां कविमादधेऽजः ॥ १२ ॥ ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन्करवाम किं ते ॥ त्वं नः स्वचक्षुः परिदेहि शक्त्या देवक्रियार्थे यदनुग्रहाणाम् ॥ १३ ॥

इति श्रीमद्भागवतान्तर्गतं कूर्मस्तोत्रं समाप्तम् ॥५॥

---

१४२ वराहस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ऋषय ऊचुः ॥ जितं जितं तेऽजित यज्ञभावन त्रयीं तनुं स्वां परिधुन्वते नमः ॥ यद्रोमगर्तेषु निलिल्युरध्वरास्तस्मै नमः कारणसूकराय ते ॥ १ ॥ रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकम् ॥ छन्दांसि यस्य त्वचि बर्हि रोमस्वाज्यं दृशि त्वङ्घ्रिषु चातुर्होत्रम् ॥ २ ॥ स्रुक् तुण्ड आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरन्ध्रे ॥ प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रम् ॥ ३ ॥ दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः ॥ जिह्वा प्रव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्र्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोऽसवो हि ते ॥ ४ ॥ सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव धातवः ॥ सत्राणि सर्वाणि शरीरसन्धिस्त्वं सर्वयज्ञक्रतुरिष्टिबन्धनः ॥ ५ ॥ नमो नमस्तेऽखिलयन्त्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने ॥ वैराग्यभक्त्यात्मजयानुभावितज्ञानाय विद्यागुरवे नमो नमः ॥ ६ ॥ दंष्ट्राग्रकोट्या भगवंस्त्वया धृता विराजते भूधर भूः सभूधरा ॥ यथा वनान्निःसरतो दता धृता मतङ्गजेन्द्रस्य सपत्रपद्मिनी ॥ ७ ॥ त्रयीमयं रूपमिदं च सौकरं भूमण्डले नाथ दता धृतेन ते ॥ चकास्ति शृङ्गोढघनेन भूयसा कुलाचलेन्द्रस्य यथैव विभ्रमः ॥ ८ ॥ संस्थापयैतां जगतां सतस्थुषां लोकाय पत्नीमसि मातरं पिता ॥ विधेम चास्यै नमसा सह त्वया यस्यां स्वतेजोऽग्निमिवारणावधाः ॥ ९ ॥ कः श्रद्दधीतान्यतमस्तव प्रभो रसां गताया भुव उद्विबर्हणम् ॥ न विस्मयोऽसौ त्वयि विश्वविस्मये यो माययेदं ससृजेऽतिविस्मयम् ॥ १० ॥ विधुन्वता वेदमयं निजं वपुर्जनस्तपःसत्यनिवासिनो जयम् ॥ सटाशिखोद्भूतशिवाम्बुबिन्दुभिर्विमृज्यमाना भृश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मीश पाविताः ॥ ११ ॥ स वै बत भ्रष्टमतिस्तवैष ते यः कर्मणा पारमपारकर्मणः ॥ यद्योगमायागुणयोगमोहितं विश्वं समस्तं भगवन्विधेहि शम् ॥१२॥

इति श्रीमद्भागवते वराहस्तोत्रं सम्पूर्णम् ॥ ६ ॥

---

१४३ नृसिंहस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ब्रह्मोवाच ॥ नतोऽस्म्यनन्ताय दुरन्तशक्तये विचित्रवीर्याय पवित्रकर्मणे ॥ विश्वस्य सर्गस्थितिसंयमान्गुणैः स्वलीलया सन्दधतेऽव्ययात्मने ॥ १ ॥ श्रीरुद्र उवाच ॥ कोपकालो युगान्तस्ते हतोऽयमसुरोऽल्पकः ॥ तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल ॥ २ ॥ इन्द्र उवाच ॥ प्रत्यानीताः परम भवता त्रायता नः स्वभागा दैत्याक्रान्तं हृदयकमलं त्वद्गृहं प्रत्यबोधि ॥ कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां नहि बहुमता नारसिंहापरैः किम् ॥ ३ ॥ ऋषयः ऊचुः ॥ त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज ॥ तद्विप्रलुप्तममुनोऽद्य शरण्यपाल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रक्षागृहीतवपुषा पुनरन्वमंस्थाः ॥४॥ पितर ऊचुः ॥ श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽप्यपिबत्तिलाम्बु ॥ तस्योदरान्नखविदीर्णवपाद्य आर्च्छत्तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ॥ ५॥ सिद्धा ऊचुः ॥ यो नो गतिं योगसिद्धामसाधुरहार्षीद्योगतपोबलेन ॥ नानादर्पं तं नखैर्निर्ददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ॥ ६ ॥ विद्याधरा ऊचुः ॥ विद्यां पृथग्धारणयाऽनुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः ॥ स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यम् ॥ ७ ॥ नागा ऊचुः ॥ येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः ॥ तद्वक्षःपाटनेनासां दत्तानन्द नमोऽस्तु ते ॥ ८ ॥ मनव ऊचुः ॥ मनवो वयं तव निदेशकारिणो दितिजेन देव परिभूतसेतवः ॥ भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किङ्करान् ॥ ९ ॥ प्रजापतय ऊचुः ॥ प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः ॥ स एष त्वया भिन्नवक्षानुशेते जगन्मङ्गलं सत्त्वमूर्तेऽवतारः ॥ १० ॥ गन्धर्वा ऊचुः ॥ वयं विभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः ॥ स एष नीतो भवता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दशामिमां किमुत्पथस्थः कुशलाय कल्पते ॥ ११ ॥
चारणा ऊचुः ॥ हरे तवांघ्रिपङ्कजं भवापवर्गमा-
श्रिताः ॥ यदेत साधुहृच्छयस्त्वयाऽसुरः समापितः
॥ १२ ॥ यक्षा ऊचुः ॥ वयमनुचरमुख्याः कर्मभि-
स्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वम् ॥
स तु जनपरितापं तत्कृतं जानता से नरहर उप-
नीतः पञ्चतां पञ्चविंशः ॥ १३ ॥ ॥ किम्पुरुषा
ऊचुः ॥ वयं किंपुरुषास्त्वं तु महापुरुषः ईश्वरः ॥
अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ॥ १४ ॥
वैतालिका ऊचुः ॥ सभासु सत्रेषु तवामलं यशो
गीत्वा सपर्यां महतीं लभामहे ॥ यस्तां व्यनैषीद्भृ-
शमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथाऽऽमयः
॥ १५ ॥ किन्नरा ऊचुः ॥ वयमीश किन्नरगणास्त-
वानुगा दितिजेन विष्टिममुनाऽनुकारिताः ॥ भवता
हरे स वृजिनोऽवसादितो नरसिंह नाथ विभवाय
नो भव ॥ १६ ॥ विष्णुपार्षदा ऊचुः ॥ अद्यैतद्ध-
रिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म ॥
सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनु-
ग्रहाय विद्मः ॥ १७ ॥

इति श्रीमद्भागवतान्तर्गतं नृसिंहस्तोत्रं सम्पूर्णम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१४४ लक्ष्मीनृसिंहस्तोत्रम् ।

श्रीगणेशाय नमः ॥ श्रीमत्पयोनिधिनिकेतन चक्रपाणे भोगीन्द्रभोगमणिरञ्जितपुण्यमूर्ते ॥ योगीश शाश्वत शरण्य भवाब्धिपोत लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ १ ॥ ब्रह्मेन्द्ररुद्रमरुदर्ककिरीटकोटिसंघट्टिताङ्घ्रिकमलामलकान्तिकान्त ॥ लक्ष्मीलसत्कुचसरोरुहराजहंस लक्ष्मीनृसिंह० ॥२॥ संसारघोरगहने चरतो मुरारे मारोग्रभीकरमृगप्रवरार्दितस्य ॥ आर्तस्य मत्सरनिदाघनिपीडितस्य लक्ष्मी० ॥ ३ ॥ संसारकूपमतिघोरमगाधमूलं संप्राप्य दुःखशतसर्पसमाकुलस्य ॥ दीनस्य देव कृपणापदमागतस्य लक्ष्मीनृसिंह० ॥ ४ ॥ संसारसागरविशालकरालकालनक्रग्रहग्रसननिग्रहविग्रहस्य ॥ व्यग्रस्य रागरसनोर्मिनिपीडितस्य लक्ष्मीनृसिंह० ॥ ५ ॥ संसारवृक्षमघबीजमनन्तकर्मशाखाशतं करणपत्रमनङ्गपुष्पम् ॥ आरुह्य दुःखफलितं पततो दयालो लक्ष्मी० ॥ ६ ॥ संसारसर्पघनवक्त्रभयोग्रतीव्रदंष्ट्राकरालविषदग्धविनष्टमूर्तेः ॥ नागारिवाहन सुधाब्धिनिवास शौरे लक्ष्मीनृसिंह० ॥ ७ ॥ संसारदावदहनातुरभीकरोरुज्वालावली-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिरतिदग्धतनूरुहस्य ॥ त्वत्पादपद्मसरसीशरणागतस्य लक्ष्मीनृसिंह० ॥ ८ ॥ संसारजालपतितस्य जगन्निवास सर्वेन्द्रियार्थबडिशार्थझषोपमस्य ॥ प्रोत्खण्डितप्रचुरतालुकमस्तकस्य लक्ष्मीनृसिंह मम० ॥ ९ ॥ संसारभीकरकरीन्द्रकलाभिघातनिष्पिष्टमर्मवपुषः सकलार्तिनाश ॥ प्राणप्रयाणभवभीतिसमाकुलस्य लक्ष्मीनृसिंह० ॥ १० ॥ अन्धस्य मे हृतविवेक महाधनस्य चौरैः प्रभो बलिभिरिन्द्रियनामधेयैः ॥ मोहान्धकूपकुहरे विनिपातितस्य लक्ष्मीनृसिंह० ॥ ११ ॥ लक्ष्मीपते कमलनाभ सुरेश विष्णो वैकुण्ठ कृष्ण मधुसूदन पुष्कराक्ष ॥ ब्रह्मण्य केशव जनार्दन वासुदेव देवेश देहि कृपणस्य करावलम्बम् ॥ १२ ॥ यन्माययोर्जितवपुःप्रचुरप्रवाहमग्नार्थमत्र निवहोरुकरावलम्बम् ॥ लक्ष्मीनृसिंह चरणाब्जमधुव्रतेन स्तोत्रं कृतं सुखकरं भुवि शङ्करेण ॥ १३ ॥

इति श्रीमच्छङ्कराचार्यरचि० संकष्टनाशनं लक्ष्मीनृसिंहस्तोत्रं सम्पूर्णम् ॥ ८ ॥

—:o:—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१४५ वामनस्तोत्रम् । [१]

श्रीगणेशाय नमः ॥ अदितिरुवाच ॥ यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः श्रवणमङ्गलनामधेय ॥ आपन्नलोकवृजिनोपशमोदयाद्य शं नः कृधीश भगवन्नसि दीननाथः ॥ १ ॥ विश्वाय विश्वभवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने ॥ स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते ॥ २ ॥ आयुः परं वपुरभीष्टमतुल्यलक्ष्मीर्द्यौर्भूरसाः सकलयोगगुणास्त्रिवर्गः ॥ ज्ञानं च केवलमनन्त भवन्ति तुष्टात्त्वत्तो नृणां किमु सपत्नजयादिराशीः ॥ ३ ॥

इति श्रीमद्भागवतान्तर्गतं वामनस्तोत्रं समाप्तम् ॥ १ ॥

---

१४६ वामनस्तोत्रम् [२]

श्रीगणेशाय नमः ॥ अदितिरुवाच ॥ नमस्ते देवदेवेश सर्वव्यापिन् जनार्दन ॥ सत्वादिगुणभेदेन लोकव्यापारकारण ॥१॥ नमस्ते बहुरूपाय अरूपाय नमोनमः ॥ सर्वैकाद्भुतरूपाय निर्गुणाय गुणात्मने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ २ ॥ नमस्ते लोकनाथाय परमज्ञानरूपिणे ॥ सद्भक्तजनवात्सल्यशीलिने मङ्गलात्मने ॥ ३ ॥ यस्यावताररूपाणि ह्यर्चयन्ति मुनीश्वराः ॥ तमादिपुरुषं देवं नमामीष्टार्थसिद्धये ॥४॥ यं न जानन्ति श्रुतयो यं न जानन्ति सूरयः ॥ तं नमामि जगद्धेतुं मायिनं तममायिनम् ॥ ५ ॥ यस्यावलोकनं चित्रं मायोपद्रववारणम् ॥ जगद्रूपं जगत्पालं तं वन्दे पद्मजाधवम् ॥ ६ ॥ यो देवस्त्यक्तसङ्गानां शान्तानां करुणार्णवः ॥ करोति ह्यात्मना सङ्गं तं वन्दे सङ्गवर्जितम् ॥ ७ ॥ यत्पादाब्जजलक्लिन्नसेवारञ्जितमस्तकाः ॥ अवापुः परमां सिद्धिं तं वन्दे सर्ववन्दितम् ॥८॥ यज्ञेश्वरं यज्ञभुजं यज्ञकर्मसु निष्ठितम् ॥ नमामि यज्ञफलदं यज्ञकर्मप्रबोधकम् ॥ ९ ॥ अजामिलोऽपि पापात्मा यन्नामोच्चारणादनु ॥ प्राप्तवान्परमं धाम तं वन्दे लोकसाक्षिणम् ॥ १० ॥ ब्रह्माद्या अपि ये देवा यन्मायापाशयन्त्रिताः ॥ न जानन्ति परं भावं तं वन्दे सर्वनायकम् ॥ ११ ॥ हृत्पद्मनिलयोऽज्ञानां दूरस्थ इव भाति यः॥ प्रमाणातीतसद्भावं तं वन्दे ज्ञानसाक्षिणम् ॥ १२ ॥ यन्मुखाद्ब्राह्मणो जातो बाहुभ्यां क्षत्रियोऽजनि ॥ तथैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऊरुतो वैश्यः पद्भ्यां शूद्रो अजायत ॥ १३ ॥ मन-
सश्चन्द्रमा जातो जातः सूर्यश्च चक्षुषः ॥ मुखा-
दिन्द्रस्तथाऽग्निश्च प्राणाद्वायुरजायत ॥ १४ ॥
त्वमिन्द्रः पवनः सोमस्त्वमीशानस्त्वमन्तकः ॥
त्वमग्निर्निर्ऋतिश्चैव वरुणस्त्वं दिवाकरः ॥ १५ ॥
देवाश्च स्थावराश्चैव पिशाचाश्चैव राक्षसाः ॥
गिरयः सिद्धगन्धर्वा नद्यो भूमिश्च सागराः ॥ १६ ॥
त्वमेव जगतामीशो यन्नामास्ति परात्परः ॥ त्वद्रू-
पमखिलं तस्मात्पुत्रान्मे पाहि श्रीहरे ॥ १७ ॥ इति
स्तुत्वा देवधात्री देवं नत्वा पुनः पुनः ॥ उवाच
प्राञ्जलिर्भूत्वा हर्षाश्रुक्षालितस्तनी ॥ १८ ॥ अनु-
ग्राह्याऽस्मि देवेश हरे सर्वादिकारण ॥ अकण्टक-
श्रियं देहि मत्सुतानां दिवौकसाम् ॥ १९ ॥ अन्तर्या-
मिञ्जगद्रूप सर्वभूतपरेश्वर ॥ तवाज्ञातं किमस्तीह किं
मां मोहयसि प्रभो ॥ २० ॥ तथापि तव वक्ष्यामि
यन्मे मनसि वर्तते ॥ वृथापुत्रास्मि देवेश रक्षोभिः
परिपीडिता ॥ २१ ॥ एतान्न हन्तुमिच्छामि मत्सुता
दितिजा यतः ॥ तानहत्वा श्रियं देहि मत्सुतानामु-
वाच सा ॥ २२ ॥ इत्युक्तो देवदेवस्तु पुनः प्रीति-
मुपागतः ॥ उवाच हर्षयन्साध्वीं कृपयाऽभिपरि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्लुतः ॥ २३ ॥ श्रीभगवानुवाच ॥ प्रीतोऽस्मि देवि भद्रं ते भविष्यामि सुतस्तव ॥ यतः सपत्नीतनयेष्वपि वात्सल्यशालिनी ॥ २४ ॥ त्वया च मे कृतं स्तोत्रं पठन्ति भुवि मानवाः ॥ तेषां पुत्रा धनं सम्पन्न हीयन्ते कदाचन ॥ २५ ॥ अन्ते मत्पदमाप्नोति यद्विष्णोः परमं शुभम् ॥ २६ ॥

इति श्रीपद्मपुराणे वामनस्तोत्रं सम्पूर्णम् ॥ १० ॥

—❀—❀—

१४७ परशुरामाष्टाविंशतिनामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ऋषिरुवाच ॥ यमाहुर्वासुदेवांशं हैहयानां कुलान्तकम् ॥ त्रिसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीम् ॥ १ ॥ दुष्टं क्षत्रं भुवो भारमब्रह्मण्यमनाशयत् ॥ तस्य नामानि पुण्यानि वच्मि ते पुरुषर्षभ ॥ २ ॥ भूभारहरणार्थाय मायामानुषविग्रहः ॥ जनार्दनांशसम्भूतः स्थित्युत्पत्त्यप्ययेश्वरः ॥ ३ ॥ भार्गवो जामदग्न्यश्च पित्राज्ञापरिपालकः ॥ मातृप्राणप्रदो धीमान् क्षत्रियान्तकरः प्रभुः ॥ ४ ॥ रामः परशुहस्तश्च कार्तवीर्यमदापहः ॥ रेणुकादुःखशोकघ्नो विशोकः शोकनाशनः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नवीननीरदश्यामो रक्तोत्पलविलोचनः ॥ घोरो दण्डधरो धीरो ब्रह्मण्यो ब्राह्मणप्रियः ॥ ६ ॥ तपोधनो महेन्द्रादौ न्यस्तदण्डः प्रशान्तधीः ॥ उपगीयमानचरितः सिद्धगन्धर्वचारणैः ॥ ७ ॥ जन्ममृत्युजराव्याधिदुःखशोकभयातिगः ॥ इत्यष्टाविंशतिर्नाम्नामुक्ता स्तोत्रात्मिका शुभा ॥ ८ ॥ अनया प्रीयतां देवो जामदग्न्यो महेश्वरः ॥ नेदं स्तोत्रमशान्ताय नादान्तायातपस्विने ॥ ९ ॥ नावेदविदुषे वाच्यमशिष्याय खलाय च ॥ नासूयकायानृजवे न चानिर्दिष्टकारिणे ॥ १० ॥ इद विप्राय पुत्राय शिष्यायानुगताय च ॥ रहस्यधर्मं वक्तव्यं नान्यस्मै तु कदाचन ॥ ११ ॥

इति परशुरामाष्टाविंशतिनामस्तोत्रम् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीहनुमत्स्तोत्राणि ।

—❀:❀—

१४८ श्रीहनुमत्कवचम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीहनुमत्कवचस्य श्रीरामचन्द्र ऋषिः ॥ अनुष्टुप्छन्दः ॥ श्रीहनुमान् देवता ॥ मारुतात्मज इति बीजम् ॥ अञ्जनीसूनुरिति शक्तिः ॥ आत्मनः सकलकार्यसिद्ध्यर्थे जपे विनियोगः ॥ ॐ हनुमते अङ्गुष्ठाभ्यां नमः ॥ ॐ पवनात्मजाय तर्जनीभ्यां नमः ॥ ॐ अक्षघ्नाय मध्यमाभ्यां नमः ॥ ॐ विष्णुभक्ताय अनामिकाभ्यां नमः ॥ ॐ लङ्काविदाहकाय कनिष्ठिकाभ्यां नमः ॥ ॐ श्रीरामकिङ्कराय करतलकरपृष्ठाभ्यां नमः ॥ अथ ध्यानम् ॥ ध्यायेद्बालदिवाकरद्युतिनिभं देवारिदर्पापहं देवेन्द्रप्रमुखैः प्रशंसियशसं देदीप्यमानं रुचा ॥ सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं संरक्तारुणलोचनं पवनजं पीताम्बरालङ्कृतम् ॥ १ ॥ वज्राङ्गं पिङ्गके-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाढ्यं स्वर्णकुण्डलमण्डितम् ॥ नियुद्धमुपसंक्रम्य पारावारपराक्रमम् ॥ २ ॥ वामहस्ते गदायुक्तं पाशहस्तं कमण्डलुम् ॥ ऊर्ध्वं दक्षिणदोर्दण्डं हनुमन्तं विचिन्तयेत् ॥ ३ ॥ स्फटिकाभं स्वर्णकान्ति द्विभुजं च कृताञ्जलिम् ॥ कुण्डलद्वयसंशोभिमुखाम्बुजहरिं भजेत् ॥ ४ ॥ हनुमान्पूर्वतः पातु दक्षिणे पवनात्मजः ॥ पातु प्रतीच्यामक्षघ्नः नित्यं सागरपारगः ॥ ५ ॥ उदीच्यामूर्ध्वगः पातु केसरीप्रियनन्दनः ॥ अधस्ताद्विष्णुभक्तश्च पातु माध्ये च पावनिः ॥ ६ ॥ अवान्तरदिशः पातु सीताशोकविनाशनः ॥ लङ्काविदाहकः पातु सर्वापद्भ्यो निरन्तरम् ॥ ७ ॥ सुग्रीवसचिवः पातु मस्तकं वायुनन्दनः ॥ भालं पातु महावीरो भ्रुवोर्मध्ये निरन्तरम् ॥ ८ ॥ नेत्रे छायापहारी च पातु नः प्लवगेश्वरः ॥ कपोलौ कर्णमूले च पातु श्रीरामकिङ्करः ॥ ९ ॥ नासाग्रमञ्जनीसूनुः पातु वक्त्रं कपीश्वरः ॥ पातु कण्ठं च दैत्यारिः स्कन्धौ पातु सुरार्चितः ॥ १० ॥ भुजौ पातु महातेजाः करौ तु चरणायुधः ॥ नखान्नखायुधः पातु कुक्षौ पातु कपीश्वरः ॥ ११ ॥ वक्षो मुद्रापहारी च पार्श्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पातु भुजायुधः ॥ लङ्काविभञ्जकः पातु पृष्ठदेशे निरन्तरम् ॥ १२ ॥ नाभिं च रामदूतश्च कटिं पात्वनिलात्मजः ॥ गुह्यं पातु कवीशस्तु गुल्फौ पातु महाबलः ॥ १३ ॥ अचलोद्धारकः पातु पदौ भास्करसन्निभः ॥ अङ्गान्यमितसत्त्वाढ्यः पातु पादाङ्गुलीः सदा ॥ १४ ॥ सर्वाङ्गानि महाशूरः पातु रोमाणि जाम्बवान् ॥ १५ ॥ हनुमत्कवचं यस्तु पठेद्विद्वान् विचक्षणः ॥ स एव पुरुषश्रेष्ठो भुक्तिं मुक्तिं च विन्दति ॥ १६ ॥ त्रिकालमेककालं वा पठेन्मासत्रयं पुनः ॥ सर्वारिष्टं क्षणे जित्वा स पुमान् श्रियमाप्नुयात् ॥ १७ ॥ अर्धरात्रौ जले स्थित्वा सप्तवारं पठेद्यदि ॥ क्षयापस्मारकुष्ठादितापज्वरनिवारणम् ॥ १८ ॥ अश्वत्थमूलेऽर्कवारे स्थित्वा पठति यः पुमान् ॥ स एव जयमाप्नोति संग्रामेष्वभयं तथा ॥ १९ ॥ यः करे धारयेन्नित्यं सर्वान्कामानवाप्नुयात् ॥ लिखित्वा पूजयेद्यस्तु तस्य ग्रहभयं हरेत् ॥ २० ॥ कारागृहे प्रयाणे च संग्रामे देशविप्लवे ॥ यः पठेद्धनुमत्कवचं तस्य नास्ति भयं तथा ॥ २१ ॥ यो वारांनिधिमल्पपल्वलमिवोल्लङ्घ्य प्रतापान्वितो वैदेहीघनतल्पशोक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हरणो वैकुण्ठभक्तप्रियः ॥ अक्षाद्यूर्जितराक्षसेश्वर-
महादर्पापहारी रणे सोऽयं वानरपुङ्गवोऽवतु सदा
चास्मान्समीरात्मजः ॥ २२ ॥

इति श्रीब्रह्माण्डपुराणे हनुमत्कवचं
सम्पूर्णम् ॥ १ ॥

—०:*:०—

१४६ पञ्चमुखहनुमत्कवचम् ।

श्रीगणेशाय नमः ॥ ॐश्रीपञ्चवदनायाञ्जने-
याय नमः ॥ ॐ अस्य श्रीपञ्चमुखहनुमत्कवचम-
न्त्रस्य ब्रह्मा ऋषिः । गायत्रीच्छन्दः । पञ्चमुखवि-
राडहनुमान् देवता ॥ ह्रीं बीजम् । श्रीः शक्तिः ।
क्रौं कीलकम् । क्रूं कवचम् ॥ क्रैं अस्त्राय फट् इति
दिग्बन्धः ॥ श्रीगरुड उवाच ॥ अथ ध्यानं प्रवक्ष्या-
मि शृणु सर्वाङ्गसुन्दरि ॥ यत्कृतं देवदेवेन ध्यानं
हनुमतः प्रियम् ॥ १ ॥ पञ्चवक्त्रं महाभीमं त्रिप-
ञ्चनयनैर्युतम् ॥ बाहुभिर्दशभिर्युक्तं सर्वकामार्थ-
सिद्धिदम् ॥ २ ॥ पूर्वं तु वानरं वक्त्रं कोटिसूर्यस-
मप्रभम् ॥ दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ॥३॥
अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्युग्रतेजोवपुषं भीषणं भयनाशनम् ॥ ४ ॥ पश्चिमं गारुडं वक्त्रं वक्रतुण्डं महाबलम् ॥ सर्वनागप्रशमनं विषभूतादिकृन्तनम् ॥ ५ ॥ उत्तरं सौकरं कृष्णं दीप्तरूपं नभोपमम् ॥ पातालसिंहवेतालज्वररोगादिकृन्तनम् ॥ ६ ॥ ऊर्ध्वं हयाननं घोरं दानवान्तकरं परम् ॥ येन वक्त्रेण विप्रेन्द्रं तारकाख्यं महासुरम् ॥ ७ ॥ जघान शरणं तस्य सर्वशत्रुहरं परम् ॥ ध्यात्वा पञ्चमुख रुद्रं हनुमन्तं दयानिधिम् ॥ ८ ॥ खड्गं त्रिशूलं खट्वाङ्गं पाशमङ्कुशपर्वतम् ॥ मुष्टिं कौमोदकीं वृक्षं धारयन्तं कमण्डलुम् ॥ ९ ॥ भिन्दिपालं ज्ञानमुद्रां दशभिर्मुनिपुङ्गवम् ॥ एतान्यायुधजालानि धारयन्तं भजाम्यहम् ॥ १० ॥ प्रेतासनोपविष्टं तं सर्वाभरणभूषितम् ॥ दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ॥ ॥ ११ ॥ सर्वाश्चर्यमयं देवं हनुमद्विश्वतोमुखम् ॥ पञ्चास्यमच्युतमनेकविचित्रवर्णवक्त्रं शशाङ्कशिखरं कपिराजवर्यम् ॥ पीताम्बरादिमुकुटैरुपशोभिताङ्गं पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि ॥१२॥ मर्कटेशं महोत्साहं सर्वशत्रुहरं परम् ॥ शत्रुं संहर मां रक्ष श्रीमन्नापदमुद्धर ॥ १३ ॥ ॐ हरिमर्कट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मर्कट मन्त्रमिदं परिलिख्यति लिख्यति वामतले ॥ यदि नश्यति नश्यति शत्रुकुलं यदि मुञ्चति मुञ्चति वामलता ॥ १४ ॥ ॐ हरिमर्कटाय स्वाहा ॥ ॐ नमो भगवते पञ्चवदनाय पूर्वकपिमुखाय सकलशत्रुसंहरणाय स्वाहा ॥ ॐनमो भगवते पञ्चवदनाय दक्षिणमुखाय करालवदनाय नरसिंहाय सकलभूतप्रमथनाय स्वाहा ॥ ॐ नमो भगवते पञ्चवदनाय पश्चिममुखाय गरुडाननाय सकलविपद्धराय स्वाहा॥ ॐ नमो भगवते पञ्चवदनायोत्तरमुखायादिवराहाय सकलसम्पत्कराय स्वाहा ॥ ॐ नमो भगवते पञ्चवदनायोर्ध्वमुखाय हयग्रीवाय सकलजनवशङ्कराय स्वाहा ॥ ॐ अस्य श्री पञ्चमुखहनुमन्मन्त्रस्य श्रीरामचन्द्र ऋषिः ॥ अनुष्टुप्छन्दः ॥ पञ्चमुखवीरहनुमान् देवता ॥ हनुमानिति बीजम् ॥ वायुपुत्र इति शक्तिः ॥ अञ्जनीसुत इति कीलकम् ॥ श्रीरामदूतहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ॥ इति ऋष्यादिकं विन्यस्य ॐअञ्जनीसुताय अङ्गुष्ठाभ्यां नमः ॥ ॐ रुद्रमूर्तये तर्जनीभ्यां नमः ॥ ॐ वायुपुत्राय मध्यमाभ्यां नमः ॥ ॐ अग्निगर्भाय अनामिकाभ्यां नमः ॥ ॐ रामदूताय कनिष्ठिकाभ्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमः ॥ ॐपञ्चमुखहनुमते करतलकरपृष्ठाभ्यां नमः॥ इति करन्यासः ॥ ॐअञ्जनीसुताय हृदयाय नमः ॥ ॐ रुद्रमूर्तये शिरसे स्वाहा ॥ ॐवायुपुत्राय शिखायै वषट् ॥ ॐ अग्निगर्भाय कवचाय हुम् ॥ ॐ रामदूताय नेत्रत्रयाय वौषट् ॥ ॐपञ्चमुखहनुमते अस्त्राय फट् ॥ ॐपञ्चमुखहनुमते स्वाहा ॥ इति दिग्बन्धः॥ अथ हनुध्यान वन्दे वानरनारसिंहखगराट्क्रीडास्ववक्त्रान्वितं दिव्यालङ्करणं त्रिपञ्चनयनं देदीप्यमानं रुचा ॥ हस्ताब्जैरसिखेटपुस्तकसुधाकुम्भांकुशाद्रिं हलं खट्वाङ्गं फणिभूरुहं दशभुजं सर्वारिवीरापहम् ॥ १ ॥ अथ मन्त्रः ॥ ॐ श्रीरामदूतायाञ्जनेयाय वायुपुत्राय महाबलपराक्रमाय सीतादुःखनिवारणाय लङ्कादहनकारणाय महाबलप्रचण्डाय फाल्गुनसखाय कोलाहलसकलब्रह्माण्डविश्वरूपाय सप्तसमुद्रनिलङ्घनाय पिङ्गलनयनायामितविक्रमाय सूर्यबिम्बफलसेवनाय दुष्टनिवारणाय दृष्टिनिरालङ्कृताय सञ्जीविनीसञ्जीविताङ्गदलक्ष्मणमहाकपिसैन्यप्राणदाय दशकण्ठविध्वंसनाय रामेष्टाय महाफाल्गुनसखाय सीतासहितरामवरप्रदाय षट्प्रयोगागमपञ्चमुखवीरहनुमन्मन्त्रजपे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विनियोगः ॥ ॐ हरिमर्कटमर्कटाय बंबंबंबंबं वौषट् स्वाहा ॥ ॐ हरिमर्कटमर्कटाय फफफफफ फट् स्वाहा ॥ ॐ हरिमर्कटमर्कटाय खेंखेंखेंखेंखें मारणाय स्वाहा ॥ ॐ हरिमर्कटमर्कटाय लुं लुं लुं लुं लुं आकर्षितसकलसम्पत्कराय स्वाहा ॥ ॐ हरिमर्कटमर्कटाय धधधधध शत्रुस्तम्भनाय स्वाहा ॥ ॐ टंटंटंटंटं कूर्ममूर्तये पञ्चमुखीवीरहनुमते परयन्त्रपरतन्त्रोच्चाटनाय स्वाहा ॥ ॐ कंखंगंघंङं चंछंजंझंञं टंठंडंढंणं तंथंदंधंनं पंफंबंभंमं यंरंलंवं शंषंसंहंक्षं स्वाहा ॥ इति दिग्बन्धः ॥ ॐ पूर्वकपिमुखाय पञ्चमुखहनुमते टंटंटंटंटं सकलशत्रुसंहरणाय स्वाहा ॥ ॐ दक्षिणमुखाय पञ्चमुखहनुमते करालवदनाय नरसिंहाय ॐ ह्रांह्रींह्रूंह्रैंह्रौंह्रः सकलभूतप्रेतदमनाय स्वाहा ॥ ॐ पश्चिममुखाय गरुडाननाय पञ्चमुखहनुमते मंमंमंमंमं सकलविषहराय स्वाहा ॥ ॐ उत्तरमुखायादिवराहाय लंलंलंलंलं नरसिंहाय नीलकण्ठमूर्तये पञ्चमुखहनुमते स्वाहा ॥ ॐ ऊर्ध्वमुखाय हयग्रीवाय रुंरुंरुंरुंरुं रुद्रमूर्तये सकलप्रयोजननिर्वाहकाय स्वाहा ॥ ॐ अञ्जनीसुताय वायुपुत्राय महाबलाय सीताशोकनिवारणाय श्रीरामचन्द्रकृपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुकाय महावीर्यप्रमथनाय ब्रह्माण्डनाथाय कामदाय पञ्चमुखवीरहनुमते स्वाहा ॥ ॐ भूतप्रेतपिशाचब्रह्मराक्षसशाकिनीडाकिन्यन्तरिक्षग्रहपरयन्त्रपरतन्त्रो‐च्चाटनाय स्वाहा ॥ ॐ सकलप्रयोजननिर्वाहकाय पञ्चमुखवीरहनुमते श्रीरामचन्द्रवरप्रसादाय जंजंजंजंजं स्वाहा ॥ इदं कवचं पठित्वा तु महाकवचं पठेन्नरः ॥ एकवारं जपेत्स्तोत्रं सर्वशत्रुनिवारणम् ॥ १५ ॥ द्विवारं च पठेन्नित्यं पुत्रपौत्रप्रवर्धनम् ॥ त्रिवारं च पठेन्नित्यं सर्वसम्पत्करं शुभम् ॥ १६ ॥ चतुर्वारं पठेन्नित्यं सर्वरोगनिवारणम् ॥ पञ्चवारं पठेन्नित्यं सर्वदेववशङ्करम् ॥ १७ ॥ षड्वारं च पठेन्नित्यं सर्वदेववशङ्करम् ॥ सप्तवारं पठेन्नित्यं सर्वसौभाग्यदायकम् ॥ १८ ॥ अष्टवारं पठेन्नित्यमिष्टकामार्थसिद्धिदम्॥ नववारं पठेन्नित्यं राजभोगमवाप्नुयात् ॥ १९ ॥ दशवारं पठेन्नित्यं त्रैलोक्यज्ञानदर्शनम् ॥ रुद्रावृत्तिं पठेन्नित्यं सर्वसिद्धिर्भवेद्ध्रुवम् ॥ २० ॥

इति श्रीसुदर्शनसंहितायां पंञ्चमुखहनुमत्कवचं सम्पूर्णम् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१५० एकादशमुखहनुमत्कवचम् ।

श्रीगणेशाय नमः ॥ लोपामुद्रोवाच ॥ कुम्भोद्भव दयासिन्धो श्रुतं हनुमतः परम् ॥ यन्त्रमन्त्रादिकं सर्वं त्वन्मुखोदीरितं मया ॥ १ ॥ दयां कुरु मयि प्राणनाथ वेदितुमुत्सहे ॥ कवचं वायुपुत्रस्य एकादशमुखात्मनः ॥ २ ॥ इत्येवं वचनं श्रुत्वा प्रियायाः प्रश्रयान्वितम् ॥ वक्तुं प्रचक्रमे तत्र लोपामुद्रां प्रति प्रभुः ॥ ३ ॥ अगस्त्य उवाच ॥ नमस्कृत्वा रामदूतं हनुमन्तं महामतिम् ॥ ब्रह्मप्रोक्तं तु कवचं शृणु सुन्दर सादरम् ॥ ४ ॥ सनन्दनाय सुमहच्चतुरानन भाषितम् ॥ कवचं कामदं दिव्यं सर्वरक्षोनिबर्हणम् ॥ ५ ॥ सर्वसम्पत्प्रदं दिव्यं मर्त्यानां मधुरस्वरे ॥ ॐ अस्य श्रीकवचस्यैकादशवक्त्रस्य धीमतः ॥ ६ ॥ हनुमत्कवचमन्त्रस्य सनन्दन ऋषिः स्मृतः ॥ प्रसन्नात्मा हनूमांश्च देवताऽत्र प्रकीर्तितः ॥ ७ ॥ छन्दोऽनुष्टुप् समाख्यातं बीजं वायुसुतस्तथा ॥ मुख्यः प्राणः शक्तिरिति विनियोगः प्रकीर्तितः ॥ ८ ॥ सर्वकामार्थसिद्ध्यर्थं जपमेवमुदीरयेत् ॥ ॐ स्फें बीजं शक्तिधृक् पातु शिरो मे पवनात्मजः ॥ ९ ॥ क्रौं बीजात्मा नयनयोः पातु मां वानरेश्वरः ॥ क्षं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बीजरूपी कर्णौ मे सीताशोकविनाशनः ॥ १० ॥
ग्लौं बीजवाच्यो नासां मे लक्ष्मणप्राणदायकः ॥ वं
बीजार्थश्च कण्ठं मे पातु चाक्षयकारकः ॥ ११ ॥
रां बीजवाच्यो हृदयं पातु मे कपिनायकः ॥ वं
बीजकीर्तितः पातु बाहू मे चाञ्जनीसुतः ॥ १२ ॥
ह्रीं बीजं राक्षसेन्द्रस्य दर्पहा पातु चोदरम् ॥ ह्रं सौ
बीजमयो मध्यं पातु लङ्काविदाहकः ॥१३॥ ह्रीं बी-
जधरः पातु गुह्यं देवेन्द्रवन्दितः ॥ रं बीजात्मा सदा
पातु चोरू मे वार्धिलङ्घनः ॥ १४ ॥ सुग्रीवसचिवः
पातु जानुनी मे मनोजवः ॥ पादौ पादतले पातु
द्रोणाचलधरो हरिः ॥ १५ ॥ आपादमस्तकं पातु
रामदूतो महाबलः ॥ पूर्वे वानरवक्त्रो मामाग्नेय्यां
क्षत्रियान्तकृत् ॥ १६ ॥ दक्षिणे नारसिंहस्तु नैरृत्यां
गणनायकः ॥ वारुण्यां दिशि मामव्यात् खगवक्त्रो
हरीश्वरः ॥ १७ ॥ वायव्यां भैरवमुखः कौवेर्यां पातु
मां सदा ॥ क्रोडास्यः पातु मां नित्यमीशान्यां रुद्र-
रूपधृक् ॥ १८ ॥ ऊर्ध्वं हयाननः पातु त्वधः शेष-
मुखस्तथा ॥ रामास्यः पातु सर्वत्र सौम्यरूपो महा-
भुजः ॥१९॥ इत्येवं रामदूतस्य कवचं प्रपठेत्सदा ॥
एकादशमुखस्यैतद्गोप्यं ते कीर्तितं मया ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रक्षोघ्नं कामदं सौम्यं सर्वसम्पद्विधायकम् ॥ पुत्रदं धनदं चोग्रशत्रुसङ्घविमर्दनम् ॥ २१ ॥ स्वर्गापवर्गदं दिव्यं चिन्तितार्थप्रदं शुभम् ॥ एतत्कवचमज्ञात्वा मन्त्रसिद्धिर्न जायते ॥ २२ ॥ चत्वारिंशत्सहस्राणि पठेच्छुद्धात्मना नरः एकवारं पठेन्नित्यं कवचं सिद्धिदं पुमान् ॥ २३ ॥ द्विवारं वा त्रिवारं वा पठन्नायुष्यमाप्नुयात् ॥ क्रमादेकादशादेवमावर्तन-जपात्सुधीः ॥ २४ ॥ वर्षान्ते दर्शनं साक्षाल्लभते नात्र संशयः ॥ यं यं चिन्तयते चार्थं तं तं प्राप्नोति पूरुषः ॥ ५ ॥ ब्रह्मोदीरितमेतद्धि तवाग्रे कथितं महत् ॥ २६ ॥ इत्येवमुक्त्वा वचनं महर्षिस्तूष्णीं-बभूवेन्दुमुखीं निरीक्ष्य ॥ संहृष्टचित्ताऽपि तदा तदीयपादौ ननामातिमुदा स्वभर्तुः ॥ २६ ॥ अथ मन्त्रः ॥ ॐ स्फेंक्रौं क्षां ग्लौं वं रां वां ह्रां ह्रौं ह्रीं रं स्फें क्रों क्षौं ग्नां त्रीं क्षौं हुं हां ह्रौं ह्रीं रं ॥

इत्यगस्त्यसंहितायामेकादशमुखहनुमत्कवचं सम्पूर्णम् ॥ ३ ॥

१५१ श्रीमनुमल्लाङ्गूलास्त्रस्तोत्रम् ।

श्रीगणेशाय नमः ॥ हनुमन्नञ्जनीसूनोमहा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बलपराक्रम ॥ लोललाङ्गूलपातेन ममारातीन्निपातय ॥ १ ॥ मर्कटाधिप मार्तण्डमण्डलग्रासकारक ॥ लोललाङ्गूलपातेन ममारातीन्निपातय ॥२॥ अक्षक्षपण पिङ्गाक्ष क्षितिशोकक्षयङ्कर ॥ लोल० ॥ ३ ॥ रुद्रावतार संसारदुःखभारापहारक ॥ लोल० ॥ ४ ॥ श्रीरामचरणाम्भोजमधुपायतमानस ॥ लोल० ॥ ५ ॥ वालिकोपद्रवक्लान्तसुग्रीवोन्मोचन प्रभो ॥ लोल० ॥ ६ ॥ सीताविरहवारीशमग्नसीतेशतारक ॥ लोल० ॥ ७ ॥ रक्षोराजप्रतापाग्निदह्यमानजगद्वन ॥ लोल० ॥ ८ ॥ ग्रस्ताशेषजगत्स्वास्थ्य राक्षसाम्भोधिमन्दर ॥ लोल० ॥ ९ ॥ पुच्छगुच्छस्फुरद्भूमिजगद्दग्धारिपत्तन ॥ लोल० ॥ १० ॥ जगन्मनोदुरुल्लङ्घ्य पारावाराविलङ्घन ॥ लोल० ॥ ११ ॥ स्मृतमात्रसमस्तेष्टपूरक प्रणतप्रिय ॥ लोल० ॥ १२ ॥ रात्रिञ्चरचमूराशिकर्तनैकविकर्तन ॥ लोल० ॥ जानक्या जानकीजानेः प्रेमपात्र परन्तप ॥ लोल० ॥ १४ ॥ भीमादिकमहाभीमवीरावेशावतारक ॥ लोल ॥१५॥ वैदेहीविरहक्लान्तरामरोषैकविग्रह ॥ लोल० ॥ १६ ॥ वज्राङ्गनखदंष्ट्रेश वज्रिवज्राव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुण्ठन ॥ लोल० ॥१७॥ अखर्वगर्वगन्धर्वपर्वतोद्भे-दनस्वर ॥ लोल० ॥ १८ ॥ लक्ष्मणप्राणसन्त्राणत्रातः तीक्ष्णकरान्वयः ॥ लोल० ॥ १९ ॥ रामाधिर्विप्रयोगार्त भरताद्यर्तिनाशन ॥ लोल० ॥ २० ॥ द्रोणाचलसमुत्क्षेपसमुत्क्षिप्तारिवैभव ॥ लोल० ॥ २१ ॥ सीताशीर्वादसम्पन्न समस्तावयवेक्षित ॥ लोललाङ्गूलपातेन ममारातीन्निपातय ॥ २२ ॥ इत्येवमश्वत्थतलोपविष्टः शत्रुञ्जयन्नाम पठेत्स्तवं यः ॥ स शीघ्रमेवास्तसमस्तशत्रुः प्रमोदते मारुतजप्रसादात् ॥ २३ ॥

इति श्रीहनुमल्लांगूलास्त्रस्तोत्रम् ॥ ४ ॥

---

१५२ श्रीहनुमदष्टकम् ।

श्रीगणेशाय नमः ॥ श्रीरघुराजपदाब्जनिकेतन पङ्कजलोचन मङ्गलराशे चण्डमहाभुजदण्डसुरारिविखण्डनपण्डित पाहि दयालो ॥ पातकिनं च समुद्धर मां महतां हि सतामपि मानमुदारं त्वां भजतो मम देहि दयाधन हे हनुमत्स्वपदाम्बुजदास्यम् ॥ १ ॥ संसृतितापमहानलदग्धतनूरुहम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेतनोरतिवेलं पुत्रधनस्वजनात्मगृहादिषु सक्तम-
तेरतिकिल्बिषमूर्तेः ॥ केनचिदप्यमलेन पराकृत-
पुण्यसुपुञ्जलवेन विभो वै त्वां भजतो० ॥ २ ॥
संसृतिकूपमनल्पमघौघनिदाघनिदानमजस्रमशेषं
प्राप्य सुदुःखसहस्रभुजङ्गविषैकसमाकुलसर्वत-
नोर्मे ॥ घोरमहाकृपणापदमेव गतस्य हरे पति-
तस्य भवाब्धौ त्वां भजतो० ॥ ३ ॥ संसृतिसिन्धु-
विशालकरालमहाबलकालझषग्रसनार्तं व्यग्रसमग्र-
धियं कृपणं च महामदनक्रसुवक्रहृतासुम् ॥ काल-
महारसनोर्मिनिपीडितमुद्धर दीनमनन्यगतिं मां
त्वां भजतो० ॥ ४ ॥ संसृतिघोरमहागहने चरतो
मणिरञ्जितपुण्यसमूर्तेः मन्मथभीकरघोरमहोग्रमृग-
प्रवरार्दितगात्रसुसन्धेः ॥ मत्सरशापविशेषनिपी
डितबाह्यमतेश्च कथञ्चिदमेयं त्वां भजतो० ॥ ५ ॥
संसृतिवृक्षमनेकशताघनिदानमनन्तविकर्मसुशाखं
दुःखफलं करणादिपलाशमनङ्गसुपुष्पमचिन्त्यसुमू-
लम् ॥ तं ह्यधिरुह्य हरे पतितं शरणागतमाशु
विमोचय मूढं त्वां भजतो० ॥ ६ ॥ संसृतिपन्नग-
वक्त्रभयङ्करदंष्ट्रमहाविषदग्धशरीरं प्राणविनिर्गम-
भीतिसमाकुलमन्धमनाथमतीव विषण्णम् ॥ मो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हमहाकुहरे पतितं दययोद्धर मामजितेन्द्रियकामं त्वां भजतो० ॥ ७॥ इन्द्रियनामकचौरगणैर्हृततत्त्व-विवेकमहाधनराशिं संसृतिजालनिपातितमेव महाबलिभिश्च विखण्डितकायम् ॥ त्वत्पदपद्ममनुत्तममाश्रितमाशु कपीश्वर पाहि कृपालो त्वां भजतो० ॥ ८ ॥ ब्रह्ममरुद्गणरुद्रमहेन्द्रकिरीटसुकोटिलसत्पदपीठं दाशरथिं जपति क्षितिमण्डल एष निधाय सदैव हृदब्जे ॥ तस्य हनूमत एव शिवङ्करमष्टकमेतदनिष्टहरं वै यः सततं हि पठेत्स नरो लभतेऽच्युतरामपदाब्जनिवासम् ॥ ९ ॥

इति मधुसूदनाश्रमशिष्याच्युतविरचित
श्रीमद्धनुमदष्टकं सम्पूर्णम् ॥ ५ ॥

---

१५३ हनुमद्वडवानलस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ॐ अस्य श्रीहनुमद्वडवानलस्तोत्रमन्त्रस्य श्रीरामचन्द्र ऋषिः ॥ श्रीवडवानलहनुमान् देवता ॥ मम समस्तरोगप्रशमनार्थं सीतारामचन्द्रप्रीत्यर्थं हनुमद्वडवानलस्तोत्रजपमहं करिष्ये । ॐ ह्रां ह्रीं ॐ नमो भगवते श्री-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महाहनुमते प्रकटपराक्रम सकलदिङ्मण्डलयशोवितानधवलीकृतजगत्त्रितय वज्रदेह रुद्रावतार लङ्कापुरीदहन उमाअनलमन्त्र उदधिबन्धन दशशिरःकृतान्तक सीताश्वसन वायुपुत्र अञ्जनीगर्भसम्भूत श्रीरामलक्ष्मणानन्दकरकपिसैन्यप्राकार सुग्रीवसाहाय्यरणपर्वतोत्पाटन कुमारब्रह्मचारिन् गम्भीरनाद सर्वपापग्रहवारण सर्वज्वरोच्चाटन डाकिनीविध्वंसन ॐ ह्रां ह्रीं ॐ नमो भगवते महावीरवीराय सर्वदुःखनिवारणाय ग्रहमण्डलसर्वभूतमण्डलसर्वपिशाचमण्डलोच्चाटन भूतज्वरएकाहिकज्वरद्व्याहिकज्वरत्र्याहिकज्वरचातुर्थिकज्वरसन्तापज्वरविषमज्वरतापज्वरमाहेश्वरवैष्णव - ज्वरान् छिन्धि छिन्धि यक्षब्रह्मराक्षसभूतप्रेतपिशाचान् उच्चाटय उच्चाटय ॐ ह्रां श्रीं ॐ नमो भगवते श्रीमहाहनुमते ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः आं हां हां हां हां औं सौं एहि एहि एहि ॐ हं ॐ हं ॐ हं.ॐ नमो भगवते श्रीमहाहनुमते श्रवणचक्षुर्भूतानां शाकिनीडाकिनीनां विषमदुष्टानां सर्वविषं हर हर आकाशभुवनं भेदय भेदय छेदय छेदय मारय मारय शोषय शोषय मोहय मोहय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्वालय ज्वालय प्रहारय प्रहारय सकलमायां भेदय भेदय ॐ ह्रां ह्रीं ॐ नमो भगवते महाहनुमते सर्वग्रहोच्चाटन परबलं क्षोभय क्षोभय सकलबन्धनमोक्षणं कुरु कुरु शिरःशूलगुल्मशूलान्निर्मूलय निर्मूलय नागपाशानन्तवासुकितक्षककर्कोटककालियान् यक्षकुलजलगतबिलगतरात्रिञ्चरदिवाचरसर्पान्निर्विषं कुरु कुरु स्वाहा । राजभयचोरभयपरमन्त्रपरयन्त्रपरतन्त्रपरविद्याश्छेदय छेदय स्वमन्त्रस्वतन्त्रस्वविद्याः प्रकटय प्रकटय सर्वारिष्टान्नाशय नाशय सर्वशत्रून्नाशय नाशय असाध्यं साधय हुं फट् स्वाहा ॥

इति विभीषणकृतं हनुमद्वडवानल स्तोत्रं समाप्तम् ॥ ६ ॥

१५४ विभीषणकृतहनुमत्स्तोत्रम् ।

श्रीगणेशाय नमः ॥ नमो हनुमते तुभ्यं नमो मारुतसूनवे ॥ नमः श्रीरामभक्ताय श्यामास्याय च ते नमः ॥ १ ॥ नमो वानरवीराय सुग्रीवसख्यकारिणे ॥ लङ्काविदाहनार्थाय हेलासागरतारिणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सीताशोकविनाशाय राममुद्राधराय च ॥ रावणान्तकुलच्छेदकारिणे ते नमो नमः ॥ ३ ॥ मेघनादमखध्वंसकारिणे ते नमो नमः ॥ अशोकवनविध्वंसकारिणे भयहारिणे ॥ ४ ॥ वायुपुत्राय वीराय आकाशोदरगामिने ॥ वनपालशिरश्छेदलङ्काप्रासादभञ्जिने ॥ ५ ॥ ज्वलत्कनकवर्णाय दीर्घलाङ्गूलधारिणे ॥ सौमित्रिजयदात्रे च रामदूताय ते नमः ॥ ६ ॥ अक्षस्य वधकर्त्रे च ब्रह्मपाशनिवारिणे ॥ लक्ष्मणाङ्गमहाशक्तिघातक्षतविनाशिने ॥७॥ रक्षोघ्नाय रिपुघ्नाय भूतघ्नाय च ते नमः ॥ ऋक्षवानरवीरौघप्राणदाय नमो नमः ॥ ८ ॥ परसैन्यबलघ्नाय शस्त्रास्त्रघ्नाय ते नमः ॥ विषघ्नाय द्विषघ्नाय ज्वरघ्नाय च ते नमः ॥ ९ ॥ महाभयरिपुघ्नाय भक्तत्राणैककारिणे ॥ परप्रेरितमन्त्राणां यन्त्राणां स्तम्भकारिणे ॥ १० ॥ पयःपाषाणतरणकारणाय नमो नमः ॥ बालार्कमण्डलग्रासकारिणे भवतारिणे ॥११॥ नखायुधाय भीमाय दन्तायुधधराय च ॥ रिपुमायाविनाशाय रामाज्ञालोकरक्षिणे ॥ १२ ॥ प्रतिग्रामस्थितायाथ रक्षोभूतवधार्थिने ॥ करालशैलशस्त्राय द्रुमशस्त्राय ते नमः ॥ १३ ॥ बालैक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मचर्याय रुद्रमूर्तिधराय च ॥ विहङ्गमाय सर्वाय वज्रदेहाय ते नमः ॥ १४ ॥ कौपीनवाससे तुभ्यं रामभक्तिरताय च ॥ दक्षिणाशाभास्कराय शतचन्द्रोदयात्मने ॥ १५ ॥ कृत्याक्षतव्यथाघ्नाय सर्वक्लेशहराय च ॥ स्वाम्याज्ञापार्थसंग्रामसंख्ये सञ्जयधारिणे ॥ १६ ॥ भक्तान्तदिव्यवादेषु सङ्ग्रामे जयदायिने ॥ किल्किलाबुबुकोच्चारघोरशब्दकराय च ॥ १७ ॥ सर्पाग्नव्याधिसंस्तम्भकारिणे वनचारिणे सदा वनफलाहारसंतृप्ताय विशेषतः ॥१८॥ महार्णवशिलाबद्धसेतुबन्धाय ते नमः ॥ वादे विवादे संग्रामे भये घोरे महावने ॥ १९ ॥ सिंहव्याघ्रादिचौरेभ्यः स्तोत्रपाठाद्भयं न हि ॥ दिव्ये भूतभये व्याधौ विषे स्थावरजङ्गमे ॥ २० ॥ राजशस्त्रभये चोग्रे तथा ग्रहभयेषु च ॥ जले सर्पे महावृष्टौ दुर्भिक्षे प्राणसम्प्लवे ॥ २१ ॥ पठेत्स्तोत्रं प्रमुच्येत भयेभ्यः सर्वतो नरः ॥ तस्य क्वापि भयं नास्ति हनुमत्स्तवपाठतः ॥ २२ ॥ सर्वदा वै त्रिकालं च पठनीयमिमं स्तवम् ॥ सर्वान्कामानवाप्नोति नात्र कार्या विचारणा ॥ २३ ॥ विभीषणकृतं स्तोत्रं ताक्ष्येण समुदीरितम् ॥ ये पठिष्यन्ति भक्त्या वै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धयस्तत्करे स्थिताः ॥ २४ ॥

इति श्रीसुदर्शनसंहितायां विभीषणगरुड-
संवादे विभीषणकृतं श्रीहनुमत्स्तोत्रं
सम्पूर्णम् ॥ ८ ॥

—:—:—

१५५ मारुतिस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ॐ नमो भगवते विचित्रवीरहनुमते प्रलयकालानलप्रभाप्रज्वलनाय । प्रतापवज्रदेहाय । अञ्जनीगर्भसम्भूताय । प्रकटविक्रमवीरदैत्यदानवयक्षरक्षोगणग्रहबन्धनाय । भूतग्रहबन्धनाय । प्रेतग्रहबन्धनाय । पिशाचग्रहबन्धनाय । शाकिनीडाकिनीग्रहबन्धनाय । काकिनीमाकिनीग्रहबन्धनाय । ब्रह्मग्रहबन्धनाय । ब्रह्मराक्षसग्रहबन्धनाय । चोरग्रहबन्धनाय । मारीग्रहबन्धनाय । एहि एहि । आगच्छ आगच्छ । आवेशय आवेशय । मम हृदये प्रवेशय प्रवेशय । स्फुर स्फुर । प्रस्फुर प्रस्फुर । सत्यं कथय । व्याघ्रमुखबन्धन । सर्पमुखबन्धन । राजमुखबन्धन । नारीमुखबन्धन । सभामुखबन्धन । शत्रुमुखबन्धन । सर्वमुख-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बन्धन । लङ्काप्रासादभञ्जन । (अमुकं) मे वशमानय । क्लीं क्लीं क्लीं ह्रीं श्रीं श्रीं राजानं वशमानय । श्रीं ह्रीं क्लीं स्त्रीणां आकर्षय आकर्षय शत्रून् मर्दय मर्दय मारय मारय चूर्णय चूर्णय खे खे श्रीरामचन्द्राज्ञया मम कार्यसिद्धिं कुरु कुरु ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः फट् स्वाहा । विचित्रवीर हनुमन् मम सर्वशत्रून् भस्मीकुरु कुरु । हन हन हुं फट् स्वाहा । एकादशशतवारं जपित्वा सर्वशत्रून् वशमानयति नान्यथा इति ॥

इति मारुतिस्तोत्रं समाप्तम् ॥

॥ इति हनुमत्स्तोत्राणि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीदत्तात्रेयस्तोत्राणि ।

१५६ दत्तात्रेयस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जटाधरं पाण्डुराङ्गं शूलहस्तं कृपानिधिम् ॥ सर्वरोगहरं देवं दत्तात्रेयमहं भजे ॥ १ ॥ अस्य श्रीदत्तात्रेयस्तोत्रमन्त्रस्य भगवान्नारद ऋषिः ॥ अनुष्टुप्छन्दः ॥ श्रीदत्तः परमात्मा देवता ॥ श्रीदत्तप्रीत्यर्थे जपे विनियोगः ॥ जगदुत्पत्तिकर्त्रे च स्थितिसंहारहेतवे ॥ भवपाशविमुक्ताय दत्तात्रेय नमोऽस्तु ते ॥ १ ॥ जराजन्मविनाशाय देहशुद्धिकराय च ॥ दिगम्बर दयामूर्ते दत्तात्रेय० ॥ २ ॥ कर्पूरकान्तिदेहाय ब्रह्ममूर्तिधराय च ॥ वेदशास्त्रपरिज्ञाय दत्तात्रेय० ॥ ३ ॥ ह्रस्वदीर्घकृशस्थूलनामगोत्रविवर्जित ॥ पञ्चभूतप्रदीप्ताय दत्तात्रेय० ॥ ४ ॥ यज्ञभोक्त्रे च यज्ञाय यज्ञरूपधराय च ॥ यज्ञप्रियाय सिद्धाय दत्तात्रेय० ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आदौ ब्रह्मा मध्ये विष्णुरन्ते देवः सदाशिवः॥ मूर्तित्रयस्वरूपाय दत्तात्रेय० ॥ ६ ॥ भोगालयाय भोगाय योगयोग्याय धारिणे। जितेन्द्रियजितज्ञाय दत्तात्रेय० ॥ ७ ॥ दिगम्बराय दिव्याय दिव्यरूपधराय च॥ सदोदितपरब्रह्म दत्तात्रेय० ॥ ८ ॥ जम्बूद्वीपे महाक्षेत्रे मातापुरनिवासिने॥ जयमान सतां देव दत्तात्रेय० ॥ ९ ॥ भिक्षाटनं गृहे ग्रामे पात्रे हेममयं करे॥ नानास्वादमयी भिक्षा दत्तात्रेय० ॥ १० ॥ ब्रह्मज्ञानमयी मुद्रा वस्त्रे चाकाशभूतले॥ प्रज्ञानघनबोधाय दत्तात्रेय० ॥ ११ ॥ अवधूत सदानन्द परब्रह्मस्वरूपिणे। विदेहदेहरूपाय दत्तात्रेय० ॥ १२ ॥ सत्यरूप सदाचार सत्यधर्मपरायण॥ सत्याश्रय परोक्षाय दत्तात्रेय० ॥ १३ ॥ शूलहस्त गदापाणे वनमालासुकन्धर॥ यज्ञसूत्रधर ब्रह्मन् दत्तात्रेय० ॥ १४ ॥ क्षराक्षरस्वरूपाय परात्परतराय च॥ दत्तमुक्तिपरस्तोत्र दत्तात्रेय० ॥ १५ ॥ दत्तविद्याढ्यलक्ष्मीशदत्तस्वात्मस्वरूपिणे॥ गुणनिर्गुणरूपाय दत्तात्रेय० ॥ १६ ॥ शत्रुनाशकरं स्तोत्रं ज्ञानविज्ञानदायकम्॥ सर्वपापं शमं याति दत्तात्रेय० ॥ १७ ॥ इदं स्तोत्रं महद्दिव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीदत्तात्रेयस्तोत्राणि ।

१५६ दत्तात्रेयस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जटाधरं पाण्डुराङ्गं शूल-हस्तं कृपानिधिम् ॥ सर्वरोगहरं देवं दत्तात्रेयमहं भजे ॥ १ ॥ अस्य श्रीदत्तात्रेयस्तोत्रमन्त्रस्य भगवान्नारद ऋषिः ॥ अनुष्टुप्छन्दः ॥ श्रीदत्तः परमात्मा देवता ॥ श्रीदत्तप्रीत्यर्थे जपे विनियोगः ॥ जगदुत्पत्तिकर्त्रे च स्थितिसंहारहेतवे ॥ भवपाशविमुक्ताय दत्तात्रेय नमोऽस्तु ते ॥ १ ॥ जराजन्मविनाशाय देहशुद्धिकराय च ॥ दिगम्बर दयामूर्ते दत्तात्रेय० ॥ २ ॥ कर्पूरकान्तिदेहाय ब्रह्ममूर्तिध-च ॥ वेदशास्त्रपरिज्ञाय दत्तात्रेय० ॥ ३ ॥ ह्रस्वदीर्घ-कृशस्थूलनामगोत्रविवर्जित ॥ पञ्चभूतप्रदीप्ताय दत्तात्रेय० ॥ ४ ॥ यज्ञभोक्त्रे च यज्ञाय यज्ञरूपधराय च ॥ यज्ञप्रियाय सिद्धाय दत्तात्रेय० ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आदौ ब्रह्मा मध्ये विष्णुरन्ते देवः सदाशिवः ॥ मूर्तित्रयस्वरूपाय दत्तात्रेय० ॥ ६ ॥ भोगालयाय भोगाय योगयोग्याय धारिणे । जितेन्द्रियजितज्ञाय दत्तात्रेय० ॥ ७ ॥ दिगम्बराय दिव्याय दिव्यरूपधराय च ॥ सदोदितपरब्रह्म दत्तात्रेय० ॥ ८ ॥ जम्बूद्वीपे महाक्षेत्रे मातापुरनिवासिने ॥ जयमान सतां देव दत्तात्रेय० ॥ ९ ॥ भिक्षाटनं गृहे ग्रामे पात्रे हेममयं करे ॥ नानास्वादमयी भिक्षा दत्तात्रेय० ॥ १० ॥ ब्रह्मज्ञानमयी मुद्रा वस्त्रे चाकाशभूतले ॥ प्रज्ञानघनबोधाय दत्तात्रेय० ॥ ११ ॥ अवधूत सदानन्द परब्रह्मस्वरूपिणे । विदेहदेहरूपाय दत्तात्रेय० ॥ १२ ॥ सत्यरूप सदाचार सत्यधर्मपरायण ॥ सत्याश्रय परोक्षाय दत्तात्रेय० ॥ १३ ॥ शूलहस्त गदापाणे वनमालासुकन्धर ॥ यज्ञसूत्रधर ब्रह्मन् दत्तात्रेय० ॥ १४ ॥ क्षराक्षरस्वरूपाय परात्परतराय च ॥ दत्तमुक्तिपरस्तोत्र दत्तात्रेय० ॥ १५ ॥ दत्तविद्याढ्यलक्ष्मीशदत्तस्वात्मस्वरूपिणे ॥ गुणनिर्गुणरूपाय दत्तात्रेय० ॥ १६ ॥ शत्रुनाशकरं स्तोत्रं ज्ञानविज्ञानदायकम् ॥ सर्वपापं शमं याति दत्तात्रेय० ॥ १७ ॥ इदं स्तोत्रं महद्दिव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दत्तप्रत्यक्षकारकम् ॥ दत्तात्रेयप्रसादाच्च नारदेन प्रकीर्तितम् ॥ १६ ॥

इति श्रीनारदपुराणे नारदविरचितं दत्तात्रेयस्तोत्रं सम्पूर्णम् ॥ १ ॥

—०:०—

१५७ श्रीगुरुराजस्तवः ।

श्रीसद्गुरवे नमः ॥ सद्गुरुं भज सद्गुरुं भज बुद्धिमन् येन संसृतिपारमेष्यसि मुक्त इत्यपि गास्यसे ॥ आसुरीं त्यज सम्पदं विपदां पदं मुनिगर्हितां तर्हि तां भज सम्पदं मुनिसंस्तुतां भगवत्प्रियाम् ॥ १ ॥ गर्वपर्वतमस्तके तव संस्थितिर्नहि शोभते पापमेष्यसि घात कर्मणि युज्यसे न तु पूज्यसे ॥ तात्त्विकं फलमश्नुषे यदि सत्यवृत्तपरायणो दनुजसूनुरिवामरद्रुमगर्हणं भगवत्पदम् ॥२॥ दम्भमार्गपरायणं यदि सत्फलाय भवत्यहो इल्वलादिकृताऽपि विप्रवरार्चना विषमा कथम् ॥ कष्टमेष्यसि दुष्टबुद्धिपरायणो यदि चान्तरे मृष्टमृष्टपरं पदं तव दूरतः स्तवकर्मणाम् ॥ ३ ॥ मुक्ताऽपि सुमुक्तता कपटौघमूलनिकृन्तनी न्यतिरर्भ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कता तथा यदि नास्ति जन्म निरर्थकम् ॥ केषु ते गणना भवेद्वद विन्नवेद्यसमान्तरे भासुरं जनजन्म शर्म निरर्थकं कुरुषे कुतः ॥ ४ ॥ साधुचित्तविखण्डनाद्भगवत्प्रियावपिदानवौ तत्र साधुविघर्षणादपि राक्षसौ मुनिभक्षकौ ॥ तेन हीनबलावथो नृपनामदूषकराक्षसौ कृष्णहिंसनतत्परावििति कर्मणो गहना गतिः ॥ ५ ॥ ब्रह्मनिष्ठविमाननान्निजसूनुगीतहरेः परे द्वेष आविरभूद्भवग्रहमान्त्रिके निजसेविते ॥ दानवस्य च दानधर्मपरायणस्य च रक्षसः शैवधर्मरतस्य मूलविनाशनेऽप्यघनाशने ॥ ६ ॥ जीवतामपहापयञ्छिवतां दिशत्यतिकौशलात्पूर्ववत्स्थितविश्वमेष तिरस्करोत्यतिलीलया ॥ तं गुरुं भज कष्टमोचनकारकं भवतारकं तत्र शात्रवमत्र यच्छति वृक्षतां पितृकानने ॥ ७ ॥ श्रीगुरोः पदपङ्कजं भजतां सतां सततं हरिः सन्निधाविति सर्वशासनसारमेतदुदीरितम् ॥ तन्महत्त्वमहाम्बुधेरपरं तटं न हि केचन प्राप्नुवन्ति परावरज्ञाः पण्डिताः सनकादयः ॥ ८ ॥ शब्दमूलमहो गुरुः शिवजीवविश्वभिदास्पदं विश्वजीवशिवादिना मत एष एव हि बुध्यते ॥ वाच्यकोटिनिविष्टमेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हि तत्त्रयं कृतपत्त्रयं लक्ष्यभूतवपुर्गुरुस्तमु जानते न हि केचन ॥ ९ ॥ वृत्त्यनाश्रितचित्स्वरूपक एष एव समप्रभो वृत्तिरूढचिदम्बरं खलु जीव ईश इदं जगत् ॥ जन्ममृत्युनियामकः परमेश्वरः स तु भोगभुग्जन्ममृत्युनिवारकः परमेश्वरादतिरिच्यते ॥ १० ॥ ब्रह्मरन्ध्रमदं गुरोर्हृदयं शिवस्य निजास्पदं स्थानमेव हि तत्स्वरूपविनिर्णयाय भवत्फलम् ॥ ह्यद्यतो विषयान्भजत्यथ नैव किञ्चन रन्ध्रगो यच्छति क्रमतः फलं वद मुक्तिदोऽस्त्यनयोर्हि कः ॥ ११ ॥ तत्स्वरूपविमर्शनं गुरुपादुकामनुसंश्रितं तन्मनुस्तु तदीयपूर्णकृपाभरेण हि लभ्यते ॥ लाभतो गुरुणा सहैक्यविमर्शनं परमं पदं तत्र मुक्तिवराङ्गना वृणुते स्वयं निजसम्पदा ॥१२॥ तत्र यो विमुखो नरो निजघातकीर्ति निगद्यते तस्य सम्मुखतां भजन् परमद्वयं भवति क्षणात् ॥ ऋक्श्रुतिः शतधारमित्यपि नौति तां गुरुपादुकां कृष्णभिक्षुरिमं स्तवं पदपङ्कजेऽर्पयते गुरोः ॥ १३ ॥ द्रोणपर्वतवासिने नतशासिने मतिकाशिने हारिणे विपदां सुहुर्मम दायिनेऽखिलसम्पदाम् ॥ सच्चिदादिसुखाभिधाय यतीश्वराय सहस्रशः सन्तु मे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नतयो दयोदकसागराय दिने दिने ॥ १४ ॥ स्तोत्र-मेदतभीष्टसिद्धिदमासुरव्रतहारकं तारकं निजदेशिकेन्द्रपदाब्जयोर्दृढसम्मतेः ॥ यः पठेत्प्रयतः शुचिः सुविचार्य भूरि दिने दिने मुच्यते भवपाशपाशित एवमेव मतिर्मम ॥ १५ ॥

इति श्रीमत्कृष्णानन्दसरस्वतीकृतगुरुराजस्तवः सम्पूर्णः ॥ २ ॥

—:⁂:—

१५८ गुर्वष्टकम् ।

श्रीसद्गुरवे नमः ॥ शरीरं सुरूपं तथा वा कलत्रं यशश्चारु चित्रं धनं मेरुतुल्यम् ॥ मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे ततः किं ततः किं ततः किं ततः किम् ॥ १ ॥ कलत्रं धनं पुत्रपौत्रादि सर्वं गृहं बान्धवा सर्वमेतद्धि जातम् ॥ गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं ततः० ॥ २ ॥ षडङ्गादिवेदो मुखे शास्त्रविद्या कवित्वादि गद्यं सुपद्यं करोति ॥ गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं ततः किं० ॥ १३ ॥ विदेशेषु मान्यः स्वेदेशषु धन्यः सदाचारवृत्तेषु मत्तो न चान्यः गुरोरङ्घ्रि० ॥ ४ ॥ क्षमामण्डले भूपभूपाल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृन्दैः सदा सेवितं यस्य पादारविन्दम् ॥गुरोरङ्घ्रि० ॥ ५ ॥ यशो मे गतं दिक्षु दानप्रतापाज्जगद्वस्तु सर्वं करे यत्प्रसादात् ॥ गुरोरङ्घ्रि० ॥ ६ ॥ न भोगे न योगे न वा वाजिराजौ न कान्तामुखे नैव वित्तेषु चित्तम् ॥ गुरोरङ्घ्रि० ॥ ७ ॥ अरण्ये न वा स्वस्य गेहे न कार्ये न देहे मनो वर्तते मे त्वनर्घ्ये ॥ गुरोरङ्घ्रि० ॥ ८ ॥ अनर्घ्याणि रत्नानि भुक्तानि सम्यक् समालिङ्गिता कामिनी यामिनीषु ॥ गुरोरङ्घ्रि० ॥ ९ ॥ गरोरष्टकं यः पठेत्पुण्यदेही यतिर्भूपतिर्ब्रह्मचारी च गेही ॥ लभेद्वाञ्छितार्थं पदं ब्रह्मसंज्ञं गुरोरुक्तवाक्ये मनो यस्य लग्नम् ॥१०॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यं श्रीमच्छङ्कराचार्यकृतं गुरोरष्टकं सम्पूर्णम् ॥ ३ ॥

---

१५९ दक्षिणामूर्तिगुरुस्तोत्रम् ।

श्रीगणेशाय नमः ॥ विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ॥ यः साक्षीकुरुते प्रबोधसमये स्वात्मानमेवाद्वयं तस्मै श्रीगुरुमूर्तये नम इदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीदक्षिणामूर्तये ॥ १ ॥ बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुनर्मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ॥ मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षि० ॥ २ ॥ यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् । यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ तस्मै श्रीगुरुमूर्तये० ॥३॥ नानाछिद्रघटोदरस्थितमहादीपप्रभाभास्वरं ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते ॥ जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्तस्मै श्रीगुरु० ॥ ४ ॥ देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ॥ मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे तस्मै श्रीगुरु० ॥ ५ ॥ राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ॥ प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते तस्मै श्रीगुरु० ॥ ६ ॥ बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि व्यावृत्तास्वनुवर्तमानमहमित्यन्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्फुरन्तं सदा ॥ स्वात्मानं प्रकटीकरोति भजतां यो
मुद्रया भद्रया तस्मै० ॥ ७ ॥ विश्वं पश्यति कार्य-
कारणतया स्वस्वामिसम्बन्धतः शिष्याचार्यतया
तथैव पितृपुत्राद्यात्मना भेदतः ॥ स्वप्ने जाग्रति वा
य एष पुरुषो मायापरिभ्रामितस्तस्मै श्रीगुरु० ॥ ८ ॥
भूरम्भांस्यनलोऽनिलोम्बरमहर्नाथो हिमांशुः पुमा-
नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ॥
नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभो-
स्तस्मै श्रीगुरु० ॥ ९ ॥ सर्वात्मत्वमिति स्फुटीकृत-
मिदं यस्मादमुष्मिन्स्तवे तेनास्य श्रवणात्तथार्थमन-
नाद्ध्यानाच्च सङ्कीर्तनात् ॥ सर्वात्मत्वमहाविभू-
तिसहितं स्यादीश्वरत्वं स्वतः सिद्ध्येत्तत्पुनरष्टधा
परिणतं चैश्वर्यमव्याहतम् ॥ १० ॥ वटविटपि-
समीपे भूमिभागे निषण्णं सकलमुनिजनानां ज्ञान-
दातारमारात् ॥ त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥ ११ ॥ चित्रं
वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ॥ गुरोस्तु मौनं
व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥ १२ ॥ ॐ
नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ॥ निर्मलाय
प्रशान्ताय दक्षिणामूर्तये नमः ॥ १३ ॥ निधये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वविद्यानां भिषजे भवरोगिणाम् ॥ गुरवे लोकानां दक्षिणामूर्तये नमः ॥ १४ ॥ मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ॥ आचार्येन्द्रं करकलितचिन्मुद्रमानन्दरूपं स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥ १५ ॥

इति श्रीमच्छङ्कराचार्यविरचितं दक्षिणामूर्तिस्तोत्रं सम्पूर्णम् ॥ ४ ॥

---

१६० गुरुवरप्रार्थनापञ्चरत्नस्तोत्रम् ।

श्रीगणेशाय नमः ॥ यं विज्ञातुं भृगुः स्वपितरमुपगतः पञ्चवारं यथावज्ज्ञानादेवामृताप्तेः सततमनुपमं चिद्विवेदादि लब्ध्वा ॥ तस्मै तुभ्यं नमः श्रीहरिहरगुरवे सच्चिदानन्दमुक्तानन्ताद्वैतप्रतीते न कुरु कितवतां पाहि मां दीनबन्धो ॥ १ ॥ यस्माद्दृश्यस्य जन्मस्थितिविलयमिते तैत्तिरीयाः पठन्ति स्वाविद्यामात्रयोगात्सुखशयनतले मुख्यतः स्वप्नवच्च ॥ तस्मै० ॥ २ ॥ यो वेदान्तैकलभ्यः श्रुतिषु नियमितस्तैत्तिरीयैश्च काण्वैरन्यैरप्यानिषेकादुदयपरिमितं चारुसंस्कारभाजम् ॥ तस्मै० ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्फुरन्तं सदा ॥ स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया तस्मै० ॥ ७ ॥ विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ॥ स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितस्तस्मै श्रीगुरु० ॥ ८ ॥ भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमानित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ॥ नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभोस्तस्मै श्रीगुरु० ॥ ९ ॥ सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिन्स्तवे तेनास्य श्रवणात्तथार्थमननाद्ध्यानाच्च सङ्कीर्तनात् ॥ सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः सिद्ध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥ १० ॥ वटविटपिसमीपे भूमिभागे निषण्णं सकलमुनिजनानां ज्ञानदातारमारात् ॥ त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं जननमरणदुःखच्छेददक्षं नमामि ॥ ११ ॥ चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ॥ गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥ १२ ॥ ॐ नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ॥ निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥ १३ ॥ निधये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वविद्यानां भिषजे भवरोगिणाम् ॥ गुरवे सर्वलोकानां दक्षिणामूर्तये नमः ॥ १४ ॥ मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ॥ आचार्येन्द्रं करकलितचिन्मुद्रमानन्दरूपं स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥ १५ ॥

इति श्रीमच्छङ्कराचार्यविरचितं दक्षिणामूर्तिस्तोत्रं सम्पूर्णम् ॥ ४ ॥

---

१६० गुरुवरप्राथनापञ्चरत्नस्तोत्रम् ।

श्रीगणेशाय नमः ॥ यं विज्ञातुं भृगुः स्वपितरमुपगतः पञ्चवारं यथावज्ज्ञानादेवामृताप्तेः सततमनुपमं चिद्विवेदादि लब्ध्वा ॥ तस्मै तुभ्यं नमः श्रीहरिहरगुरवे सच्चिदानन्दमुक्तानन्ताद्वैतप्रतीते न कुरु कितवतां पाहि मां दीनबन्धो ॥ १ ॥ यस्माद्दृश्यस्य जन्मस्थितिविलयमिते वैत्तिरीयाः पठन्ति स्वाविद्यामात्रयोगात्सुखशयनतले सुप्त्यतः स्वप्नवच्च ॥ तस्मै० ॥ २ ॥ यो वेदान्तैकलभ्यः श्रुतिषु नियमितस्तैत्तिरीयैश्च काण्वैरन्यैरप्यानिषेकादुदयपरिमितं चारुसंस्कारभाजम् ॥ तस्मै० ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्मिन्नेवावसन्नाः सकलनिगमवाङ्मौलयः सुप्त-
पुंसि प्रोक्तं तन्नाम यद्वन्निजमहिमगतध्वान्त-
तत्कार्यरूपे ॥ तस्मै० ॥ ४ ॥ चित्त्वात्सङ्कल्पपूर्वं
सृजति जगदिदं योगिवन्मायया यः स्वात्मन्येवा-
द्वितीये परमसुखदृशि स्वप्नवद्भूम्नि नित्ये ॥
तस्मै० ॥ ५ ॥

इत्यच्युतविरचितं गुरुवरप्रार्थनापञ्चरत्न-
स्तोत्रं सम्पूर्णम् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ नवग्रहस्तोत्राणि ।

—:-❀❀-:—

१६१ आदित्यस्तोत्रम् ।

श्रीगणेशाय नमः ॥ नवग्रहाणां सर्वेषां सूर्यादीनां पृथक् पृथक् ॥ पीडा च दुःसहा राजञ्जायते सततं नृणाम् ॥ १ ॥ पीडानाशाय राजेन्द्र नामानि शृणु भास्वतः ॥ सूर्यादीनां च सर्वेषां पीडा नश्यति शृण्वतः ॥ २ ॥ आदित्यः सविता सूर्यः पूषार्कः शीघ्रगो रविः ॥ भगस्त्वष्टाऽर्यमा हंसो हेलिस्तेजोनिधिर्हरिः ॥ ३ ॥ दीनानाथो दिनकरः सप्तसप्तिः प्रभाकरः ॥ विभावसुर्वेदकर्ता वेदाङ्गो वेदवाहनः ॥४॥ हरिदश्वः कालवक्त्रः कर्मसाक्षी जगत्पतिः ॥ पद्मिनीबोधको भानुर्भास्करः करुणाकरः ॥ ५ ॥ द्वादशात्मा विश्वकर्मा लोहिताङ्गस्तमोनुदः ॥ जगन्नाथोऽरविन्दाक्षः कालात्मा कश्यपात्मजः ॥ ६ ॥ भूताश्रयो ग्रहपतिः सर्वलोकनमस्कृतः ॥ जपाकुसु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्मिन्नेवावसन्नाः सकलनिगमवाङ्मौलयः सुप्र-
पुंसि प्रोक्तं तन्नाम यद्वन्निजमहिमगतध्वान्त-
तत्कार्यरूपे ॥ तस्मै० ॥ ४ ॥ चित्वात्सङ्कल्पपूर्वं
सृजति जगदिदं योगिवन्मायया यः स्वात्मन्येवा-
द्वितीये परमसुखदृशि स्वप्नवद्भूम्नि नित्ये ॥
तस्मै० ॥ ५ ॥

इत्यच्युतविरचितं गुरुवरप्रार्थनापञ्चरत्न-
स्तोत्रं सम्पूर्णम् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ नवग्रहस्तोत्राणि ।

—:-❀❀-:—

१६१ आदित्यस्तोत्रम् ।

श्रीगणेशाय नमः ॥ नवग्रहाणां सर्वेषां सूर्यादीनां पृथक् पृथक् ॥ पीडा च दुःसहा राजञ्जायते सततं नृणाम् ॥ १ ॥ पीडानाशाय राजेन्द्र नामानि शृणु भास्वतः ॥ सूर्यादीनां च सर्वेषां पीडा नश्यति शृण्वतः ॥ २ ॥ आदित्यः सविता सूर्यः पूषार्कः शीघ्रगो रविः ॥ भगस्त्वष्टाऽर्यमा हंसो हेलिस्तेजोनिधिर्हरिः ॥ ३ ॥ दीनानाथो दिनकरः सप्तसप्तिः प्रभाकरः ॥ विभावसुर्वेदकर्ता वेदाङ्गो वेदवाहनः ॥४॥ हरिदश्वः कालवक्त्रः कर्मसाक्षी जगत्पतिः ॥ पद्मिनीबोधको भानुर्भास्करः करुणाकरः ॥ ५ ॥ द्वादशात्मा विश्वकर्मा लोहिताङ्गस्तमोनुदः ॥ जगन्नाथोऽरविन्दाक्षः कालात्मा कश्यपात्मजः ॥ ६ ॥ भूताश्रयो ग्रहपतिः सर्वलोकनमस्कृतः ॥ जपाकुसु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मसङ्काशो भास्वानदितिनन्दनः ॥ ७ ॥ ध्वान्तेभ-
सिंहः सर्वात्मा लोकनेत्रो विकर्तनः । मार्तण्डो
मिहिरः सूरस्तपनो लोकतापनः ॥ ८ ॥ जगत्कर्ता
जगत्साक्षी शनैश्चरपिता जयः ॥ सहस्ररश्मिस्तरणि-
र्भगवान्भक्तवत्सलः ॥ ९ ॥ विवस्वानादिदेवश्च
देवदेवो दिवाकरः ॥ धन्वन्तरिर्व्याधिहर्ता दद्रुकुष्ठ-
विनाशनः ॥ १० ॥ चराचरात्मा मैत्रेयोऽमितो
विष्णुर्विकर्तनः ॥ कोकशोकापहर्ता च कमलाकर
आत्मभूः ॥ ११ ॥ नारायणो महादेवो रुद्रः पुरुष
ईश्वरः ॥ जीवात्मा परमात्मा च सूक्ष्मात्मा सर्व-
तोमुखः ॥ १२ ॥ इन्द्रोऽनलो यमश्चैव नैर्ऋतो
वरुणोऽनिलः ॥ श्रीद ईशान इन्दुश्च भौमः सौम्यो
गुरुः कविः ॥ १३ ॥ सौरिर्विधुन्तुदः केतुः कालः
कालान्तको विभुः ॥ सर्वदेवमयो देवः कृष्णः काम-
प्रदायकः ॥ १४ ॥ य एतैर्नामभिर्मर्त्यो भक्त्या
स्तौति दिवाकरम् ॥ सर्वपापविनिर्मुक्तः सर्वरोग-
विवर्जितः ॥ १५ ॥ पुत्रवान्धनवान् श्रीमान्न जायते
स न संशयः ॥ रविवारे पठेद्यस्तु नामान्येतानि
भास्वतः ॥ १६ ॥ पीडाशान्तिर्भवेत्तस्य ग्रहाणां च
विशेषतः ॥ सद्यः सुखमवाप्नोति चायुर्दीर्घं च नीरु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जम् ॥ १७ ॥

इति श्रीभविष्यपुराणे आदित्यस्तोत्रं
सम्पूर्णम् ॥ १ ॥

१६२ चन्द्राष्टाविंशतिनामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ चन्द्रस्य शृणु नामानि शुभदानि महीपते ॥ यानि श्रुत्वा नरो दुःखान्मुच्यते नात्र संशयः ॥ १ ॥ सुधाकरश्च सोमश्च ग्लौरब्जः कुमुदप्रियः ॥ लोकप्रियः शुभ्रभानुश्चन्द्रमा रोहिणीपतिः ॥ २ ॥ शशी हिमकरो राजा द्विजराजो निशाकरः ॥ आत्रेय इन्दुः शीतांशुरोषधीशः कलानिधिः ॥ ३ ॥ जैवातृको रमाभ्राता क्षीरोदार्णवसम्भवः ॥ नक्षत्रनायकः शम्भुशिरश्चूडामणिर्विभुः ॥ ४ ॥ तापहर्ता नभोदीपो नामान्येतानि यः पठेत् ॥ प्रत्यहं भक्तिसंयुस्तस्य पीडा विनश्यति ॥ ५ ॥ ग्रहादीनां च सर्वेषां भवेच्चन्द्रबलं सदा ॥ ६ ॥

इति श्रीचन्द्राष्टाविंशतिनामस्तोत्रं
सम्पूर्णम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१६३ अङ्गारकस्तोत्रम् ।

श्रीगणेशाय नमः ॥ अङ्गारकः शक्तिधरो लोहिताङ्गो धरासुतः ॥ कुमारो मंगलो भौमो महाकायो धनप्रदः ॥ १ ॥ ऋणहर्ता वृष्टिकर्ता रोगकृद्रोगनाशनः ॥ विद्युत्प्रभः प्राणकरः कामदो धनहृत्कुजः ॥ २ ॥ सामगानप्रियो रक्तवस्त्रो रक्तायतेक्षणः ॥ लोहितो रक्तवर्णश्च सर्वकर्मावबोधकः ॥ ३ ॥ रक्तमाल्यधरो हेमकुण्डली ग्रहनायकः ॥ नामान्येतानि भौमस्य यः पठेत्सततं नरः ॥४॥ ऋणं तस्य च दौर्भाग्यं दारिद्र्यं च विनश्यति ॥ धनं प्राप्नोति विपुलं स्त्रियं चैव मनोरमाम् ॥ ५ ॥ वंशोद्योतकरं पुत्रं लभते नात्र संशयः ॥ योऽर्चयेदह्नि भौमस्य मंगलं बहुपुष्पकैः ॥ ६ ॥ सर्वा नश्यति पीडा च तस्य ग्रहकृता ध्रुवम् ॥ ७ ॥

इति श्रीस्कन्दपुराणे अङ्गारकस्तोत्र सम्पूर्णम् ॥ ३ ॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१६४ ऋणमोचकमङ्गलस्तोत्रम् ।

श्रीगणेशाय नमः॥ मंगलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ॥ स्थिरासनो महाकायः सर्वकर्मविरोधकः ॥१॥ लोहितो लोहिताक्षश्च सामगानां कृपाकरः ॥ धरात्मजः कुजो भौमो भूतिदो भूमिनन्दनः ॥ २ ॥ अङ्गारको यमश्चैव सर्वरोगापहारकः ॥ वृष्टे कर्ताऽपहर्ता च सर्वकामफलप्रदः ॥ ३ ॥ एतानि कुजनामानि नित्यं यः श्रद्धया पठेत् ॥ ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ॥४॥ धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम् ॥ कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥ ५ ॥ स्तोत्रमंगारकस्यैतत्पठनीयं सदा नृभिः ॥ न तेषां भौमजा पीडा स्वल्पाऽपि भवति क्वचित् ॥ ६ ॥ अंगारक महाभाग भगवन्भक्तवत्सल ॥ त्वां नमामि ममाशेषमृणमाशु विनाशय ॥ ७ ॥ ऋणरोगादि दारिद्र्यं ये चान्ये ह्यपमृत्यवः ॥ भयक्लेशमनस्तापा नश्यन्तु मम सर्वदा ॥ ८ ॥ अतिवक्त्र दुराराध्य रोगमुक्तजितात्मनः ॥ तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥९॥ विरञ्चिशक्रविष्णुनां मनुष्याणां तु का कथा ॥ तेन त्वं सर्वसत्त्वेन ग्रहराजो महाबलः ॥ १० ॥ पुत्रान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देहि धनं देहि त्वामस्मि शरणं गतः ॥ ऋणदारिद्र्यदुःखेन शत्रूणां च भयात्ततः ॥११॥ एभिर्द्वादशभिः श्लोकैर्यः स्तौति च धरासुतम् ॥ महतीं श्रियमाप्नोति ह्यपरो धनदो युवा ॥ १२ ॥

इति श्रीस्कन्दपुराणे भार्गवप्रोक्तऋणमोचकं मङ्गलस्तोत्रम् ॥ ४ ॥

---

१६५ बुधपञ्चविंशतिनामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ बुधो बुद्धिमतां श्रेष्ठो बुद्धिदाता धनप्रदः ॥ प्रियङ्गुकलिकाश्यामः कञ्जनेत्रो मनोहरः ॥ १ ॥ ग्रहोपमो रौहिणेयो नक्षत्रेशो दयाकरः ॥ विरुद्धकार्यहन्ता च सौम्यो बुद्धिविवर्धनः ॥ २ ॥ चन्द्रात्मजो विष्णुरूपी ज्ञानी ज्ञो ज्ञानिनायकः ॥ ग्रहपीडाहरो दारपुत्रधान्यपशुप्रदः ॥ ॥ ३ ॥ लोकप्रियः सौम्यमूर्तिर्गुणदो गुणिवत्सलः ॥ पञ्चविंशतिनामानि बुधस्यैतानि यः पठेत् ॥ ४ ॥ स्मृत्वा बुधं सदा तस्य पीडा सर्वा विनश्यति ॥ तद्दिने वा पठेद्यस्तु लभते स मनोगतम् ॥ ५ ॥

इति श्रीपद्मपुराणे बुधपञ्चविंशतिनामस्तोत्रं समाप्तम् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१६६ बृहस्पतिस्तोत्रम् ।

श्रीगणेशाय नमः ॥ गुरुर्बृहस्पतिर्जीवः सुराचार्यो विदांवरः ॥ वागीशो धिषणो दीर्घश्मश्रुः पीताम्बरो युवा ॥ १ ॥ सुधादृष्टिर्ग्रहाधीशो ग्रहपीडापहारकः ॥ दयाकरः सौम्यमूर्तिः सुराच्र्यः कुङ्कुमद्युतिः ॥ २ ॥ लोकपूज्यो लोकगुरुर्नीतिज्ञो नीतिकारकः॥ तारापतिश्चाङ्गिरसो वेदवैद्यपितामहः ॥ ३ ॥ भक्त्या बृहस्पतिं स्मृत्वा नामान्येतानि यः पठेत् ॥ अरोगी बलवान् श्रीमान्पुत्रवान् स भवेन्नरः ॥४॥ जीवेद्वर्षशतं मर्त्यो पापं नश्यति नश्यति ॥ यः पूजयेद्गुरुदिने पीतगन्धाक्षताम्बरैः ॥ ५ ॥ पुष्पदीपोहारैश्च पूजयित्वा बृहस्पतिम् ॥ ब्राह्मणान् भोजयित्वा च पीडाशान्तिर्भवेद्गुरोः ॥ ६ ॥

इति श्रीस्कन्दपुराणे बृहस्पतिस्तोत्रं सम्पूर्णम् ॥ ६ ॥

—•—❀—

१६७ शुक्रस्तोत्रम् ।

श्रीगणेशाय नमः ॥ शुक्रः काव्यः शुक्ररेता शुक्लाम्बरधरः सुधीः॥ हिमाभः कुन्दधवलः शुभ्रांशुः शुक्लभूषणः ॥ १ ॥ नीतिज्ञो नीतिकृन्नीतिमार्ग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गामी ग्रहाधिपः ॥ उशना वेदवेदाङ्गपारगः कवि-
रात्मवित् ॥ २ ॥ भार्गवः करुणासिन्धुर्ज्ञानगम्यः
सुखप्रदः ॥ शुक्रस्यैतानि नामानि शुक्रं स्मृत्वा तु यः
पठेत् ॥ ३ ॥ आयुर्धनं सुखं पुत्रं लक्ष्मीं वसति-
मुत्तमाम् ॥ विद्याञ्चैव स्वयं तस्मै शुक्रस्तुष्टो ददाति
च ॥ ४ ॥

इति श्रीस्कन्दपुराणे शुक्रस्तोत्रं सम्पूर्णम् ॥ ७ ॥

---

१६८ शनैश्चरस्तवराजः ।

श्रीगणेशाय नमः ॥ नारद उवाच ॥ ध्यात्वा
गणपतिं राजा धर्मराजो युधिष्ठिरः ॥ धीरः शनैश्च-
रस्येमं चकार स्तवमुत्तमम् ॥१॥ शिरो मे भास्करिः
पातु भालं छायासुतोऽवतु ॥ कोटराक्षो दृशौ पातु
शिखिकण्ठनिभः श्रुती ॥ २ ॥ घ्राणं मे भीषणः पातु
मुखं बलिमुखोऽवतु ॥ स्कन्धौ संवर्तकः पातु भुजौ
मे भयदोऽवतु ॥ ३ ॥ सौरिर्मे हृदयं पातु नाभिं
शनैश्चरोऽवतु ॥ ग्रहराजः कटिं पातु सर्वतो रवि-
नन्दनः ॥ ४ ॥ पादौ मन्दगतिः पातु कृष्णः पात्व-
खिलं वपुः ॥ रक्षामेतां पठेन्नित्यं सौरेर्नामबलैर्यु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताम् ॥ ५ ॥ सुखी पुत्री चिरायुश्च स भवेन्नात्र संशयः ॥ ॐ सौरिः शनैश्चरः कृष्णो नीलोत्पलनिभः शनिः ॥ ६ ॥ शुष्कोदरो विशालाक्षो दुर्निरीक्ष्यो विभीषणः ॥ शिखिकण्ठनिभो नीलश्छायाहृदयनन्दनः ॥ ७ ॥ कालदृष्टिः कोटराक्षः स्थूलरोमा बलीमुखः ॥ दीर्घो निर्मांसगात्रस्तु शुष्को घोरो भयानकः ॥ ८ ॥ नीलांशुः क्रोधनो रौद्रो दीर्घश्मश्रुजटाधरः ॥ मन्दो मन्दगतिः खञ्जो तृप्तः संवर्तको यमः ॥ ९ ॥ ग्रहराजः कराली च सूर्यपुत्रो रविः शशी ॥ कुजो बुधा गुरुः काव्यो भानुजः सिंहिकासुतः ॥ १० ॥ केतुर्देवपतिर्बाहुः कृतान्तो नैर्ऋतस्तथा ॥ शशी मरुत्कुबेरश्च ईशानः सुर आत्मभूः ॥११॥ विष्णुर्हरो गणपतिः कुमारः काम ईश्वरः ॥ कर्ता हर्ता पालयिता राजसे (?) राज्यदायकः ॥ १२ ॥ छायासुतः श्यामलाङ्गो धनहर्त्ता धनप्रदः ॥ क्रूरकर्मविधाता च सर्वकर्मावरोधकः ॥ १३ ॥ तुष्टो रुष्टः कामरूपः कामदो रविनन्दनः ॥ ग्रहपीडाहरः शान्तो नक्षत्रेशो ग्रहेश्वरः ॥ १४ ॥ स्थिरासनः स्थिरगतिर्महाकायो महाबलः ॥ महाप्रभो महाकालः कालात्मा कालकालकः ॥ १५ ॥ आदित्यभयदाता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च मृत्युरादित्यनन्दनः॥ शतभिरुक्षदयिता (?) त्रयोदशितिथिप्रियः ॥ १६ ॥ तिथ्यात्मकस्तिथिगणो नक्षत्रगणनायकः ॥ योगराशिर्मुहूर्तात्मा कर्ता दिनपतिः प्रभुः ॥१७॥ शमीपुष्पप्रियः श्यामस्त्रैलोक्याभयदायकः ॥ नीलवासाः क्रियासिन्धुर्नीलाञ्जनचयच्छविः ॥ १८ ॥ सर्वरोगहरो देवः सिद्धो देवगणस्तुतः ॥ अष्टोत्तरशतं नाम्नां सौरेश्छायासुतस्य यः ॥ १९ ॥ पठेन्नित्यं तस्य पीडा समस्ता नश्यति ध्रुवम् ॥ कृत्वा पूजां पठेन्मर्त्यो भक्तिमान्यः स्तवं सदा ॥ २० ॥ विशेषतः शनिदिने पीडा तस्य विनश्यति ॥ जन्मलग्ने स्थितिर्वापि गोचरे क्रूरराशिगे ॥२१॥ दशासु च गते सौरौ तदा स्तवमिमं पठेत् ॥ पूजयेद्यः शनिं भक्त्या शमीपुष्पाक्षताम्बरैः ॥२२॥ विधाय लोहप्रतिमां नरो दुःखाद्विमुच्यते ॥ बाधा याऽन्यग्रहाणां च यः पठेत्तस्य नश्यति ॥ २३ ॥ भीतो भयाद्विमुच्येत बद्धो मुच्येत बन्धनात् ॥ रोगी रोगाद्विमुच्येत नरः स्तवमिमं पठेत् ॥ २४ ॥ पुत्रवान्धनवान् श्रीमाञ्जायते नात्र संशयः ॥ २५ ॥ नारद उवाच ॥ स्तवं निशम्य पार्थस्य प्रत्यक्षोऽभूच्छनैश्वरः ॥ दत्वा राज्ञे वरं कामं शनिश्चान्तर्दधे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदा ॥ २६ ॥

इति श्रीभविष्यपुराणे शनैश्चरस्तवराजः समाप्तः ॥८॥

---

१६९ शनैश्चरस्तोत्रम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीशनैश्चरस्तोत्रस्य दशरथ ऋषिः ॥ श्रीशनैश्चरो देवता ॥ त्रिष्टुप् छन्दः ॥ शनैश्चरप्रीत्यर्थे जपे विनियोगः ॥ दशरथ उवाच ॥ कोणोऽन्तको रौद्रयमोऽथ बभ्रुः कृष्णः शनिः पिङ्गलमन्दसौरिः ॥ नित्यं स्मृतो यो हरते च पीडां तस्मै नमः श्रीरविनन्दनाय ॥ १ ॥ सुरासुराः किम्पुरुषोरगेन्द्रागन्धर्वविद्याधरपन्नगाश्च ॥ पीड्यन्ति सर्वे विषमस्थितेन तस्मै० ॥ २ ॥ नरा नरेन्द्राः पशवो मृगेन्द्रा वन्याश्च ये कीटपतङ्गभृङ्गाः ॥ पीड्यन्ति सर्वे विषमस्थितेन तस्मै० ॥ ३ ॥ देशाश्च दुर्गाणि वनानि यत्र सेनानिवेशाः पुरपत्तनानि ॥ पीड्यन्ति सर्वे विषमस्थितेन तस्मै० ॥ ४ ॥ तिलैर्यवैर्माषगुडान्नदानैर्लोहेन नीलाम्बरदानतो वा ॥ प्रीणाति मन्त्रैर्निजवासरे च तस्मै० ॥ ५ ॥ प्रयागकूले यमुनातटे च सर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वतीपुण्यजले गुहायाम् ॥ यो योगिनां ध्यानगतोऽपि सूक्ष्मस्तस्मै० ॥ ६ ॥ अन्यप्रदेशात्स्वगृहं प्रविष्टस्तदीयवारे स नरः सुखी स्यात् ॥ गृहाद्गतो यो न पुनः प्रयाति तस्मै० ॥ ७ ॥ स्रष्टा स्वयम्भूर्भुवनत्रयस्य त्राता हरीशो हरते पिनाकी ॥ एकस्त्रिधा ऋग्यजुःसाममूर्तिस्तस्मै० ॥ ८ ॥ शन्यष्टकं यः प्रयतः प्रभाते नित्यं सुपुत्रैः पशुबान्धवैश्च ॥ पठेच्च सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाणपदं तदन्ते ॥ ९ ॥ कोणस्थः पिङ्गलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः ॥ सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः ॥ १० ॥ एतानि दशनामानि प्रातरुत्थाय यः पठेत् ॥ शनैश्चरकृता पीडा न कदाचिद्भविष्यति ॥ ११ ॥

इति श्रीशनैश्चरस्तोत्र सम्पूर्णम् ॥ ६ ॥

—※—

१७० राहुस्तोत्रम् ।

श्रीगणेशाय नमः ॥ राहुर्दानवमन्त्री च सिंहिकाचित्तनन्दनः ॥ अर्धकायः सदा क्रोधी चन्द्रादित्यविमर्दनः ॥ १ ॥ रौद्रो रुद्रप्रियो दैत्यः स्वर्भा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नुर्भानुभीतिदः ग्रहराजः सुधापायी राकातिथ्य-
भिलाषुकः । ॥ २ ॥ कालदृष्टिः कालरूपः श्रीकण्ठ-
हृदयाश्रयः ॥ विधुन्तुदः सैंहिकेयो घोररूपो महा-
बलः ॥ ३ ॥ ग्रहपीडाकरो दंष्ट्री रक्तनेत्रो महो-
दरः ॥ पञ्चविंशतिनामानि स्मृत्वा राहुं सदा
नरः ॥ ४ ॥ यः पठेन्महती पीडा तस्य नश्यति
केवलम् ॥ आरोग्यं पुत्रमतुलां श्रियं धान्यं पशूं-
स्तथा ॥ ५ ॥ ददाति राहुस्तस्मै यः पठते स्तोत्र-
मुत्तमम् ॥ सततं पठते यस्तु जीवेद्वर्षशतं नरः
॥ ६ ॥

इति श्रीस्कन्दपुराणे राहुस्तोत्रं
सम्पूर्णम् ॥ १० ॥

—:-✲-:—

१७१ केतुपञ्चविंशतिनामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ केतुः कालः कलयिता
धूम्रकेतुर्विवर्णकः ॥ लोककेतुर्महाकेतुः सर्वकेतुर्भय-
प्रदः ॥ १ ॥ रौद्रो रुद्रप्रियो रुद्रः क्रूरकर्मा सुगन्ध-
धृक् ॥ पलाशधूमसङ्काशश्चित्रयज्ञोपवीतधृक् ॥ २ ॥
तारागणविमर्दी च जैमिनेयो ग्रहाधिपः ॥ पञ्च-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विंशतिनामानि केतोर्यः सततं पठेत् ॥ ३ ॥ तस्य नश्यति बाधा च सर्वा केतुप्रसादतः ॥ धनधान्यपशूनां च भवेद्वृद्धिर्न संशयः ॥ ४ ॥

इति श्रीस्कन्दपुराणे केतोः पञ्चविंशतिनामस्तोत्रं सम्पूर्णम् ॥ ११ ॥

—*:*—

१७२ नवग्रहपीडाहरस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ग्रहणामादिरादित्यः खेचरत्तणकारकः ॥ विषमस्थानसम्भूतां पीडां हरतु मे रविः ॥१॥ रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः ॥ विषमस्थानसम्भूतां पीडां हरतु मे विधुः ॥ २ ॥ भूमिपुत्रो महातेजा जगतां भयकृत्सदा ॥ वृष्टिकृद्वृष्टिहर्ता च पीडां हरतु मे कुजः ॥ ३ ॥ उत्पत्तिरूपो जगतां चन्द्रपुत्रो महाद्युतिः ॥ सूर्यप्रियकरो विद्वान्पीडां हरतु मे बुधः ॥ ४ ॥ देवमन्त्री विशालाक्षः सदा लोकहिते रतः ॥ अनेकशिष्यसम्पूर्णः पीडां हरतु मे गुरुः ॥ ५ ॥ दैत्यमन्त्री गुरुस्तेषां प्राणदश्च महामतिः ॥ प्रभुस्ताराग्रहाणां च पीडां हरतु मे भृगुः ॥ ६ ॥ सूर्यपुत्रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीर्घदेहो विशालाक्षः शिवप्रियः ॥ दीर्घचारः प्रसन्नात्मा पीडां हरतु मे शनिः ॥ ७ ॥ महाशिरा महावक्त्रो दीर्घदंष्ट्रो महाबलः ॥ अतनुश्चोर्ध्वकेशश्च पीडां हरतु मे शिखी ॥ ८ ॥ अनेकरूपवर्णैश्च शतशोऽथ सहस्रशः ॥ उत्पातरूपो जगतां पीडां हरतु मे तमः ॥ ९ ॥

इति नवग्रहपीडाहरस्तोत्रम् ॥ १२ ॥

—:✿:—

१७३ नवग्रहस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ॥ तमोरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥ १ ॥ दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ॥ नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम् ॥ २ ॥ धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम् ॥ कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥ ३ ॥ प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ॥ सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥ ४ ॥ देवानां च ऋषीणां च गुरुं काञ्चनसन्निभम् ॥ बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ॥ सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥ ६ ॥ नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम् ॥ छायामार्तण्डसम्भूतं तं नमामि शनैश्चरम् ॥ ७ ॥ अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ॥ सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम् ॥ ८ ॥ पलाशपुष्पसंकाशं तारकाग्रहमस्तकम् ॥ रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥ ६ ॥ इति व्यासमुखोद्गीतं यः पठेत्सुसमाहितः ॥ दिवा वा यदि वा रात्रौ विघ्नशान्तिर्भविष्यति ॥ १० ॥ नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम् ॥ ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम् ॥ ११ ॥ ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः । ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः ॥ १२ ॥

इति श्रीव्यासविरचितं नवग्रहस्तोत्रं सम्पूर्णम् ॥ १३ ॥

इति नवग्रहस्तोत्राणि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वेदान्तस्तोत्राणि ।

१७४ निर्वाणदशकम् ।

श्रीगणेशाय नमः ॥ न भूमिर्न तोयं न तेजो न वायुर्न खं नेन्द्रियं वा न तेषां समूहः ॥ अनैकान्तिकत्वात्सुषुप्त्येकसिद्धिस्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ १ ॥ न वर्णा न वर्णाश्रमाचारधर्मा न मे धारणा ध्यानयोगादयोऽपि ॥ अनात्माश्रयोऽहं ममाध्यासहीनात्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ २ ॥ न माता पिता वा न देवा न लोका न वेदा न यज्ञा न तीर्थं ब्रुवन्ति ॥ सुषुप्तौ निरस्तातिशून्यात्मकत्वात्तदेकोऽवशि० ॥ ३ ॥ न सांख्यं न शैवं न तत्पाञ्चरात्रं न जैनं न मीमांसकादेर्मतं वा ॥ विशिष्टानुभूत्या विशुद्धात्मकत्वात्तदेकोऽवशि० ॥ ४ ॥ न शुक्लं न कृष्णं न रक्तं न पीतं न पीनं न कुब्जं न ह्रस्वं न दीर्घम् ॥ अरूपं तथा ज्योतिराकारकत्वात्तदेकोऽवशि० ॥ ५ ॥ न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जाग्रन्न मे स्वप्नको वा सुषुप्तिर्न विश्वो न वा तैजसः प्राज्ञको वा ॥ अविद्यात्मकत्वात्त्रयाणां तुरीयं तदेकोऽवशि० ॥ ६ ॥ न शास्ता न शास्त्रं न शिष्यो न शिक्षा न च त्वं न चाहं न चायं प्रपञ्चः ॥ स्वरूपावबोधाद्विकल्पासहिष्णुस्तदेकोऽवशि० ॥ ७ ॥ न चोर्ध्वं न चाधो न चान्तर्न बाह्यं न मध्यं न तिर्यङ् न पूर्वापरा दिक् ॥ वियद्व्यापकत्वादखण्डैकरूपस्तदेकोऽवशि० ॥ ८ ॥ अपि व्यापकत्वादितत्त्वाप्रयोगात् स्वतःसिद्धभावादनन्याश्रयत्वात् ॥ जगत्तुच्छमेतत्समस्तं तदन्यस्तदेकोऽवशि० ॥ ९ ॥ न चैकं तदन्यद्द्वितीय कुतः स्यान्न चाकेवलत्वं न वा केवलत्वात् ॥ न शून्यं न चाशून्यमद्वैतकत्वात्कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥ १० ॥

इति श्रीमच्छङ्कराचार्यरचितं निर्वाणदशकं सम्पूर्णम् ॥ १ ॥

—*:❀:*—

१७५ निर्वाणषट्कम् ।

श्रीगणेशाय नमः ॥ मनोबुद्ध्यहङ्कारचित्तानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाहं न च श्रोत्रजिह्वे न च घ्राणनेत्रे ॥ न च व्योम भूमिर्न तेजो न वायुश्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ १ ॥ न च प्राणसंज्ञो न वै पञ्चवायुर्न वा सप्तधातुर्न वा पञ्चकोशः ॥ न वाक्पाणिपादं न चोपस्थपायुश्चिदानन्दरूपः शिवो० ॥ ॥ २ ॥ न मे द्वेषरागौ न मे लोभमोहौ मदो नैव मे नैव मात्सर्यभावः ॥ न धर्मो न चार्थो न कामो न मोक्षश्चिदानन्दरूपः० ॥ ३ ॥ न पुण्यं न पापं न सौख्यं न दुःखं न मन्त्रो न तीर्थं न वेदा न यज्ञाः ॥ अहं भोजनं नैव भोज्यं न भोक्ता चिदानन्दरूपः० ॥ ४ ॥ न मृत्युर्न शङ्का न मे जातिभेदः पिता नैव मे नैव माता च जन्म ॥ न बन्धुर्न मित्रं गुरुर्नैव शिष्यश्चिदानन्दरूपः० ॥५॥ अहं निर्विकल्पी निराकाररूपी विभुत्वाच्च सर्वत्र सर्वेन्द्रियाणाम् ॥ न चासं गतं नैव मुक्तिर्न मेयश्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ६ ॥

इति श्रीमच्छङ्कराचार्यविरचितं निर्वाणषट्कं सम्पूर्णम् ॥ २ ॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१७६ आत्मपञ्चकम् ।

श्रीगणेशाय नमः ॥ नाहं देहो नेन्द्रियाण्यन्तरङ्गं नाहङ्कारः प्राणवर्गो न बुद्धिः ॥ दारापत्यक्षेत्रवित्तादिदूरः साक्षी नित्यः प्रत्यगात्मा शिवोऽहम् ॥ १ ॥ रज्ज्वज्ञानाद्भाति रज्जुर्यथाऽहिः स्वात्माज्ञानादात्मनो जीवभावः ॥ आप्तोक्त्या हि भ्रान्तिनाशे स रज्जुर्जीवो नाहं देशिकोक्त्या शिवोऽहम् ॥ २ ॥ आभातीदं विश्वमात्मन्यसत्यं सत्यज्ञानानन्दरूपे विमोहात् ॥ निद्रामोहात्स्वप्नवत्तन्न सत्यं शुद्धः पूर्णो नित्य एकः शिवोऽहम् ॥ ३ ॥ मत्तो नान्यत्किञ्चिदत्रास्ति विश्वं सत्यं बाह्यं वस्तु मायोपक्लृप्तम् ॥ आदर्शान्तर्भासमानस्य तुल्यं मय्यद्वैते भाति तस्माच्छिवोऽहम् ॥ ४ ॥ नाहं जातो न प्रवृद्धो न नष्टो देहस्योक्ताः प्राकृताः सर्वधर्माः ॥ कर्तृत्वादिश्चिन्मयस्यास्ति नाहङ्कारस्यैव ह्यात्मनो मे शिवोऽहम् ॥ ५ ॥ नाहं जातो जन्ममृत्यू कुतो मे नाहं प्राणः क्षुत्पिपासे कुतो मे ॥ नाहं चित्तं शोकमोहौ कुतो मे नाहं कर्ता बन्धमोक्षौ कुतो मे ॥ ६ ॥

इति श्रीमच्छङ्कराचार्यविरचितमात्मपञ्चकं सम्पूर्णम् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१७७ साधनपञ्चकम् ।

श्रीगणेशाय नमः ॥ वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम् ॥ पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयतामात्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥ १ ॥ सङ्गः सत्सु विधीयतां भगवतो भक्तिर्दृढा धीयतां शान्त्यादिः परिचीयतां दृढतरं कर्माशु सन्त्यज्यताम् ॥ सद्विद्वानुपसर्प्यतां प्रतिदिनं तत्पादुके सेव्यतां ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यताम् ॥ २ ॥ वाक्यार्थश्च विचार्यतां श्रुतिशिरः पक्षः समाश्रीयतां दुस्तर्कात्सुबिरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम् ॥ ब्रह्मैवास्मि विभाव्यतामहरहर्गर्वः परित्यज्यतां देहेऽहम्मतिरुज्झ्यतां बुधजनैर्वादः परित्यज्यताम् ॥३॥ क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां स्वाद्वन्नं न तु याच्यतां विधिवशात्प्राप्तेन सन्तुष्यताम् ॥ शीतोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यतामौदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यताम् ॥ ४ ॥ एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां पूर्णात्मा सुसमीक्ष्यतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जगदिदं तद्बाधितं दृश्यताम् ॥ प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यतां प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयतां ॥ ५ ॥ यः श्लोकपञ्चकमिदं पठते मनुष्यः सञ्चिन्तयत्यनुदिनं स्थिरतामुपेत्य ॥ तस्याशु संसृतिदवानलतीव्रघोरतापः प्रशान्तिमुपयाति चितिप्रसादात् ॥ ६ ॥

इति श्रीमच्छङ्कराचार्यविरचितं साधनपञ्चकं सम्पूर्णम् ॥ ४ ॥

---

१७८ कौपीनपञ्चकः ।

श्रीगणेशाय नमः ॥ वेदान्तवाक्येषु सदा रमन्तो भिक्षान्नमात्रेण च तुष्टिमन्तः ॥ अशोकवन्तः करुणैकवन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ १ ॥ मूलं तरोः केवलमाश्रयन्तः पाणिद्वये भोक्तुममत्रयन्तः ॥ कन्थामपि स्त्रीमिव कुत्सयन्तः कौपीनवन्तः खलु० ॥ २ ॥ देहाभिमानं परिहृत्य दूरादात्मानमात्मन्यवलोकयन्तः ॥ अहर्निशं ब्रह्मणि ये रमन्तः कौपीनवन्तः खलु० ॥ ३ ॥ स्वानन्दभावे परितुष्टिमन्तः स्वशान्तसर्वेन्द्रियवृत्तिमन्तः ॥ नान्तं न मध्यं न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहिः स्मरन्तः कौपीनवन्तः खलु० ॥ ४ ॥ पञ्चाक्षरं पावनमुच्चरन्तः पतिं पशूनां हृदि भावयन्तः ॥ भिक्षाशना दिक्षु परिभ्रमन्तः कौपीनवन्तः खलु० ॥ ५ ॥

इति श्रीमच्छङ्कराचार्यविरचितं कौपीनपञ्चकस्तोत्रं सम्पूर्णम् ॥ ५ ॥

१७६ मनीषापञ्चकम् ।

श्रीगणेशाय नमः ॥ सत्याचार्यस्य गमने कदाचिन्मुक्तिदायकम् ॥ काशीक्षेत्रं प्रति सह गौर्या मार्ग तु शङ्करम् ॥ १ ॥ अन्त्यवेषधरं दृष्ट्वा गच्छ गच्छेति चाब्रवीत् ॥ शङ्करः सोऽपि चाण्डालस्तं पुनः प्राह शङ्करम् ॥ २ ॥ अन्नमयादन्नमयं ह्यथवा चैतन्यमेव चैतन्यात् ॥ द्विजवर दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति ॥ ३ ॥ किं गङ्गाम्बुनि बिम्बितेऽम्बरमणौ चाण्डालवाटीपयः पूरे चान्तरमस्ति काञ्चनघटीमृत्कुम्भयोर्वाऽम्बरे ॥ प्रत्यग्वस्तुनि निस्तरङ्गसहजानन्दावबोधाम्बुधौ विप्रोऽयं श्वपचोऽयमित्यपि महान् कोऽयं विभेदभ्रमः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृम्भते या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी ॥ सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञापि यस्यास्ति चेच्चाण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥ ५ ॥ ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्रविस्तारितं सर्वं चैतदविद्यया त्रिगुणयाऽशेषं मया कल्पितम् ॥ इत्थं यस्य दृढा मतिः सुखतरे नित्ये परे निर्मले चाण्डालोऽस्तु स तु० ॥ ६ ॥ शश्वन्नश्वरमेव विश्वमखिलं निश्चित्य वाचा गुरोर्नित्यं ब्रह्म निरन्तरं विमृशता निर्व्याजशान्तात्मना ॥ भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावके प्रारब्धाय समर्पितं स्ववपुरित्येषा० ॥ ७ ॥ या तिर्यङ्नरदेवताभिरहमित्यन्तः स्फुटा गृह्यते यद्भासा हृदयाक्षदेहविषया भान्ति स्वतोऽचेतनाः ॥ तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं सदा भावयन्योगी निर्वृतमानसो हि गुरुरित्येषा० ॥ ८ ॥ यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृता यच्चित्ते नितरां प्रशान्तकलने लब्ध्वा मुनिर्निर्वृतः ॥ यस्मिन्नित्यसुखाम्बुधौ गलितधीर्ब्रह्मैव न ब्रह्मविद्यः कश्चित्स सुरेन्द्रवन्दितपदो नूनं मनीषा मम ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रीमच्छङ्कराचार्यविरचितं मनीषापञ्चकं सम्पूर्णम् ॥ १ ॥

——❀——

१८० वैराग्यपञ्चकम् ।

श्रीगणेशाय नमः ॥ शिलं किमनलं भवेदनलमौदरं बाधितुं पयः प्रसृतिपूरकं किमु न धारकं सारसम् ॥ अयत्नमलमल्पकं पथि पटच्चरं भजन्ति विबुधा मुधा अहह कुक्षितः कुक्षितः॥१॥ दुरीश्वरद्वारबहिर्वितर्दिकादुरासिकाय रचितोऽयमञ्जलिः ॥ यदञ्जनाभं निरपायमस्ति नो धनञ्जयस्यन्दनभूषणं धनम ॥ २ ॥ काचाय नीचं कमनीयवाचा मोचाफलस्वादमुचा न याचे ॥ दयाकुचेले धनदत्कुचेले स्थितेऽकुचेले श्रितमाकुचेले ॥ ३ ॥ क्षोणीकोणशतांशपालनखलदुर्वारगर्वानलक्षुभ्यत्क्षुद्रनरेन्द्रचाटुरचनां धन्यां न मन्यामहे ॥ देवं सेवितुमेव निश्चिनुमहे योऽसौ दयालुः पुरा धानामुष्टिमुचे कुचेलमुनये धत्ते स्म वित्तेशताम् ॥ ४ ॥ शरीरपतनावधि प्रभुनिषेवणापादनादबिन्धनधनञ्जयप्रशमदं धनं दन्धनम् ॥ धनञ्जयविवर्धनं धनुमुदूढ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोवर्धनं सुसाधनमबाधनं सुमनसां समाराधनम् ॥ ५ ॥

इति श्रीसर्वतन्त्रस्वतन्त्रवेदान्ताचार्यकृतं वैराग्यपञ्चकम् ॥ ७ ॥

—❀—

१८१ धन्याष्टकम् ।

श्रीगणेशाय नमः ॥ तज्ज्ञानं प्रशमकरं यदिन्द्रियाणां तज्ज्ञेयं यदुपनिषत्सु निश्चितार्थम् ॥ ते धन्या भुवि परमार्थनिश्चितेहाः शेषास्तु भ्रमनिलये परिभ्रमन्ति ॥ १ ॥ आदौ विजित्य विषयान्मदमोहरागद्वेषादिशत्रुगणमाहुतयोगराज्याः ॥ ज्ञात्वाऽमृतं समनुभूय परात्मविद्याकान्तासुखा वत गृहे विचरन्ति धन्याः ॥ २ ॥ त्यक्त्वा गृहं रतिमतो गतिहेतुभूतामात्मेच्छयोपनिषदर्थरसं पिबन्तः ॥ वातस्पृहा विषयभोगपदे विरक्ता धन्याश्चरन्ति विजनेषु विरक्तसङ्गाः ॥ ३ ॥ त्यक्त्वा ममाहमिति बन्धकरे पदे द्वे मानावमानसदृशाः समदर्शिनश्च ॥ कर्तारमन्यमवगम्य तदर्पितानि कुर्वन्ति कर्मपरिपाकफलानि धन्याः ॥४॥ त्यक्त्वैषणात्रयमवेक्षित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोक्षमार्गा भक्ष्यामृतेन परिकल्पितदेहयात्राः ॥
ज्योतिः परात्परतरं परमात्मसंज्ञं धन्या द्विजा
रहसि हृद्यवलोकयन्ति ॥ ५ ॥ नासन्न सन्न सदसन्न
महन्न चाणु न स्त्री पुमान्न च नपुंसकमेकबीजम् ॥
यैर्ब्रह्म तत्समनुपासितमेकचित्ता धन्या विरेजुरितरे
भवपाशबद्धाः ॥ ६ ॥ अज्ञानपङ्कपरिमग्नमपेतसारं
दुःखालयं मरणजन्मजरावसक्तम् ॥ संसारबन्धन-
मनित्यमवेक्ष्य धन्या ज्ञानासिना तदवशीर्य विनि-
श्चयन्ति ॥ ७ ॥ शान्तैरनन्यमतिभिर्मधुरस्वभावै-
रेकत्वनिश्चितमनोभिरपेतमोहैः ॥ साकं वनेषु
विजितात्मपदस्वरूपं शास्त्रेषु सम्यगनिशं विमृशन्ति
धन्याः ॥ ८ ॥ अहिमिव जनयोगं सर्वदा वर्जयेद्यः
कुणपमिव सुनारीं त्यक्तुकामो विरागी ॥ विषमिव
विषयान्यो मन्यमानो दुरन्तान् जयति परमहंसो
मुक्तिभावं समेति ॥ ६ ॥ सम्पूर्णं जगदेव नंदनवनं
सर्वेऽपि कल्पद्रुमा गाङ्गं वारि समस्तवारिनिवहः
पुण्याः समस्ताः क्रियाः ॥ वाचः प्राकृतसंस्कृता
श्रुतिशिरो वाराणसी मेदिनी सर्वावस्थितिरस्य
वस्तुविषया दृष्टे परब्रह्मणि ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रीमत्परमहंसश्रीमच्छङ्कराचार्यकृतं
धन्याष्टकं सम्पूर्णम् ॥ ८ ॥

—❀—❀—

१८२ विज्ञाननौका ।

श्रीगणेशाय नमः ॥ तपोयज्ञदानादिभिः शुद्धबुद्धिर्विरक्तो नृपादौ पदे तुच्छबुद्धया ॥ परित्यज्य सर्वं यदाप्नोति तत्त्वं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ १ ॥ दयालुं गुरुं ब्रह्मनिष्ठं प्रशान्तं समाराध्य मत्या विचार्य स्वरूपम् ॥ यदाप्नोति तत्वं निदिध्यास्य विद्वान्परं ब्रह्म० ॥ २ ॥ यदानंदरूपं प्रकाशस्वरूपं निरस्तप्रपञ्चं परिच्छेदशून्यम् ॥ अहंब्रह्मवृत्त्यैकगम्यं तुरीयं परं ब्रह्म० ॥ ३ ॥ यदज्ञानतो भाति विश्वं समस्तं विनष्टं च सद्यो यदात्मप्रबोधे ॥ मनोवागतीतं विशुद्धं विमुक्तं परं ब्रह्म० ॥ ४ ॥ निषेधे कृते नेति नेतीति वाक्यैः समाधिस्थितानां यदाभाति पूर्णम् ॥ अवस्थात्रयातीतमेकं तुरीयं परं ब्रह्म० ॥ ५ ॥ यदानंदलेशैः समानंदि विश्वं यदाभाति सत्वे तदाभाति सर्वम् ॥ यदालोचने रूपमन्यत्समस्तं परं ब्रह्म० ॥ ६ ॥ अनन्तं विभुं सर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योनिं निरीहं शिवं सङ्गहीनं यदोङ्कारगम्यम् ॥ निराकारमत्युज्ज्वलं मृत्युहीनं परं ब्रह्म० ॥ ७ ॥ यदानंदसिन्धौ निमग्नः पुमान्स्यादविद्याविलासः समस्तप्रपञ्चः ॥ यदा न स्फुरत्यद्भुतं यन्निमित्तं परं ब्रह्म० ॥ ८ ॥ स्वरूपानुसंधानरूपां स्तुतिं यः पठेदादराद्भक्तिभावो मनुष्यः ॥ शृणोतीह वा नित्यमुद्युक्तचित्तो भवेद्विष्णुरत्रैव वेदप्रमाणात् ॥ ९ ॥ विज्ञाननावं परिगृह्य कश्चित्तरेद्यदज्ञानमयं भवाब्धिम् ॥ ज्ञानासिना यो हि विच्छिद्य तृष्णां विष्णोः पदं याति स एव धन्यः ॥ १० ॥

इति श्रीमच्छङ्कराचार्यविरचिता विज्ञाननौका सम्पूर्णम् ॥ ९ ॥

---

१८३ द्वादशपञ्जरिकास्तोत्रम् ।

श्रीगणेशाय नमः ॥ मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ॥ यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥ १ ॥ अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ॥ पुत्रादपि धनभाजां भीतिः सर्वत्रैषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विहिता नीतिः ॥ २ ॥ का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ॥ कस्य त्वं कः कुत आयातस्तत्त्वं चिन्तय यदिदं भ्रातः ॥ ३ ॥ मा कुरु जनधनयौवनगर्वं हरति निमेषात्कालः सर्वम् ॥ मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा ॥ ४ ॥ कामं क्रोधं मोहं लोभं त्यक्त्वाऽऽत्मानं भावय कोऽहम् ॥ आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥ ५ ॥ सुरमन्दिरतरुमूलनिवासः शय्या भूतलमजिनं वासः ॥ सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥ ६ ॥ शत्रौ मित्रे पुत्रे बन्धौ माकुरु यत्नं विग्रहसन्धौ ॥ भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम् ॥ ७ ॥ त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि सर्वसहिष्णुः ॥ सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् ॥ ८ ॥ प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम् ॥ जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम् ॥ ६ ॥ नलिनीदलगतसलिलं तरलं तद्वज्जीवितमतिशयचपलम् ॥ विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम् ॥ १० ॥ का तेऽष्टादशदेशे चिन्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वातुल तव किं नास्ति नियन्ता ॥ यस्त्वां हस्ते सुदृढनिबद्धं बोधयति प्रभवादिविरुद्धम् ॥ ११ ॥ गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद्भव मुक्तः ॥ सेन्द्रियमानसनियमादेवं द्रक्ष्यसि निज-हृदयस्थं देवम् ॥ १२ ॥ द्वादशपञ्जरिकामय एष शिष्याणां कथितो ह्युपदेशः ॥ येषां चित्ते नैव विवेकस्ते पच्यन्ते नरकमनेकम् ॥ १३ ॥

इति श्रीमच्छङ्कराचार्यविरचितं द्वादशपञ्जरिका-स्तोत्रम् ॥ १० ॥

---

१८४ चर्पटपञ्जरिकास्तोत्रम् ।

श्रीगणेशाय नमः ॥ दिनमपि रजनी सायं प्रातः शिशिरवसन्तौ पुनरायातः ॥ कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ॥ १ ॥ भज गोविन्दं भज गोविन्दं भज गोविन्दं मूढमते ॥ प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ्-करणे ॥ (ध्रुवपदम्) ॥ अग्रे वह्निः पृष्ठे भानू रात्रौ चिबुकसमर्पितजानुः ॥ करतलभिक्षा तरुतलवास-स्तदपि न मुञ्चत्याशापाशः ॥ भज गोविन्दं० ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ॥ पश्चाद्धावति जर्जरदेहे वार्ता पृच्छति कोऽपि न गेहे ॥ भज गोविन्दं० ॥ ३ ॥ जटिलो मुण्डी लुञ्चितकेशः काषायाम्बरबहुकृतवेषः ॥ पश्यन्नपि च न पश्यति मूढ उदरनिमित्तं बहुकृतवेषः ॥ भज गोविन्दं० ॥ ४ ॥ भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता ॥ सकृदपि यस्य मुरारि-समर्चा तस्य यमः किं कुरुते चर्चाम् ॥ भज गोविन्दं भज० ॥५॥ अङ्गं गलितं मुण्डं पलितं दशनविहीनं जातं तुण्डम् ॥ वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ॥ भज गोविन्दं० ॥ ६ ॥ बाल-स्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः ॥ वृद्धस्ताव-च्चिन्तामग्नः परे ब्रह्मणि कोऽपि न लग्नः ॥ भज गोविन्दं० ॥ ७ ॥ पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ॥ इह संसारे खलु दुस्तारे कृपयाऽपारे पाहि मुरारे ॥ भज गोविन्दं० ॥ ८ ॥ पुनरपि रजनी पुनरपि दिवसः पुनरपि पक्षः पुनरपि मासः ॥ पुनरप्ययनं पुनरपि वर्षं तदपि न मुञ्चत्याशामर्षम् ॥ भज गोविन्दं० ॥ ९ ॥ वयसि गते कः कामविकारः शुष्के नीरे कः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कासारः ॥ नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः ॥ भज गोविन्दं० ॥ १० ॥ नारीस्तनभरनाभिनिवेशं मिथ्यामायामोहावेशम् ॥ एतन्मांसवसादिविकारं मनसि विचारय वारं वारम् ॥ भज गोविन्दं० ॥ ११ ॥ कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ॥ इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम् ॥ भज गोविन्दं० ॥ १२ ॥ गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ॥ नेयं सज्जनसङ्गे चित्तं देयं दीनजनाय च वित्तम् ॥ भज गोविन्दं० ॥ १३ ॥ यावज्जीवो निवसति देहे कुशलं तावत्पृच्छति गेहे ॥ गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ॥ भज गोविन्दं० ॥ १४ ॥ सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः ॥ यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् ॥ भज गोविन्दं० ॥ १५ ॥ रथ्यांचर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः ॥ नाहं न त्वं नायं लोकस्तदपि किमर्थं क्रियते शोकः भज गोविन्दं० ॥ १६ ॥ कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम् ॥ ज्ञानविहीने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वमनेन मुक्तिर्भवति न जन्मशतेन ॥ भज गोविन्दं भज गोविन्दं भज गोविन्दं मूढमते ॥ १७ ॥

इति श्रीमच्छङ्कराचार्यविरचितं चर्पटपञ्जरिकास्तोत्रम् ॥ ११ ॥

—*:❀:*—

१८५ हस्तामलकस्तोत्रम् ।

श्रीगणेशाय नमः ॥ कस्त्वं शिशो कस्य कुतोऽसि गन्ता किं नाम ते त्वं कुत आगतोऽसि ॥ एतन्मयोक्तं वद चार्भक त्वं मत्प्रीतये प्रीतिविवर्धनोऽसि ॥ १ ॥ हस्तामलक उवाच ॥ नाहं मनुष्यो न च देवयक्षौ न ब्राह्मणक्षत्रियवैश्यशूद्राः ॥ न ब्रह्मचारी न गृही वनस्थो भिक्षुर्न चाहं निजबोधरूपः ॥ २ ॥ निमित्तं मनश्चक्षुरादिप्रवृत्तौ निरस्ताखिलोपाधिराकाशकल्पः ॥ रविर्लोलचेष्टानिमित्तं तथा यः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ३ ॥ यमग्न्युष्णवन्नित्यबोधस्वरूपं मनश्चक्षुरादीन्यबोधात्मकानि ॥ प्रवर्तन्त आश्रित्य निष्कम्पमेकं स नित्योपलब्धिस्वरूपोऽह० ॥ ४ ॥ मुखाभासको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्पणे दृश्यमानो मुखत्वात्पृथक्त्वेन नैवास्ति वस्तु ॥ चिदाभासको धीषु जीवोपि तद्वत्स नित्योपलब्धि० ॥ ५ ॥ यथा दर्पणाभाव आभासहानौ मुखं विद्यते कल्पनाहीनमेकम् ॥ तथा धीवियोगे निराभासको यः स नित्योप० ॥ ६ ॥ मनश्चक्षुरादेर्वियुक्तः स्वयं यो मनश्चक्षुरादेर्मनश्चक्षुरादिः ॥ मनश्चक्षुरादेरगम्यस्वरूपः स नित्योपल० ॥ ७ ॥ य एको विभाति स्वतः शुद्धचेताः प्रकाशस्वरूपोऽपि नानेव धीषु ॥ शरावोदकस्थो तथा भानुरेकः स नित्योपल० ॥ ८ ॥ यथाऽनेकचक्षुः प्रकाशो रविर्न क्रमेण प्रकाशीकरोति प्रकाश्यम् ॥ अनेका धियो यस्तथैकः प्रबोधः स नित्योपल० ॥ ९ ॥ विवस्वत्प्रभातं यथारूपमक्षं प्रगृह्णाति नाभातमेवं विवस्वान् ॥ यथाभात आभासयत्यक्षमेकः स नित्योप० ॥ १० ॥ यथा सूर्य एकोऽप्स्वनेकश्चलासु स्थिरास्वप्यनन्यद्विभाव्यस्वरूपः ॥ चलासु प्रभिन्नः सुधीष्वेक एव स नित्योपलब्धि० ॥ ११ ॥ घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा निष्प्रभं मन्यते चातिमूढः ॥ यथा बद्धवद्भाति या मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहं० ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समस्तेषु वस्तुष्वनुस्यूतमेकं समस्तानि वस्तूनि यन्न स्पृशन्ति ॥ वियद्वत्सदा शुद्धमच्छस्वरूपं स नित्यो० ॥ १३ ॥ उपाधौ यथा भेदता सन्मणीनां तथा भेदता बुद्धिभेदेषु तेऽपि ॥ यथा चन्द्रिकाणां जले चञ्चलत्वं तथा चञ्चलत्वं तवापीह विष्णो ॥ १४ ॥

इति श्रीमच्छङ्कराचार्यकृतं हस्तामलकस्तोत्रं सम्पूर्णम् ॥ १२ ॥

---

१८६ वाक्यवृत्तिः ।

श्रीगणेशाय नमः ॥ सर्गस्थितिप्रलयहेतुमचिन्त्यशक्तिं विश्वेश्वरं विदितविश्वमनन्तमूर्तिम् ॥ निर्मुक्तबन्धनमपारसुखाम्बुराशिं श्रीवल्लभं विमलबोधघनं नमामि ॥ १ ॥ यस्य प्रसादादहमेव विष्णुर्मय्येव सर्वं परिकल्पितं च ॥ इत्थं विजानामि सदात्मरूपं तस्यांघ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥ २ ॥ तापत्रयार्कसंतप्तः कश्चिदुद्विग्नमानसः ॥ शमादिसाधनैर्युक्तः सद्गुरुं परिपृच्छति ॥ ३ ॥ अनायासेन येनास्मान्मुच्येयं भवबन्धनात् ॥ तन्मे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संक्षिप्य भगवन्कैवल्यं कृपया वद ॥ ४ ॥ साध्वी ते वचनव्यक्तिः प्रतिभाति वदामि ते ॥ इदं तदिति विस्पष्टं सावधानमनाः शृणु ॥ ५ ॥ तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः ॥ तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनम् ॥ ६ ॥ को जीवः कः परश्चात्मा तादात्म्यं वा कथं तयोः ॥ तत्त्वमस्यादिवाक्यं वा कथं तत्प्रतिपादयेत् ॥ ७ ॥ अत्र ब्रूमः समाधानं कोऽन्यो जीवस्त्वमेव हि ॥ यस्त्वं पृच्छसि मां कोऽहं ब्रह्मैवास्मि न संशयः ॥ ८ ॥ पदार्थमेव जानामि नाद्यापि भगवन् स्फुटम् ॥ अहं ब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं वद ॥ ९ ॥ सत्यमाह भवानत्र विज्ञानं नैव विद्यते ॥ हेतुः पदार्थबोधो हि वाक्यार्थावगतेरिह ॥ १० ॥ अन्तःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः ॥ आनन्दरूपः सत्यः सन् किं नात्मानं प्रपद्यसे ॥ ११ ॥ सत्यानन्दस्वरूपं धीसाक्षिणं बोधविग्रहम् ॥ चिन्तयाऽऽत्मतया नित्यं त्यक्त्वा देहादिगां धियम् ॥ १२ ॥ रूपादिमान्यतः पिण्डस्ततो नात्मा घटादिवत् ॥ वियदादिमहाभूतविकारत्वाच्च कुम्भवत् ॥ १३ ॥ अनात्मा यदि पिण्डोऽयमुक्तहेतुबलान्मतः ॥ करा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मलकवत्साक्षादात्मानं प्रतिपालय ॥ १४ ॥ घट-द्रष्टा घटाद्भिन्नः सर्वथा न घटो यथा ॥ देहद्रष्टा तथा देहो नाहमित्यवधारय ॥ १५ ॥ एवमिन्द्रियदृङ्नाहमिन्द्रियाणीति निश्चिनु ॥ मनो बुद्धिस्तथा प्राणो नाहमित्यवधारय ॥ १६ ॥ साङ्घातोऽपि तथा नाहमिति दृश्यविलक्षणम् ॥ द्रष्टारमनुमानेन निपुणं संप्रधारय ॥ १७ ॥ देहेन्द्रियादयो भावा हानादिव्यापृतिक्षमाः ॥ यस्य सन्निधिमात्रेण सोऽहमित्यवधारय ॥ १८ ॥ °अन्नादन्नविकारः सन्नयस्कान्तवदेव यः ॥ बुद्ध्यादींश्चालयेत्प्रत्यक् सोऽहमित्यवधारय ॥ १९ ॥ अजडात्मवदाभान्ति यत्सान्निध्याज्जडा अपि ॥ देहेन्द्रियमनःप्राणाः सोऽहमित्यवधारय ॥२०॥ अगमन्मे मनोऽन्यत्र सांप्रतं च स्थिरीकृतम् ॥ एवं यो वेत्ति धीवृत्तिं सोऽहमित्यवधारय ॥ २१ ॥ स्वप्नजागरिते सुप्तिं भवाभावौ धियां तथा ॥ यो वेत्त्यविक्रियः साक्षात्सोऽहमित्यवधारय ॥ २२ ॥ घटावभासको दीपो घटादन्यो यथेष्यते ॥ देहावभासको देही तथाहं बोधविग्रहः ॥ २३ ॥ पुत्रवित्तादयो भावा यस्य शेषतया प्रियाः ॥ द्रष्टा सर्वप्रियतमः सोऽहमित्यवधारय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ २४ ॥ परप्रेमास्पदतया मा न भूतमहं सदा ॥ भूयासमिति यो द्रष्टा सोऽहमित्यवधारय ॥ २५ ॥ यः साक्षिलक्षणो बोधस्त्वम्पदार्थः स उच्यते ॥ साक्षित्वमपि बोद्धृत्वमविकारितयाऽऽत्मनः॥२६॥ देहेन्द्रियमनःप्राणाहंकृतिभ्यो विलक्षणः ॥ प्रोज्झिताशेषषड्भावविकारस्त्वंपदाभिधः ॥ २७ ॥ त्वमर्थमेवं निश्चित्य तदर्थं चिन्तयेत्पुनः ॥ अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च ॥ २८ ॥ निरस्ताशेषसंसारदोषोऽस्थूलादिलक्षणः ॥ अदृश्यत्वादिगुणकः पराकृततमोमलः ॥ २९ ॥ निरस्तातिशयानन्दः सत्यप्रज्ञानविग्रहः ॥ सत्तास्वलक्षणः पूर्णः परमात्मेति गीयते ॥३०॥ सर्वज्ञत्वं परेशत्वं तथा सम्पूर्णशक्तिता ॥ वेदैः समर्थ्यते यस्य तद्ब्रह्मेत्यवधारय ॥ ३१ ॥ यज्ज्ञानात्सर्वविज्ञानं श्रुतिषु तिपादितम् ॥ मृदाद्यनेकदृष्टान्तैस्तद्ब्रह्मेत्यवधारय ॥३२॥ यदानन्त्यं प्रतिज्ञाय श्रुतिस्तत्सिद्धये जगौ ॥ तत्कार्यत्वं प्रपञ्चस्य तद्ब्रह्मेत्यवधारय ॥ ३३ ॥ विजिज्ञास्यतया यच्च वेदान्तेषु मुमुक्षुभिः ॥ समर्थ्यतेऽतियत्नेन तद्ब्रह्मेत्यवधारय ॥ ३४ ॥ जीवात्मना प्रवेशश्च नियन्तृत्व च तान् प्रति ॥ श्रयते यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदेषु तद्ब्रह्मेत्यवधारय ॥ ३५ ॥ कर्मणां फलदातृत्वं यस्यैव श्रूयते श्रुतौ ॥ जीवानां हेतुकर्तृत्वं तद्ब्रह्मेत्यवधारय ॥ ३६ ॥ तत्त्वम्पदार्थौ निर्णीतौ वाक्यार्थश्चिन्त्यतेऽधुना ॥ तादात्म्यमत्र वाक्यार्थस्तयोरेव पदार्थयोः ॥ ३७ ॥ संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः ॥ अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः ॥ ३८ ॥ प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः ॥ अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः ॥ ३९ ॥ इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् ॥ अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ॥ ४० ॥ तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ॥ पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥ ४१ ॥ तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने ॥ लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रवर्तते ॥ ४२ ॥ हित्वा द्वौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोधने ॥ यथा प्रवर्ततेऽस्माभिस्तथा व्याख्यातमादरात् ॥ ४३ ॥ आलम्बनतया भाति योऽस्मत्प्रत्ययशब्दयोः ॥ अन्तःकरणसंभिन्नबोधः स त्वंपदाभिधः ॥ ४४ ॥ मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः ॥ पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता ॥ विरुध्यते यतस्तस्माल्लक्षणा सम्प्रवर्तते ॥ ४६ ॥ मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे ॥ मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते ॥ ४७ ॥ तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा ॥ सोऽहमित्यादि वाक्यस्थपदयोरिव नापरा ॥ ४८ ॥ अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढीभवेत् ॥ शमादिसहितस्तावदभ्यसेच्छ्रवणादिकम् ॥ ४६ ॥ श्रुत्याचार्यप्रसादेन दृढो बोधो यदा भवेत् ॥ निरस्ताशेषसंसारनिदानः पुरुषस्तदा ॥ ५० ॥ विशीर्णकार्यकरणो भूतसूक्ष्मैरनावृतः ॥ विमुक्तकर्मनिगडः सद्य एव विमुच्यते ॥ ५१ ॥ प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा भवेत् ॥ किञ्चित्कालमनारब्धकर्मबन्धस्य संक्षये ॥ ५२ ॥ निरस्तातिशयानन्दं वैष्णवं परमं पदम् ॥ पुनरावृत्तिरहितं कैवल्यं प्रतिपद्यते ॥ ५३ ॥

इति श्रीमत्परमहंसश्रीमच्छङ्कराचार्यविरचिता

वाक्यवृत्तिः समाप्ता ॥ १३ ॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१८७ परापूजा ।

श्रीगणेशाय नमः ॥ पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ॥ स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥ १ ॥ निर्मलस्य कुतः स्नानं वस्त्रं विश्वोदरस्य च ॥ निरालम्बस्योपवीतं पुष्पं निर्वासनस्य च ॥ २ ॥ निर्लेपस्य कुतो गंधो रम्यस्याभरणं कुतः ॥ नित्यतृप्तस्य नैवेद्यस्ताम्बूलं च कुतो विभोः ॥ ३ ॥ प्रदक्षिणा ह्यनन्तस्य ह्यद्वयस्य कुतो नतिः ॥ वेदवाक्यैरवेद्यस्य कुतः स्तोत्रं विधीयते ॥४॥ स्वयं प्रकाशमानस्य कुतो नीराजनं विभोः ॥ अन्तर्बहिश्च पूर्णस्य कथमुद्वासनं भवेत् ॥ ५ ॥ एवमेव परा पूजा सर्वावस्थासु सर्वदा ॥ एकबुद्ध्या तु देवेशे विधेया ब्रह्मवित्तमैः ॥ ६ ॥

इति श्रीपरापूजा समाप्ता ॥ १४ ॥

१८८ शयनस्तोत्रम् ।

श्रीगणेशाय नमः ॥ आस्तीर्य सर्वत इदं परमात्मरूपं प्रावार्य सर्वत इदं परमात्मरूपम् ॥ शेते सुखेन निजलाभविनिर्वृतात्मा श्रीदेशिकेन्द्रकरुणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छयद्दष्टिदृष्टः ॥ १ ॥ सम्पूर्णवैदिकविधानसुतोषितेशः गार्हस्थ्यभोगविधिदोषविवेकभूमिः ।[illegible]मुक्तेषणो विगतमानमदादि शेते श्रीदेशि० ॥२॥[illegible]ाया-मयत्वमखिलेषु सदात्मकत्वं निर्णीय वेदवचनाद्गुरुवाक्यतोऽपि ॥ त्यक्तक्रियोऽहिरिव दिष्टभुगेव शेते श्रीदेशि० ॥ ३ ॥ धृत्वा वपुर्गुरुवरस्य निधाय पूर्णं बोधं हृदि क्व नु गतं निजकर्म पूर्वम् ॥ गच्छत्वनेन किमिति स्वसुखेन शेते श्रीदे० ॥४॥ स्वप्नो गुरुर्निजसुखोन्नतिबोधहेतुरीशोऽपि भाति निजरूपतयैव नित्यम् ॥ नेहेति वेदवचनानि निषिध्य शेते श्रीदे० ॥ ५ ॥ सङ्गाद्भयं परिमृशन् जनताविरुद्धं कर्माचरन् विततजङ्गलकोणकेषु ॥ शून्यालये कलशकारगृहेऽपि शेते श्रीदे० ॥ ६ ॥ त्रैलोक्यराज्यमथवा कमलासनस्य विष्णोः शिवस्य विभवं च तृणाय मत्वा ॥ कौपीनमप्यधिकमित्यहह प्रशेते श्रीदेशि० ॥ ७ ॥ आत्मानुसन्धिगलिताखिलवासनो यो विस्मृत्य विश्वमखिलं सशरीमेतत् ॥ खादन् हसन् भ्रमणमाकलयंश्च शेते श्रीदे० ॥ ८ ॥ बाहूपधानविनिषण्णशिराः शिलायां मञ्चे तटे द्युसरितो रविचन्द्रदीपे ॥ आलिङ्गितस्वधिषणावनितम्तु शेते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीदे० ॥ ९ ॥ चिन्मुद्रयाऽल्पकरसूचितचित्तवृत्तिः स्थित्वैकहेलया प्रकटयन्नधिकारिवर्गे ॥ ब्राह्मीं स्थितिं बहुलपुण्यचयेन शेते श्रीदे० ॥ १० ॥ द्रोणाचले स्वकृतपुण्यचयेन केन भाग्योदयेन गुरुणा निजबोधदाने ॥ संदत्तचिन्मयसुखावचनीयनिद्रः कृष्णो मुनिः स्वपिति देशिकदृष्टिदृष्टः ॥ ११ ॥ इदं हि जनुषः फलं जननमृत्युविच्छेदकृत् स्वकीयसुखचिद्घने यदिह लब्धविश्रान्तिता ॥ ततोऽपि च महत्फलं यदधिकारिवर्गे निजां दधात्यतुलसंविदं तत इदं गुरोराश्रयः ॥ १२ ॥

इति श्रीमत्कृष्णानन्दविरचितं
शयनस्तोत्रम् ॥ १५ ॥

---

१८९ भ्रष्टाष्टकम् ।

श्रीगणेशाय नमः ॥ विश्वं सत्यं मनुते तनुते कर्माणि लोकसंसिद्ध्यै ॥ वाचा मिथ्या जगदिति जल्पति नो वेत्ति यो महाभ्रष्टः ॥१॥ ब्रह्मैवेदं जल्पति दोषादोषोत्तमोधमान् पश्यन् ॥ नग्नो भूत्वा विचरत्यवधूतत्वं प्रदर्श्य भ्रष्टः ॥ २ ॥ कृत्याकृत्यमशेषं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यक्तुमशक्तं श्रुतेरगोचरताम् ॥ आत्मनि जल्पन्
हास्यास्पदतामित्येष मानवो भ्रष्टः ॥ ३ ॥ शा-
ष्टकसङ्कष्टश्लिष्टतनुर्मृष्टभोजनप्रीतः ॥ शिष्टोऽहं
मन्वानः कष्टमहो दुष्टमानवो भ्रष्टः ॥ ४ ॥ आत्मै-
वेदं जल्पंल्लोकोक्तीरसहमानमेधावी ॥ स्तुतिवा-
क्यानि श्रोतुं धावंस्तुष्टो न किं भवेद् भ्रष्टः ॥ ५ ॥
यस्मिन् स्वस्य न निष्ठा तद्धर्मिष्ठा न शिष्टगणना-
याम् ॥ कुर्वन्कर्म हताऽयं यद्यपि शिष्टो न किं
भवेद्भ्रष्टः ॥ ६ ॥ कर्तृत्वं भोक्तृत्वं मन्वानः स्वा-
त्मनि प्रभौ शम्भौ ॥ रोदिति हा किं कृतमिति
किं वा भोक्तव्यमित्यसौ भ्रष्टः ॥ ७ ॥ चिन्मात्रं
स्वात्मानं देहं मन्वान एजते यमतः ॥ सर्वात्मान-
मबुद्ध्वा ब्रह्माऽपि स्यादहो किल भ्रष्टः ॥ ८ ॥
भ्रष्टाष्टकमेतद्यस्त्रविचारयतीह मानवो धन्यः ॥
मान्यः स्याल्लोकेषु भ्रष्टत्वं वेत्ति निजचारित्रात्
॥ ९ ॥

इति श्रीमत्कृष्णानन्दसरस्वतीविरचितं भ्रष्टाष्टकं
सम्पूर्णम् ॥ १६ ॥

—०*०—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१६० शिष्टस्तोत्रम् ।

श्रीगणेशाय नमः ॥ भज विश्रान्तिं त्यज रे भ्रान्तिं निश्चिनु शैवं निजरूपम् ॥ देयादेयातीतं सच्चित्सुखरूपस्त्वं भव शिष्टः ॥ १ ॥ दृश्यमशेषं त्वत्तो भिन्नं मा भैषीः किल भूमानम् ॥ विद्धयात्मानं वेदनरूपं वेदशिरःस्थं भव शिष्टः ॥ २ ॥ तृणवत्त्यज धनवनितापुत्रान् लोकं शोकं खेदभवम् ॥ इदमहमित्थं कलनां हित्वा पूर्णानन्दो भव शिष्टः ॥ ३ ॥ कृत्याकृत्ये त्यज रे दूरे विधिगोचरतां मागास्त्वम् ॥ मानागोचररूपं ज्ञात्वा किं त्वं कर्ता भव शिष्टः ॥ ४ ॥ लोकविलक्षणचरितो भूया लोकातीतं पदमिच्छन् ॥ पावय सकलां पृथिवीमेनमात्मारामो भव शिष्टः ॥ ५ ॥ निन्दास्तोत्रं मानामानौ समदृष्टेस्ते किं कुरुताम् ॥ कुरुतां लोकः कामं स्वेष्टं का ते हानिर्भव शिष्टः ॥ ६ ॥ शैवः शाक्तो गणपतिभक्तो वैष्णवसौराविति नाना ॥ अज्ञात्वा यं जाता लोके स त्वं शम्भुर्भव शिष्टः ॥ ७ ॥ जलबुद्बुदवज्जगदिदमखिलं पश्यन्नात्मनि निष्ठ त्वम् ॥ को वा मोहः शोकः को वा द्वैतदृशस्तव भव शिष्टः ॥ ८ ॥ अज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पामन्त्रं दैशिकवचनाल्लब्ध्वा देवं स्वात्मानम् ॥ ज्ञात्वा सहजावस्थायां वस भावातीतो भव शिष्टः ॥ ९ ॥ शिष्टस्तोत्रं ब्रह्मिष्ठानां तुष्टिकरं स्यादिति कलये ॥ उक्तावस्था सर्वेषां स्याद्गुरुकृपया किल बुद्धिमताम् ॥ १० ॥

इति श्रीकृष्णानन्दसरस्वती वि० शिष्टस्तोत्रं सम्पूर्णम् ॥ १७ ॥

---

१९१ प्रश्नोत्तरमालिका [१]

श्रीगणेशाय नमः ॥ किं साध्यं मनुजानां बुद्धेः शुद्धत्वमेव बहुयत्नैः ॥ किं त्याज्यं खलसङ्गो देहाङ्कारममते च ॥ १ ॥ किं तीर्थं वेदशिरः किं देयं पात्र आत्मसम्बोधः ॥ किं भोग्यं सहजसुखं किं वाऽभाग्यं परेच्छया लब्धम् ॥ २ ॥ किं कष्टं यत्सत्यं किं वा सहजं परं ब्रह्म ॥ कर्तव्यं किं सर्वं रात्माऽकर्तेति बुद्धिरेव सदा ॥ ३ ॥ आदातुं संत्यक्तुं किमशक्यं ब्रह्मनिजरूपम् ॥ किं दुःखमबोधः किं सुखमात्मावबोधतः शान्तिः ॥ ४ ॥ विषमं विषं तु किं वा यत्किञ्चित्कस्यचिच्च या चिन्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परमामृतं तु किं वा श्रीगुरुवाक्यं कृपानिबिडम् ॥ ५ ॥ को गुरुरधिमन्तव्यो दैशिकशिष्यत्वबाधबोधयिता ॥ अध्येतव्यं किं खलु यावद्वेदार्थदर्शकः प्रणवः ॥ ६ ॥ कोऽनध्यायोऽध्ययने यावत्सद्गुरुमलब्धवांस्तावत् ॥ कः प्रणवार्थस्तूष्णीं किं ध्येयं ध्येयमात्रसंत्यागः ॥ ७ ॥ कः शूरो दृङ्मात्रान्मायाभेत्ता स्वयं प्रकाशज्ञः ॥ किं चिन्त्यं मनुजैरिह चिन्ताबीजं विचित्रजगत इति ॥ ८ ॥ किं पेशलं हि लोके विद्वच्चरितं विरुद्धशास्त्रमपि ॥ सद्भक्त्या किं कार्यं सज्जनपदरजसि भूयसः स्नानम् ॥ ९ ॥ आबाल्यात्किं कार्यं निरहङ्कारेण साधुपदसेवा ॥ भाग्योदयस्तु को वा गुरुवचनादद्वितीयपदलाभः ॥ १० ॥ मुक्तैः किं कर्तव्यं प्रारब्धाधीनसदसतां भोगः ॥ पुंसां किं सर्वस्वं सच्चित्सुखनामिका गुरोर्मूर्तिः ॥ ११ ॥ का कामधेनुरनघा वेदे देवे तथा गुरौ श्रद्धा ॥ को वैद्यो रोगहरो ब्रह्मिष्ठः सदयहृदयगुरुराजः ॥ १२ ॥ कः पुत्रः स्वोद्धर्ता ज्ञातस्वात्मैव चिन्मयः पुरुषः ॥ कः सुखशायी लोके संसृतिमिथ्यात्वपक्वमतितृप्तः ॥ १३ ॥ किं त्याज्यं साधुकृते चरिते कुत्सितमतिस्तु साधुजनैः ॥ कः शत्रुर्दुः-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खकरो गुरुवचने संशयो महाशत्रुः ॥ १४ ॥ कः शोभते नितान्तं निस्पृहताशालिनिजबोधः ॥ किं याच्यं सद्गुरुषु स्वोद्धारः सर्वदैन्यपरिहारः ॥१५॥ को वा मान्यः सिद्धो बालोऽपि ब्रह्मभावमतिमान्यः ॥ का वा दरिद्रसीमा मूढप्रियासिद्ध्यहङ्कृतिः प्रोक्ता ॥ १६ ॥ किं सोढव्यं विदुषा खलवचनं विषविनिर्मितं कठिनम् ॥ स्थेयं कथं खलेषु स्वीयां निष्ठां दृढं समाच्छाद्य ॥ १७ ॥

इति श्रीकृष्णानन्दसरस्वतीविरचिता प्रश्नोत्तर मालिका सम्पूर्णा ॥ १८ ॥

---

१९२ प्रश्नोत्तरमालिका (२)।

श्रीगणेशाय नमः ॥ कः खलु नालं क्रियते दृष्टादृष्टार्थसाधनपटीयान् ॥ अनया कण्ठस्थितया प्रश्नोत्तररत्नमालिकया ॥ १ ॥ भगवन्किमुपादेयं गुरुवचनं हेयमपि च किमकार्यम् ॥ को गुरुरधिगततत्त्वः सत्त्वहितायोद्यतः सततम् ॥ २ ॥ त्वरितं किं कर्तव्यं सुधिया श्रृङ्गारसन्ततिच्छेदः ॥ किं मोक्षतरोर्बीजं सम्यग्ज्ञानं क्रियासहितम् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कः पथ्यतरो धर्मः कः शुचिरिह यस्य मनसं शुद्धम् ॥ कः पण्डितो विवेकी किं विषम मवधीरणा गुरुषु ॥ ४ ॥ किं संसारे बहुशो विचिन्त्यमानमिदमेव ॥ मनुजेषु दृष्टतत्त्वं त्वपरहितायोद्यतं जन्म ॥ ५ ॥ मदिरेव जनमोहकः कः स्नेहः के च दस्यवो विषयाः ॥ का भववल्ली तृष्णा को वैरी यस्त्वनुद्योगः ॥ ६ ॥ कस्माद्भयमिह मरणादन्धादपि को विशिष्यते रोगी ॥ कः शूरो यो ललनालोचनबाणैर्न च व्यथितः ॥ ७ ॥ पातुं कर्णाञ्जलिभिः किममृतमिव युज्यते सदुपदेशः ॥ किं गुरुताया मूलं यदेतदप्रार्थनं नाम ॥ ८ ॥ किं गहनं स्त्रीचरितं कश्चतुरो यो न खण्डितस्तेन ॥ किं दारिद्र्यमतोषः किं लाघवं परधनादिपरियाच्ञा ॥ ९ ॥ किं जीवितमनवद्यं किं जाड्यं पाटवेऽप्यनभ्यासः ॥ को जागर्ति विवेकी का निद्रा मूढता जन्तोः ॥ १० ॥ नलिनीदलगतजलवत्तरलं किं यौवनं धनं चायुः ॥ के शशधरकरनिकरानुकारिणः सज्जना एव ॥ ११ ॥ को नरकः परवशता किं सौख्यं सर्वसङ्गविरतिर्या ॥ किं साध्यं भूतहितं किमु प्रियं प्राणिनामसवः ॥ १२ ॥ किं दानमना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१९३ परमेश्वरस्तुतिसारः ।

श्रीगणेशाय नमः ॥ त्वमेकः शुद्धोऽसि त्वयि निगमबाह्यामलमयं प्रपञ्चं पश्यन्ति भ्रमपरवशाः पापनिरताः ॥ बहिस्तेभ्यः कृत्वा स्वपदशरणं मानय विभो गजेन्द्रे दृष्टं ते शरणद वदान्यं स्वपदद्म् ॥ १ ॥ न सृष्टेस्ते हानिर्यदि हि कृपयातोऽवसि च मां वयाऽनेके गुप्ता व्यसनमिति तेऽस्ति श्रुतिपथे ॥ अतो मामुद्धर्तुं घटय मयि दृष्टिं सुविमलां न रक्ता स याच्त्वां स्वजनरतकर्तुं भव हरे ॥ २ ॥ कदाऽहं भोः स्वामिन्नियतमनसा त्वां हृदि भजेन्नभद्रे संसारे ह्यनवरतदुःखेऽतिविरसः ॥ लभेयं तां शान्तिं परममुनिभिर्या ह्यधिगता दयां कृत्वा मे त्वं वितर परशान्तिं भवहर ॥ ३ ॥ विधाता चेद्विश्वं सृजति सृजतां मे शुभकृतिं विधुश्चेत्पाता माऽवतु जनिमृतेर्दुःखजलधेः ॥ हरः संहर्त्ता संहरतु मम शोकं सजनकं यथाऽहं मुक्तः स्यां किमपि तु यथा ते विदधताम् ॥ ४ ॥ अहं ब्रह्मानन्दस्त्वमपि च तदाख्यः सुविदितस्ततोऽहं भिन्नो नो कथमपि भवत्तः श्रुतिदृशा ॥ तथा चेदानीं त्वं त्वयि मम विभेदस्य जननीं स्वमायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संवार्य प्रभव मम भेदं निरसितुम् ॥ ५ ॥ कदाऽहं हे स्वामिन् जनिमृतिमयं दुःखनिबिडं भवं हित्वा सत्येऽनवरतसुखे स्वात्मवपुषि ॥ रमे तस्मिन्नित्यं निखिलमुनयो ब्रह्मरसिका रमन्ते यस्मिंस्ते कृतसकलकृत्या यतिवराः ॥ ६ ॥ पठन्त्येके शास्त्रं निगमसपरे तत्परतया यजन्त्यन्ये त्वां वै ददति च पदार्थांस्तव हुतान् ॥ अहं तु स्वामिंस्ते शरणमगमं संसृतिभयाद्यथा ते प्रीतिः स्याद्धितकर तथा त्वं कुरु विभो ॥ ७ ॥ अहं ज्योतिर्नित्यो गगनमिव तृप्तः सुखमयः श्रुतेः सिद्धोऽद्वैतः कथमपि न भिन्नोऽस्मि विधुतः ॥ इति ज्ञाते तत्त्वे भवति च परः संसृतिलयादतस्तत्त्वज्ञानं मयि विघटयेस्त्वं हि कृपया ॥ ८ ॥ अनादौ संसारे जनिमृतिभये दुःखितमना मुमुक्षुः सन् कश्चिद्व्रजति हि गुरुं ज्ञानपरमम् ॥ ततो ज्ञात्वा यं वै तुदति न पुनः क्लेशनिवहैर्भजेऽहं तं देवं भवति च परो यस्य भजनात् ॥ ९ ॥ विवेको वैराग्यं न च शमदमाद्याः षडपरे मुमुक्षा मे नास्ति प्रभवति कथं ज्ञानममलम् ॥ अतः संसाराब्धेस्तरणसरणिं मामुपदिशन् स्वबुद्धिं श्रौतो मे वितर भगवंस्त्वं हि कृपया ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कदाहं भो स्वामिन्निगमसतिवेद्यं शिवमयं चिदानन्दं नित्यं श्रुतिहृतपरिच्छेदनिवहम् ॥ त्वमर्थाभिन्नं त्वामभिरम इहात्मन्यविरतं मनीषामेवं मे सफलय वदान्य स्वकृपया ॥ ११ ॥ यदर्थं सर्वं वै प्रियमसुधनादि प्रभवति स्वयं नान्यार्थो हि प्रिय इति च वेदे प्रविदितम् ॥ स आत्मा सर्वेषां जनिमृतिमतां वेदगदितस्ततोऽहं तं वेद्यं सततममलं यामि शरणम् ॥ १२ ॥ मया त्यक्तं सर्वं कथमपि भवेत्स्वात्मनि मतिस्त्वदीया माया मां प्रति तु विपरीतं कृतवती ॥ ततोऽहं किं कुर्यां न हि मम मतिः क्वापि चरति दयां कृत्वा नाथ स्वपदशरणं देहि शिवदम् ॥ १३ ॥ नगा दैत्याः कोशा भवजलधिपारं हि गमितास्त्वया चान्ये स्वामिन्किमिति समयेऽस्मिञ्छयितवान् ॥ न हेलां त्वं कुर्यास्त्वयि निहित सर्वे मयि विभो न हि त्वाऽहं हित्वा कमपि शरणं चान्यमगमम् ॥ १४ ॥ अनन्ताद्या विज्ञानगुणजलधेस्तेऽन्तमगमन्नतः पारं यायात्तव गुणगणानां कथमयम् ॥ गृणन्यावद्धित्वा जनिमृतिहरं याति परमां गतिं योगिप्राप्यामिति मनसि बुद्ध्वाऽहमनवम् ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रीब्रह्मानन्दविरचितः परमेश्वरस्तुतिसारः सम्पूर्णः ॥ २० ॥

—❀—

१९४ भगवच्छरणस्तोत्रम् ।

श्रीगणेशाय नमः ॥ सच्चिदानन्दरूपाय भक्तानुग्रहकारिणे ॥ मायानिर्मितविश्वाय महेशाय नमो नमः ॥ १ ॥ रोगा हरन्ति सततं प्रबलाः शरीरं कामादयोऽप्यनुदिनं प्रदहन्ति चित्तम् ॥ मृत्युश्च नृत्यति सदा कलयन्दिनानि तस्मात्त्वमेव शरणं मम दीनबन्धो ॥ २ ॥ देहो विनश्यति सदा परिणामशीलश्चित्तं च खिद्यति सदा विषयानुरागि ॥ बुद्धिः सदा हि रमते विषयेषु नान्तस्तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ ३ ॥ आयुर्विनश्यति यथाऽऽमघटस्थतोयं विद्युल्लतेव चपला नवयौवनश्रीः ॥ वृद्धा प्रधावति यथा मृगराजपत्नी तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ ४ ॥ आयाद्व्ययो मम भवत्यधिको विनीतेः कामादयो हि बलिनो निबलाः शमाद्याः ॥ मृत्युर्यदा तुदति मां बत किं वदेयं तस्मा० ॥ ५ ॥ तप्तं तपो नहि कदाऽपि मयेह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्वा वाण्या तथा नहि कदाऽपि तपश्च तप्तम् ॥ मिथ्याभिभाषणपरेण न मानसं हि तस्मात्० ॥६॥ स्तब्धं मनो मम सदा नहि याति सौम्यं चक्षुश्च मे न तव पश्यति विश्वरूपम् ॥ वाचा तथैव न वदेन्मम सौम्यवाणी तस्मात्त्व० ॥ ७ ॥ सत्त्वं न मे मनसि याति रजस्तमोभ्यां विद्धे तदा कथमहो शुभकर्मवार्ता ॥ साक्षात्परम्परतया सुखसादनं तत्तस्मात्० ॥ ८ ॥ पूजा कृता नहि कदाऽपि मया त्वदीया मन्त्रं त्वदीयमपि मे न जपेद्रसज्ञा ॥ चित्तं न मे स्मरति ते चरणौ ह्यवाप्य तस्मात्० ॥ ६ ॥ यज्ञो न मेऽस्ति हुतिदानदयादियुक्तो ज्ञानस्य साधनगणो न विवेकमुख्यः ॥ ज्ञानं क साधनगणेन विना क्व मोक्षस्तस्मात्० ॥ १० ॥ सत्सङ्गतिर्हि विदिता तव भक्तिहेतुः साऽप्यद्य नास्ति बत पण्डितमानिनो मे ॥ तामन्तरेण नहि सा क्व च बोधवार्ता तस्मात्० ॥ ११ ॥ दृष्टिर्न भूतविषया समताभिधाना वैषम्यमेव तदियं विषयीकरोति ॥ शान्तिः कुतो मम भवेत्समता न चेत्स्यात्तस्मात्० ॥ १ ॥ मैत्री समेषु न च मेऽस्ति कदाऽपि नाथ दीने तथा न करुणा मुदिता च पुण्ये ॥ पापेऽनु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पेक्षणवतो मम मुत्कथं स्यात्तस्मात्० ॥ १३ ॥
नेत्रादिकं मम बहिर्विषयेषु सक्तं नान्तर्मुखं भवति
तामविहाय तस्य ॥ क्वान्तर्मुखत्वमपहाय सुखस्य
वार्ता तस्मात्० ॥ १४ ॥ त्यक्तं गृहाद्यपि मया
भवतापशान्त्यै नासीदसौ हृतहृदो मम मायया
ते ॥ सा चाधुना किमु विधास्यति नेति जाने
तस्मात्० ॥ १५ ॥ प्राप्तं धनं गृहकुटुम्बगजाश्व-
दारा राज्यं यदैहिकमथेन्द्रपुरश्च नाथ ॥ सर्वं
विनश्वरमिदं न फलाय कस्मै तस्मात्० ॥ १६ ॥
प्राणान्निरुद्धय विधिना न कृतो हि योगो योगं
विनाऽस्ति मनसः स्थिरता कुतो मे ॥ तां वं विना
मम न चेतसि शान्तिवार्ता तस्मात्० ॥ १७ ॥
ज्ञान यथा मम भवत्कृपया गुरूणां सेवा तथा न
विधिनाऽकरवं हि तेषाम् ॥ सेवापि साधनतया
विदिताऽस्ति चित्तं तस्मात्० ॥ १८ ॥ तीर्थादि-
सेवनमहो विधिना हि नाथ नाकारि येन मनसो
मम शोधनं स्यात् ॥ शुद्धिं विना न मनसोऽव-
गमापवर्गौ तस्मात्० ॥ १९ ॥ वेदान्तशीलनमपि
प्रमिति करोति ब्रह्मात्मनः प्रमितिसाधनसंयुतस्य ॥
नैवाऽस्ति साधनलवो मयि नाथ तस्यास्तस्मात्०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ २० ॥ गोविन्द शङ्कर हरे गिरिजेश मेश शम्भो जनार्दन गिरीश मुकुन्द साम्ब ॥ नान्या गतिर्मम कथञ्चन वां विहाय तस्मात्प्रभो मम गतिः कृपया विधेया ॥ २१ ॥ एतत्स्तवं भगवदाश्रयणाभिधानं ये मानवाः प्रतिदिनं प्रणताः पठन्ति ॥ ते मानवा भवरतिं परिभूय शान्तिं गच्छन्ति किं च परमात्मनि भक्तिमन्तः ॥ २२ ॥

इति श्रीब्रह्मानन्दविरचितं भगवच्छरणस्तोत्रं सम्पूर्णम् ॥ २१ ॥

---

१९५ निगमसारस्तोत्रम् ।

श्रीगणेशाय नमः ॥ शब्दं स्पर्शञ्च रूपं रसमथ सकलं गन्धमप्यङ्ग येन त्वं जानीषे स शम्भुस्त्रिपुरसुखलवान् पश्यति स्वप्नदीप्त्या ॥ एकोऽप्यानन्त्यमागान्निजपरममहामाययेक्षोत्थया यः स्वातन्त्र्यान्नो जहाति स्वकपरशिवतां स त्वमेवक्षुगीतः ॥ १ ॥ अन्नं प्राणो मनो धीरहमिति च वपुः पञ्चकानुप्रविष्टः साक्षी सच्चित्सुखाब्धिः सकलनरनारीधीगुहासु प्रदीपः ॥ स्वाराज्यं यस्य लाभादिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वदति सदा याजुषी श्रौतवाणी सोऽहं ब्रह्माप्य-खण्डो गुरुवचनबलात् स्वप्रथामात्ररूपः ॥ २ ॥ सत्तासामान्यरूपा गलितनिजपरा देवता या परा-ख्या सृष्ट्वाऽऽकाशादिभूतान्यनु निजवपुषा तत्र जृम्भामवाप ॥ व्यामिश्रीकृत्य तानि स्वियमथ पुरुषं बुध्यते रामगीता सैव त्वं कार्यहेतू कलय भव सखे सर्वबोधैकभूमिः ॥ ३ ॥ योऽश्नीते परिकल्पि-तान् स्वकरणैरर्थान् बहिः पूरुषो विश्वाख्यः स्वपने मनोजनियमान् भुक्तं स तेजोमयः ॥ तत्सर्वं विनिपीय सुप्तिसमये प्राज्ञोऽभवत्तत्त्रयं मायां तद्व-शमाह चाङ्गिरसगीभूयोऽयमात्मा बृहत् ॥ ४ ॥ स्वाभाविकीभिर्निजशक्तिभिर्या क्रीडां विधत्ते शिव-युक्क्षमन्ताम् ॥ सृष्टिं विधायापि गतान्यरूपा सानु-त्तराहं परिमीयपादा ॥ ५ ॥ भज शिवं सहजं सततं त्यज प्रखरदुःखमयं सकलं जगत् ॥ कलनया रहितो भव सन्मते किमु तया ततयासि च निष्कलः ॥६॥ निष्कलब्रह्मविद्याया माहात्म्यं को नु वेत्त्यहो ॥ कृष्णानन्दस्तु तद्रूपो वेत्ति श्रीगुरुपादुकाः ॥ ७ ॥ निगमागमसारसंग्रहं कलयेद्यो गुरुपादभक्तिमान् ॥ लभते स तु निर्वृतिं परां कलनातत्पदे स्वसं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विदि ॥ ८ ॥

इति श्रीकृष्णानन्दसरस्वतीविरचितं निगमसारसंग्रहस्तोत्रम् ॥ २२ ॥

---

१६६ तत्त्वमसिस्तोत्रम् ।

श्रीगणेशाय नमः ॥ मनःकल्पितमेवेदं जगज्जीवेशकल्पनम् ॥ तदेकं संपरित्यज्य निर्वाणमनुभूयताम् ॥ १ ॥ सति सर्वस्मिन्सर्वज्ञत्वं सत्यल्पे वा स्वल्पज्ञत्वम् ॥ सर्वाल्पस्याभावे कस्माज्जीवेशो वा तत्त्वमसि ॥ २ ॥ सत्यां व्यष्टौ जीवोपाधिः सति सर्वस्मिन्नीशोपाधिः ॥ व्यष्टिसमष्ट्योर्ज्ञाने कस्माज्जीवेशौ वा तत्त्वमसि ॥ ३ ॥ सत्यज्ञाने जीवित्वोक्तिर्मायासत्त्वे त्वीशत्वोक्तिः ॥ मायाविद्यावाधे कस्माज्जीवेशौ वा तत्त्वमसि ॥ ४ ॥ सति वा कार्ये कारणतोक्तिः कारणसत्त्वे कार्यत्वोक्तिः ॥ कार्याकारणभावे कस्माज्जीवेशौ वा तत्त्वमसि ॥ ५ ॥ सति भोक्तव्ये भोक्ताऽयं स्याद्दातव्ये वा दाता स स्यात् ॥ भोग्यो विषयो भावे कस्माज्जीवेशौ वा तत्त्वमसि ॥ ६ ॥ सत्यज्ञाने गुरुणा बाध्यं सति वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वैते शिष्यैर्भाव्यम् ॥ अद्वैतात्मनि गुरुशिष्यौ कौ त्यज रे भेदं तत्त्वमसि ॥ ७ ॥ सत्यद्वैते प्राप्तौ यत्नः सति वा द्वैते बाधे यत्नः ॥ द्वैताद्वैते ते सङ्कल्पस्त्यज रे शेषं तत्त्वमसि ॥ ८ ॥ साक्षित्वं यदि दृश्यं सत्यं दृश्यासत्त्वे साक्षी त्वं कः ॥ उभयाभावे दर्शनमपि किं तूष्णीं भव रे तत्त्वमसि ॥९॥ प्रज्ञानामलविग्रहनिजसुखजृम्भणमेतन्नेतरथा ॥ तस्मान्नैवादेयं हेयं तूष्णीं भव रे तत्त्वमसि ॥१०॥ ब्रह्मैवाहं ब्रह्मैव त्वं ब्रह्मैवैकं नान्यत्किञ्चित् ॥ निश्चित्येत्थं निजसमसुखभुक्तूष्णीं भव हे तत्त्वमसि ॥ ११ ॥ एतत्स्तोत्रं प्रपठता विचार्य गुरुवाक्यतः ॥ प्राप्यते ब्रह्मपदवी सत्यं सत्यं न संशयः ॥ १२ ॥

इति श्रीमत्प० कृष्णानन्दसरस्वतीवि०तत्त्वमसिस्तोत्रं सम्पूर्णम् ॥ २३ ॥

---

१९७ शिवानन्दलहरी ।

श्रीगणेशाय नमः ॥ पुरे पौरान्पश्यन्नरयुवतिनामाकृतिमयान् सुवेषान्स्वर्णालङ्करणकलितांश्चि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

असद्दर्शीन् ॥ स्वयं साक्षी द्रष्टेत्यपि च कलयंस्तैः सह रमन् मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥१॥ वने वृक्षान्पश्यन्दलफलभरान्नम्रसुशिखान् । घनच्छायाछन्नान्बहुलकलकूजद्द्विजगणान्, भजन्घस्रे रात्रावत्रनितलतल्पैकशयनो मुनिर्न० ॥ २ ॥ कदाचित्प्रासादे क्वचिदपि तु सौधे च धवले कदा काले शैले क्वचिदपि च कूले च सरिताम् ॥ कुटीरे दान्तानां मुनिजनवराणामपि वसन् मुनिर्न० ॥३॥ क्वचिद्बालैः सार्धं करतलजतालैश्च हसितैः क्वचिद्वै तारुण्याङ्कितचतुरनार्या सह रमन् ॥ क्वचिद्वृद्धैश्चिन्तां क्वचिदपि तदन्यैश्च विलपन् मुनिर्न० ॥ ४ ॥ कदाचिद्विद्वद्भिर्विविधसुपुरानन्दरसिकैः कदाचित्काव्यालंकृतरससरसालैः कविवरैः ॥ वदन्वादांस्तर्कैरनुमितिपरैस्तार्किकवरैर्मुनिर्न० ॥ ५ ॥ कदा ध्यानाभ्यासैः क्वचिदपि सपर्यां विकसितैः सुगन्धैः तत्पुष्पैः क्वचिदपि दलैरेव विमलैः ॥ प्रकुर्वन्देवस्य प्रमुदितमनाः संस्तुतिपरो मुनिर्न० ॥ ५ ॥ शिवायाः शम्भोर्वा क्वचिदपि च विष्णोरपि कदा गणाध्यक्षस्यापि प्रकटतपनस्यापि च कदा ॥ पठन् वै नामालिं नयनरचितानन्दसलिलो मुनिर्न० ॥ ७ ॥ कदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गङ्गाम्भोभिः क्वचिदपि च कूपोत्थितजलैः क्वचित्कासारोत्थैः क्वचिदपि सदुष्णैश्च शिशिरैः ॥ भजन् स्नानैर्भूत्या क्वचिदपि च कर्पूरनिभया मुनिर्नो० ॥ ८ ॥ कदाचिज्जागृत्यां विषयकरणैः संव्यवहरन् कदाचित्स्वप्नस्थानपि च विषयानेव च भजन् ॥ कदाचित्सौषुप्तं सुखमनुभवन्नेव सततं मुनिर्नो० ॥ ९ ॥ कदाप्याशावासाः क्वचिदपि च दिव्याम्बरधरः क्वचित्पञ्चास्योत्थां त्वचमपि दधानः कटितटे मनस्वी निःशङ्कः स्वजनहृदयानन्दजनको मुनिर्नो० ॥ १० ॥ कदाचित्सत्त्वस्थः क्वचिदपि रजोवृत्तियुगतस्तमोवृत्तिः क्वापि त्रितयरहितः क्वापि च पुनः ॥ कदाचित्संसारी श्रुतिपथविहारी क्वचिदपि मुनिर्नो० ॥ ११ ॥ कदाचिन्मौनस्थः क्वचिदपि च व्याख्याननिरतः कदाचित्सानन्दं हसति रभसत्यक्तवचसा ॥ कदाचिल्लोकानां व्यवहृतिसमालोकनपरो मुनिर्नो० ॥ १२ ॥ कदाचिच्छक्तीनां विकचमुखपद्मेषु कवलान् क्षिपंस्तासां क्वापि स्वयमपि च गृह्णन् स्वमुखतः ॥ महाद्वैतं रूपं निजपरविहीनं प्रकटयन् मुनिर्नो० ॥ १३ ॥ क्वचिच्छैवैः सार्द्धं क्वचिदपि च शाक्तैः सह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

वसन् कदा विष्णोर्भक्तैः क्वचिदपि च सौरैः सह वसन् ॥ कदा गाणापत्यैर्गतसकलभेदोऽदयतया मुनिर्नि० ॥ १४ ॥ निराकारं कापि क्वचिदपि च साकारममलं निजं शैवं रूपं विविधगुणभेदेन बहुधा कदाऽश्चर्यं पश्यन्किमिदमिति हृष्यन्नपि कदा मुनिर्नि० ॥ १५ ॥ कदा द्वैतं पश्यन्नखिलमपि सत्यं शिवमयं महावाक्यार्थानामवगतसमभ्यासवसतः ॥ गतद्वैताभावः शिव शिव शिवेत्येव विलपन् मुनिर्नि० ॥ १६ ॥ इमां मुक्तावस्थां परमशिवसंस्थां गुरुकृपासुधापाङ्गावाप्यां सहजसुखवाप्यामनुदिनम् ॥ मुहुर्मज्जन्मज्जन्भजति सुकृती चेन्नरवरस्तदा योगी त्यागी कविरिति वदन्तीह कवयः ॥ १७ ॥ मौने मौनी गुणिनि गुणवान् पण्डिते पण्डितश्च दीने दीनः सुखिनि सुखवान् भोगिनि प्राप्तभोगः ॥ मूर्खे मूर्खो युवतिषु युवा वाग्मिनि प्रौढवाग्मी धन्यः कोऽपि त्रिभुवनजयी योऽवधूतेऽवधूतः ॥ १८ ॥

इति श्रीमच्छङ्कराचार्यवि० शिवानन्दलहरी सम्पूर्णा ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१६८ गुरुतत्त्वविवेचनम् ।

श्रीगणेशाय नमः ।। अन्धेनान्धीकृतं विश्वं सचक्षुस्तु सचक्षुषम् ।। दिदृक्षाचेद्व्रज त्वं तु दैशिकेन्द्रं सचक्षुषम् ।। १ ।। अन्धस्य गुरुरेकाक्षस्तस्य द्व्यक्षो गुरुर्मतः ।। द्व्यक्षाणामपि सर्वेषां गुरुस्त्र्यक्षो न तत्समः ।। २ ।। सहस्राक्षादयः सर्वे द्व्यक्षा एव हि केवलम् ।। कार्यध्येयदृशो यस्मात्त्र्यक्षशिष्यपदे स्थिताः ।। ३ ।। त्र्यक्षस्तु भगवानादिपुरुषः शङ्करो भवः ।। सृष्ट्वा सर्वाणि भूतानि कायमध्ये यं संदिशन् ।। ४ ।। उभयातीतममलं तृतीयाक्षस्य गोचरम् ।। ददाति प्रार्थितस्तुष्टः श्रीगुरुः परमेश्वरः ।। ५ ।। स आदिनाथो भगवाननादिर्ज्ञानाम्बुधिः स्वात्मरतिर्महात्मा ।। श्रीदैशिकेन्द्रः करुणाम्बुराशिर्नानास्वरूपैश्चरतीह लोके ।। ६ ।। क्वचिन्न किञ्चित्कुरुते मनस्वी क्वचिन्न किञ्चित् कुरुते प्रमत्तः ।। बालो यथा क्रीडति सर्वलोके तथैव स क्रीडति पामरेषु ।। ७ ।। स लभ्यते केनचिदेव पुंसा विज्ञायते केनचिदेव पुंसा ।। प्रस्तूयते केनचिदेव पुंसा शृणोति वा तं स नरः स धन्यः ।। ८ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रीकृष्णानन्दयतिवि० गुरुतत्त्वविवेचनं सम्पूर्णम् ॥ २५ ॥

---

१६६ ब्रह्मनिरूपणस्तोत्रम् ।

श्रीगणेशाय नमः ॥ आराध्य राममखिलेश्वरमादिदेवं प्राप्येति पृच्छति गुरुं किमिदं च कोऽहम् ॥ तं शिष्यमाह कृपयेति गुरुर्महात्मा ब्रह्मेदमस्ति सकलं त्वमहं तथैव ॥ १ ॥ अग्निर्यथा हि भुवनं गत एक आस्ते नानाकृतिः स्थिरचरः पुरुषस्तथाऽतः ॥ जुष्टां सदेति मुनिभिर्धिषणां गृहाण ब्रह्मेदम० ॥ २ ॥ चन्द्रो यथा बहुविधो जळपात्रभेदादेकस्तथा महिषु भाति परः प्रविष्टः ॥ तेषां भिदास्ति जगतो न सदेति विद्धि ब्रह्मेदमस्ति० ॥ ३ ॥ सर्वासु दिक्षु च विदिक्षु कणाः प्रवृत्ता वह्नेर्यथापि न भवन्ति ततो विभिन्नाः ॥ जीवास्तथाऽऽत्मन इदं च ततोऽवबुद्धं ब्रह्मे० ॥ ४ ॥ द्रष्टाऽस्ति नान्य इत आत्मन एष देवः सर्वेषु तिष्ठति चिदात्मतया विभातः ॥ आत्मैव सर्वमिति वेदवचोऽस्ति तस्माद्ब्रह्मे० ॥ ५ ॥ आत्मैव ते यमयिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वपुरस्य सर्वं शास्ता प्रविश्य सकलस्य जनस्य यो हि ॥ इद्धोऽशुमांस्तपति येन तदेव शुद्धं ब्रह्मे० ॥ ६ ॥ एकं यमूचुरमलं बहुधा स्वबुद्धया प्राज्ञाश्चतुर्मुखयमेन्द्रहुताशरूपम् ॥ भेदं प्रकल्प्य तत एव सदेति पश्य ब्रह्मेद० ॥ ७ ॥ नारायणात्मकमिदं जगदाह वेदो जातं यतो भवति यत्र ततो विभिन्नम् ॥ तोयात्तरङ्गमिव वेद्मि सदेति तस्माद्ब्रह्मेद० ॥ ८ ॥ ज्ञानादिदं पठति यः खलु शुद्धबुद्धिः स्तोत्र मनः परतरे प्रणिधाय नित्यम् ॥ ज्ञात्वा परात्परतरं परिमुच्य बन्धं सद्यः पुमान्भवति सोऽथ परात्मरूपः ॥ ९ ॥

इति श्रीमदुदासीनात्मस्वरूपवि० ब्रह्मनिरूपणस्तोत्रम् ॥ २६ ॥

२०० ज्ञानदीपस्तोत्रम् ।

श्रीगणेशाय नमः ॥ परीक्षां विधाय प्रमाणैर्विरक्तो न मे स्याद्विनाशीति निष्ठां प्रयातः ॥ गुरुं श्रोत्रियं ब्रह्मनिष्ठं च गत्वा यदाप्नोति तत्त्वं तदेवाहमस्मि ॥ १ ॥ स विद्वान् प्रशान्तं विनेयं प्रपन्नं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निरीक्ष्य प्रसन्नः कृपाधीनचित्तः ॥ अधिष्ठानघस्थ प्रपञ्चस्य यद्धि वदेन्नित्यशुद्धं तदेवा० ॥ २ ॥ अवस्थासु सर्वासु भात्येकरूपं स्वभास्यैर्न भातीन्द्रियाद्यैः सदैव ॥ घटाद्यैर्यथा भानुरात्मस्वरूपं परं बोधरूपं तदेवाह० ॥ ३ ॥ निषिध्याखिलं दृश्यजातं निषिध्यं निषेधावसानं स्वतोभाससमानम् ॥ मनोवागतीतं परानन्दरूपं परंज्योतिराद्यं तदेवा० ॥ ४ ॥ अहं तां परित्यज्य देहे ह्यनित्ये यथा स्वप्नदृष्टे प्रबोधं प्रयाति ॥ तथा तां परित्यज्य जाग्रच्छरीरे भवेद्ब्रह्म यत्नात्तदे० ॥ ५ ॥ मुमुक्षा प्रशान्ति यदास्य प्रयाति न बन्धो न मोक्षोऽनुभूत्यस्ति यस्य ॥ न पापं न पुण्यं न धर्मो न कर्म समाधिस्तदन्यस्तदेवा० ॥ ६ ॥ श्रुतं ब्रह्म सृष्टेः पुरा भेदशून्यं सदेकं यदा वर्तमानेऽपि काले ॥ तथैवास्ति मोक्षावसानं न यस्मिन् विभेदोऽस्ति किञ्चित्तदे० ॥ ७ ॥ यदज्ञानतो दुःखराशौ निमज्जत् सुखाब्धौ च यस्य प्रबोधेन सद्यः ॥ भवेत्कृत्यशून्याऽथ यस्यानुभूत्या सदा शब्दरूपं तदेवा० ॥ ८ ॥ इहामुत्र भोगाद्विरक्तः परात्मानुसन्धाननिष्ठः पुमाञ्छुद्धबुद्धिः ॥ तमोहीनचक्षुः स्तवं ज्ञानदीपं पठेद्यो न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूयो वसेन्मातृकुक्षौ ॥ ६ ॥

इति श्रीमदुदासीनात्मस्वरूपवि० ज्ञानदीप-
स्तोत्रम् ॥ २७ ॥

---

२०१ चतुःश्लोकीभागवतम् ।

श्रीगणेशाय नमः ॥ श्रीभगवानुवाच ॥ ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ॥ सरहस्यं तदङ्गं च गृहाण गदितं मया ॥ १ ॥ यावानहं यथाभावो यद्रूपगुणकर्मकः ॥ तदैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥ २ ॥ अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ॥ पश्चाद यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥ ३ ॥ ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ॥ तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥ ४ ॥ यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ॥ प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥ ५ ॥ एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः ॥ अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ॥ ६ ॥ एतन्मतं समातिष्ठ परमेण समाधिना ॥ भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥ ७ ॥

इति श्रीमद्भागवतान्तर्गतं चतुःश्लोकीभागवतम् ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०२ सप्तश्लोकी गीता ।

श्रीगणेशाय नमः ॥ ओमित्येकाक्षरं ब्रह्म व्या-
हरन् मामनुस्मरन् ॥ यः प्रयाति त्यजन् देहं स
याति परमां गतिम् ॥ १ ॥ स्थाने हृषीकेश तव
प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ॥ रक्षांसि
भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्ध-
सङ्घाः ॥ २ ॥ सर्वतः पाणिपादं तत्सर्वतोऽक्षि-
शिरोमुखम् ॥ सर्वतः श्रुतिमल्लोके सर्वमावृत्य
तिष्ठति ॥ ३ ॥ कविं पुराणमनुशासितारमणोरणी-
यांसमनुस्मरेद्यः ॥ सर्वस्य धातारमचिन्त्यरूपमादि-
त्यवर्णं तमसः परस्तात् ॥ ४ ॥ ऊर्ध्वमूलमधः शाख-
मश्वत्थं प्राहुरव्ययम् ॥ छन्दांसि यस्य पर्णानि
यस्तं वेद स वेदवित् ॥ ५ ॥ सर्वस्य चाहं हृदि
सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ॥ वेदैश्च
सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥ ६ ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामे-
वैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ७ ॥

इति सप्तश्लोकी गीता सम्पूर्णा ॥ २६ ॥

इति वेदान्तस्तोत्राणि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूयो वस

इति श्रीमद्

सङ्कीर्णस्तोत्राणि ।

—❀—❀—

२०३ भगवत्प्रातःस्मरणम् ।

श्रीगणेशाय नमः ॥ प्रातः स्मरामि फणिराज-तनौ शयानं नागामरासुरनरादिजगन्निदानम् ॥ वेदैः सहामरगणैरुपगीयमानं कान्तारकेतनवतां परमं निधानम् ॥ १ ॥ प्रातर्भजामि भवसागरवा-रिपारं देवर्षिसिद्धनिवहैर्विहितोपहारम् ॥ संदृप्त-दानवकदम्बमदापहारं सौन्दर्यराशिजलराशिसुता-विहारम् ॥ २ ॥ प्रातर्नमामि शरदम्बरकान्तिकान्तं पादारविन्दमकरन्दजुषां भवान्तम् ॥ नानावतार-हृतभूमिभरं कृतान्तं पाथोजकम्बुरथपादकरं प्रशा-न्तम् ॥ ३ ॥ श्लोकत्रयमिदं पुण्यं ब्रह्मानन्देन कीर्तितम् ॥ यः पठेत् प्रातरुत्थाय सर्वपापैः प्रमुच्यते ॥ ४ ॥

इति श्रीब्रह्मानन्देन विरचितं भगवत्प्रातः स्मरणम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०४ प्रातः स्मरणस्तोत्रम् ।

श्रीगणेशाय नमः ॥ प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं सच्चित्सुखं परमहंसगतिं तुरीयम् ॥ यत्स्वप्नजागरसुषुप्तमवैति नित्यं यद्ब्रह्म निष्कलमहं न च भूतसंघः ॥ १ ॥ प्रातर्भजामि मनसो वचसामगम्यं वाचो विभान्ति निखिला यदनुग्रहेण ॥ यन्नेति नेति वचनैर्निगमा अवोचुस्तं देवदेवमजमच्युतमाहुरग्र्यम् ॥ २ ॥ प्रातर्नमामि तमसः परमर्कवर्णं पूर्णं सनातनपदं पुरुषोत्तमाख्यम् ॥ यस्मिन्निदं जगदशेषमशेषमूर्तौ रज्ज्वां भुजङ्गम इव प्रतिभासितं वै ॥ ३ ॥ श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषणम् ॥ प्रातःकाले पठेद्यस्तु स गच्छेत्परमं पदम् ॥ ४ ॥

इति श्रीभगवत्पादाचार्यविरचितं प्रातः स्मरणस्तोत्रम् ॥ २ ॥

---

२०५ अश्वत्थस्तोत्रम् ।

श्रीगणेशाय नमः ॥ श्रीनारद उवाच ॥ अनायासेन लोकोऽयं सर्वान्कामानवाप्नुयात् ॥ सर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[illegible]मकं चैकं तन्मे ब्रूहि पितामह ॥ १ ॥ ब्रह्मो-
वाच [illegible] देवमुनेऽश्वत्थं शुद्धं सर्वात्मकं तरुम् ॥
यत्प्र[illegible]लोकः सर्वान्कामान्समश्नुते ॥ २ ॥
अश्वत्थाद्दक्षिणे रुद्रः पश्चिमे विष्णुरास्थितः ॥ ब्रह्मा
चोत्तरदेशस्थः पूर्वे त्विन्द्रादिदेवताः ॥ ३ ॥ स्क-
न्धोपस्कन्धपत्रेषु गोविप्रमुनयस्तथा ॥ मूलं वेदाः
पयो यज्ञा संस्थिता मुनिपुङ्गव ॥ ४ ॥ पूर्वादिदिक्षु
संयाता नदीनदसरोऽब्धयः ॥ तस्मात्सर्वप्रयत्नेन
ह्यश्वत्थं संश्रयेद्बुधः ॥ ५ ॥ त्वं क्षीर्यफलकश्चैव
शीतलश्च वनस्पते ॥ त्वामाराध्य नरो विन्द्यादै-
हिकामुष्मिकं फलम् ॥ ६ ॥ चलद्दलाय वृक्षाय
सर्वदाश्रितविष्णवे ॥ बोधितत्त्वाय देवाय ह्यश्व-
त्थाय नमो नमः ॥ ७ ॥ अश्वत्थ यस्मात्त्वयि वृक्ष-
राज नारायणस्तिष्ठति सर्वकालम् ॥ अतः श्रुतस्त्वं
सततं तरूणां धन्योऽसि चारिष्टविनाशकोऽसि ॥८॥
क्षीरदस्त्वं च येनेह येन श्रीस्त्वां निषेवते ॥ सत्येन
तेन वृक्षेन्द्र मामपि श्रीर्निषेवताम् ॥ ९ ॥ एकादशा-
त्मरुद्रोऽसि वसुनाथशिरोमणिः ॥ नारायणोऽसि
देवानां वृक्षराजोऽसि पिप्पल ॥ १० ॥ अग्निगर्भः
शमीगर्भो देवगर्भः प्रजापतिः ॥ हिरण्यगर्भो भूगर्भो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यज्ञगर्भो नमोऽस्तु ते ॥ ११ ॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ १२ ॥ सततं वरुणे [illegible] मारादृष्टिराश्रयेत् ॥ परितस्त्वां [illegible] तृणानि सुखमस्तु ते ॥ १३ ॥ अक्षिस्पन्द भुजस्पन्दं दुःस्वप्नं दुर्विचिन्तनम् ॥ शत्रूणां च समुत्थानं ह्यश्वत्थ शमय प्रभो ॥ १४ ॥ अश्वत्थाय वरेण्याय सर्वैश्वर्यप्रदायिने ॥ नमो दुःस्वप्ननाशाय सुस्वप्नफलदायिने ॥ १५ ॥ मूलता ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ॥ अग्रतः शिवरूपाय वृक्षराजाय ते नमः ॥ १६ ॥ य दृष्ट्वा मुच्यते रोगः स्पृष्ट्वा पापैः प्रमुच्यते ॥ यदाश्रया[illegible] तम श्वत्थं नमाम्यहम् ॥ १७ ॥ अश्वत्थ सुमहाभाग सुभग प्रियदर्शन ॥ इष्टकामांश्च मे देहि शत्रुभ्यस्तु पराभवम् ॥ १८ ॥ आयुः प्रजां धनं धान्य सौभाग्यं सर्वसम्पदम् ॥ देहि देव महावृक्ष त्वामहं शरणं गतः ॥ १९ ॥ ऋग्यजुःसाममन्त्रात्मा सर्वरूपी परात्परः ॥ अश्वत्थो वेदमूलोऽसावृषिभिः प्रोच्यते सदा ॥ २० ॥ ब्रह्महा गुरुहा चैव दरिद्रा व्याधिपीडितः ॥ आवृत्य लक्ष्यसंख्यं तत्स्तोत्रमेत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[illegible]मकं चैकं तन्मे ब्रूहि पितामह ॥ १ ॥ ब्रह्मो-
द्यो व[illegible] देवमुनेऽश्वत्थं शुद्धं सर्वात्मकं तरुम् ॥
इति श्र[illegible]
यत्प्र[illegible] लोकः सर्वान्कामान्समश्नुते ॥ २ ॥
अश्वत्थाद्दक्षिणे रुद्रः पश्चिमे विष्णुरास्थितः ॥ ब्रह्मा
चोत्तरदेशस्थः पूर्वे त्विन्द्रादिदेवताः ॥ ३ ॥ स्क-
न्धोपस्कन्धपत्रेषु गोविप्रमुनयस्तथा ॥ मूलं वेदाः
पयो यज्ञा संस्थिता मुनिपुङ्गव ॥ ४ ॥ पूर्वादिदिक्षु
संयाता नदीनदसरोऽब्धयः ॥ तस्मात्सर्वप्रयत्नेन
ह्यश्वत्थं संश्रयेद्बुधः ॥ ५ ॥ त्वं क्षीर्यफलकश्चैव
शीतलश्च वनस्पते ॥ त्वामाराध्य नरो विन्द्यादै-
हिकामुष्मिकं फलम् ॥ ६ ॥ चलद्दलाय वृक्षाय
सर्वदाश्रितविष्णवे ॥ बोधितत्त्वाय देवाय ह्यश्व-
त्थाय नमो नमः ॥ ७ ॥ अश्वत्थ यस्मात्त्वयि वृक्ष-
राज नारायणस्तिष्ठति सर्वकालम् ॥ अतः श्रुतस्त्वं
सततं तरूणां धन्योऽसि चारिष्टविनाशकोऽसि ॥८॥
क्षीरदस्त्वं च येनेह येन श्रीस्त्वां निषेवते ॥ सत्येन
तेन वृक्षेन्द्र मामपि श्रीर्निषेवताम् ॥ ९ ॥ एकादशा-
त्मरुद्रोऽसि वसुनाथशिरोमणिः ॥ नारायणोऽसि
देवानां वृक्षराजोऽसि पिप्पल ॥ १० ॥ अग्निगर्भः
शमीगर्भो देवगर्भः प्रजापतिः ॥ हिरण्यगर्भो भृगुर्भो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यज्ञगर्भो नमोऽस्तु ते ॥ ११ ॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ १२ ॥ सततं वरुणे... मारादूवृष्टिराश्रयेत् ॥ परितस्त्वां ...वन्तां तृणानि सुखमस्तु ते ॥ १३ ॥ अक्षिस्पन्द भुजस्पन्द दुःस्वप्नं दुर्विचिन्तनम् ॥ शत्रूणां च समुत्थानं ह्यश्वत्थ शमय प्रभो ॥ १४ ॥ अश्वत्थाय वरेण्याय सर्वैश्वर्यप्रदायिने ॥ नमो दुःस्वप्ननाशाय सुस्वप्नफलदायिने ॥ १५ ॥ मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ॥ अग्रतः शिवरूपाय वृक्षराजाय ते नमः ॥ १६ ॥ य दृष्ट्वा मुच्यते रोगैः स्पृष्ट्वा पापैः प्रमुच्यते ॥ यदाश्रया... तमश्वत्थं नमाम्यहम् ॥ १७ ॥ अश्वत्थ सुमहाभाग सुभग प्रियदर्शन ॥ इष्टकामांश्च मे देहि शत्रुभ्यस्तु पराभवम् ॥ १८ ॥ आयुः प्रजां धनं धान्य सौभाग्यं सर्वसम्पदम् ॥ देहि देव महावृक्ष त्वामहं शरणं गतः ॥ १९ ॥ ऋग्यजुःसाममन्त्रात्मा सर्वरूपी परात्परः ॥ अश्वत्थो वेदमूलोऽसावृषिभिः प्रोच्यते सदा ॥ २० ॥ ब्रह्महा गुरुहा चैव दरिद्रो व्याधिपीडितः ॥ आवृत्य लक्ष्यसंख्यं तत्स्तोत्रमेत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्सुखी भवेत् ॥ २१ ॥ ब्रह्मचारी हविष्याशी त्वधः-
शायी जितेन्द्रियः ॥ पापोपहतचित्तोऽपि व्रतमेतत्स-
मा[illegible] ॥ २२ ॥ एकहस्तं द्विहस्तं वा कुर्याद्गोमय-
लेपनम् ॥ अर्चेत्पुरुषसूक्तेन प्रणवेन विशेषतः
॥ २३ ॥ मौनी प्रदक्षिणं कुर्यात्प्रागुक्तफलभाग्भ-
वेत् ॥ विष्णोर्नामसहस्रेण ह्यच्युतस्यापि कीर्तनात्
॥ २४ ॥ पदे पदान्तरं गत्वा करचेष्टाविवर्जितः ॥
वाचा स्तोत्रं मनो ध्याने चतुरङ्गं प्रदक्षिणम् ॥ २५ ॥
अश्वत्थः स्थापितो येन तत्कुलं स्थापितं ततः ॥
धनायुषां समृद्धिस्तु नरकात्तारयेत्पितॄन् ॥ २६ ॥
अश्वत्थमूलमाश्रित्य शाकान्नोदकदानतः ॥ एक-
स्मिन्भोजिते विप्रे कोटिब्राह्मणभोजनम् ॥ २७ ॥
अश्वत्थमूलमाश्रित्य जपहोमसुरार्चनात् ॥ अक्षयं
फलमाप्नोति ब्रह्मणो वचनं तथा ॥ २८ ॥ एव-
माश्वासितोऽश्वत्थः सदाश्वासाय कल्पते ॥ यज्ञार्थं
छेदितेऽश्वत्थे ह्यक्षयं स्वर्गमाप्नुयात् ॥ २९ ॥
छिन्नो येन वृथाऽश्वत्थश्छेदिताः पितृदेवताः ॥
अश्वत्थः पूजितो यत्र पूजिताः सर्वदेवताः ॥ ३० ॥

इति ब्रह्मनारदसंवादे अश्वत्थस्तोत्रं
सम्पूर्णम् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०६ तुलसीकवचम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीतु[illegible]त्रमन्त्रस्य श्रीमहादेव ऋषिः । अ[illegible] श्रीतुलसी देवता । मनसेप्सितक[illegible] जपे विनियोगः ॥ तुलसि श्रीमह[illegible] धारिणि ॥ शिरो मे तुलसी पातु भ[illegible]स्विनी ॥ १ ॥ दृशो मे पद्मनयना श्रीसख[illegible] मम ॥ घ्राणं पातु सुगन्धा मे मुखं च सुमुखी मम ॥ २ ॥ जिह्वां मे पातु शुभदा कण्ठं [illegible]मयी मम ॥ स्कन्धौ कह्लारिणी पातु हृदयं विष्णुवल्लभा ॥ ३ ॥ पुण्यदा पातु मे मध्यं नाभिं सौभाग्यदायिनी ॥ कटिं कुण्डलिनी पातु ऊरू नारदवन्दिता ॥ ४ ॥ जननी जानुनी पातु जङ्घे सकलवन्दिता ॥ नारायणप्रिया पादौ सर्वाङ्गं सर्वरक्षिणी ॥ ५ ॥ सङ्कटे विषमे दुर्गे भये वादे महाहवे ॥ नित्यं हि सन्ध्ययोः पातु तुलसी सर्वतः सदा ॥ ६ ॥ इतीदं परमं गुह्यं तुलस्याः कवचामृतम् ॥ मर्त्यानाममृतार्थाय भीतानामभयाय च ॥ ७ ॥ मोक्षाय च मुमुक्षूणां ध्यायिनां ध्यानयोगकृत् ॥ वशाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्सुख
शाये
मो... ...नां विद्यायै वेदवादिनाम् ॥८॥ द्रविणाय
लेपन... ...पिनां पापशान्तये ॥६॥ अन्नाय क्षुधि-
॥ २३ ॥ मोक्षाय स्वर्गमिच्छताम् ॥ पशव्यं पशु-
वेत ... विष्णो पुत्रकाङ्क्षिणाम् ॥ १० ॥ राज्याय
॥ २४ ॥ पदे ...न्तानां च शान्तये ॥ भक्त्यर्थं
वाचा स्तोत्रनां विष्णौ सर्वान्तरात्मनि ॥ ११ ॥
अत्र त्रिवर्गसिद्ध्यर्थं गृहस्थेन विशेषतः ॥ उद्यन्तं
चण्डकिरणमुपस्थाय कृताञ्जलिः ॥ १२ ॥ तुलसी-
कानने तिष्ठन्नासीनो वा जपेदिदम् ॥ सर्वान्का-
मानवा... तथैव मम सन्निधिम् ॥ १३ ॥ मम
प्रियकरं नित्यं हरिभक्तिविवर्धनम् ॥ या स्यान्मृत-
प्रजा नारी तस्या अङ्गं प्रमार्जयेत् ॥ १४ ॥ सा
पुत्रं लभते दीर्घं जीविनं चाप्यरोगिणम् ॥ वन्ध्या-
या मार्जयेदङ्गं कुशैर्मन्त्रेण साधकः ॥ १५ ॥ साऽ-
पि संवत्सरादेव गर्भं धत्ते मनोहरम् ॥ अश्वत्थे
राजवश्यार्थी जपेदग्नेः सुरूपभाक् ॥ १६ ॥ पलाश-
मूले विद्यार्थी तेजोऽर्थ्यभिमुखो रवेः ॥ कन्यार्थी
चण्डिकागेहे शत्रुहत्यै गृहे मम ॥ १७ ॥ श्रीकामो
विष्णुगेहे च उद्याने स्त्री वशा भवेत् ॥ किमत्र
बहुनोक्तेन ... ॥ १८ ॥ ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काममभिध्यायेत्तं तं प्राप्नोत्यसंशयम् ।
गेहगतस्त्वं तु तारकस्य वधेच्छया ॥ १९
स्तोत्रं च कवचं तुलसीगतमानसः ॥
तारकं हन्ता भविष्यसि न संशयः ॥ २०

इति श्रीब्रह्माण्डपुराणे तुलसीकवचं सम्पूर्णम् ॥ ४ ॥

—:-:—

२०७ तुलसीस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जगद्धात्रि नमस्तुभ्यं विष्णोश्च प्रियवल्लभे ॥ यतो ब्रह्मादयो देवाः सृष्टिस्थित्यन्तकारिणः ॥ १ ॥ नमस्तुलसि कल्याणि नमो विष्णुप्रिये शुभे ॥ नमो मोक्षप्रदे देवि नमः संपत्प्रदायिके ॥ २ ॥ तुलसी पातु मां नित्यं सर्वापद्भ्योऽपि सर्वदा ॥ कीर्तितापि स्मृता वापि पवित्रयति मानवम् ॥ ३ ॥ नमामि शिरसा देवीं तुलसीं विलसत्तनुम् ॥ यां दृष्ट्वा पापिनो मर्त्या मुच्यन्ते सर्वकिल्बिषात् ॥ ४ ॥ तुलस्या रक्षितं सर्वं जगदेतच्चराचरम् ॥ या विनिर्हन्ति पापानि दृष्ट्वा वा पापिभिर्नरः ॥ ५ ॥ नमस्तुलस्यतितरां [illegible]यै बद्ध्वा बलिं कलौ ॥ [illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्सुर
शायं

मे... ...ऽपरे ॥ ६ ॥ तुलस्या नापरं लेपन... ...त जगतीतले ॥ यथा पवित्रितो लोको ॥ ... मौनं... वैष्णवः ॥ ७ ॥ तुलस्याः पल्लवं वि... ...रस्यारोपितं कलौ ॥ आरोपयति सर्वाणि श्रेयांसि वरमस्तके ॥ ८ ॥ तुलस्या सकला देवा वसन्ति सततं यतः ॥ अतस्तामर्चयेल्लोके सर्वान्देवान्समर्चयन् ॥ ॥ ९ ॥ नमस्तुलसि सर्वज्ञे पुरुषोत्तमवल्लभे ॥ पाहि मां सर्वपापेभ्यः सर्वसम्पत्प्रदायिके ॥ १० ॥ इति स्तोत्रं पुरा गीतं पुण्डरीकेण धीमता ॥ विष्णुमर्चयता नित्यं शोभनैस्तुलसीदलैः ॥ ११ ॥ तुलसी श्रीमहालक्ष्मीर्विद्याऽविद्या यशस्विनी ॥ धर्म्या धर्मानना देवी देवदेवमनःप्रिया ॥ १२ ॥ लक्ष्मीः प्रियसखी देवी द्यौर्भूमिरचला चला ॥ षोडशैतानि नामानि तुलस्याः कीर्तयन्नरः ॥ १३ ॥ लभते सुतरां भक्तिमन्ते विष्णुपदं लभेत् ॥ तुलसी भूर्महालक्ष्मीः पद्मिनी श्रीहरिप्रिया ॥ १४ ॥ तुलसि श्रीसखि शुभे पापहारिणि पुण्यदे ॥ नमस्ते नारदनुते नारायणमनःप्रिये ॥ १५ ॥

इति श्रीपुण्डरीककृतं तुलसीस्तोत्रं सम्पूर्णम् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu